પૂજ્ય પંન્યાસજી મહારાજના

# હસ્તાક્ષરનું અક્ષયપાત્ર

॥ ૬૮ ॥

"॥ ॐ अर्हं नमः ॥ नमो वीयरागाय ॥

नमो अरिहंताणं।
नमो सिद्धाणं।
नमो आयरियाणं।
नमो उवज्झायाणं।
नमो लोए सव्वसाहूणं।
एसो पंच नमुक्कारो, सव्वपावप्पणासणो।
मंगलाणं च सव्वेसिं, पढमं हवइ मंगलं ॥१॥"

॰ इति नमस्कारसूत्रं।"

પૂજ્ય પંન્યાસજી મહારાજની રોજનીશી

સંકલન : પંન્યાસ વજ્રસેનવિજય



પરમ પૂજ્ય સકલાગમરહસ્યવેદી

**આચાર્યદેવ શ્રીમદ્‌વિજય દાનસૂરીશ્વરજી** મહારાજાના શિષ્યરત્ન

પરમ પૂજ્ય કર્મસાહિત્ય નિષ્ણાંત

**આચાર્યદેવ શ્રીમદ્‌વિજય પ્રેમસૂરીશ્વરજી** મહારાજાના શિષ્યરત્ન

પરમ પૂજ્ય કલિકાલકલ્પતરૂ

**આચાર્યદેવ શ્રીમદ્‌વિજય રામચંદ્રસૂરીશ્વરજી** મહારાજાના શિષ્યરત્ન

પરમ પૂજ્ય અધ્યાત્મયોગી

**પંન્યાસપ્રવરશ્રી ભદ્રંકરવિજયજી ગણિવર્ય**

॥ श्री शिवंकराय भद्रंकराय नमोनमः ॥

પરમ પૂજ્ય પંન્યાસશ્રી ભદ્રંકરવિજયજી ગણિવર્ય મહારાજા



मयि तद्रूपं सोऽहं ।
પરમાત્માનું રૂપ મારામાં છે અને તે જ હું છું.

આગમન : સંવત ૧૯૫૯ ને માગશર સુદ ત્રીજ (ઇ.સ.૧૯૦૨)
ઉર્ધ્વગમન : સવંત ૨૦૩૬ ને વૈશાખ સુદ ચૌદસ (ઇ.સ.૧૯૮૦)

# શ્રી સિદ્ધચક્ર મંત્રકળશ



ધ્વનિ : શ્રી આલાપ દેસાઈ
રજૂઆત : ૧૪.૦૨.૨૦૨૧ દિને
'ગુરુ ગ્રંથ બહુમાન પર્વ' દરમ્યાન
ગ્રંથ ૫૦ના અર્પણ અવસરે, આરાધના ધામ.

રચનાકાર : પં.ઉદયરત્નવિજયજી ગણિ
પોષ સુદ ૧૦, સં.૨૦૭૭
રાત્રે : ૧ કલાકે, રામ પાવનભૂમિ

આ QR Code ઉપર મોબાઈલથી સ્કેન કરતાં જ
આપને 'હસ્તાક્ષર થીમ સોંગ' સાંભળવા મળશે.

પૂજ્ય પંન્યાસજી મહારાજના

# હસ્તાક્ષરનું અક્ષયપાત્ર

॥૬૮॥



પૂજ્ય પંન્યાસજી મહારાજની રોજનીશી

સંકલન : પંન્યાસ વજ્રસેનવિજય

ॐ


☐ **HASTAKSHAR NU AKSHAY PATRA**

Personal Diaries comprising of Divine everyday thoughts,
musings & experiences of Panyashshri Bhadrankar Vijayji Maharaj.

☐ **VOLUME - 68**

Year 2022 / સંવત્ ૨૦૭૯
350 Copies / 384 Pages
For Private Circulation only.

☐ **PUBLISHER**



© Shri Bhadrankar Gyandeepak Public Charitable Trust



Mumbai / Vadodara / Rajkot

team@mindfiesta.com

☐ **SPONSOR**

Shri C. K. Mehta
Vadodara | Mumbai

☐ **ENHANCED & DESIGNED BY**

Bharti Deepak Mehta
Fiesta Studios
Pattani Bldg., M.G.Road, Rajkot - 360001.
bharti@mindfiesta.com
+91 98252 15500

☐ **eBOOKS AVAILABLE AT**

www.bhadrankar.com

www.navkarday.com

Amazon Kindle

Telegram : HastaksharNuAkshayPatra


☐ **ખાસ વિજ્ઞપ્તિ**

આ ગ્રંથશ્રેણીનાં જે જે ગ્રંથોના વાંચન પશ્ચાત્
જે ગ્રંથોની આપને આવશ્યકતા ન હોય, તે દરેક ગ્રંથો
ઉપર લખેલાં સરનામે અમોને જરૂરથી પરત મોકલશોજી,
જેથી અન્ય ભવિજનો પણ આ ચિંતનોથી ભાવિત થઈ શકે.




હાં...! આ અક્ષયપાત્રો ભાવોથી તો અ-ક્ષયપાત્રો જ રહેવાના પણ આજે ૬૮મો ભાગ એટલે અંતિમ ભાગ! આ ભાગમાં સાહેબજીએ તૈયાર કરેલા સંસ્કૃતના શ્લોકો કે ચિંતનો નથી, કિન્તુ સૅંકડો શાસ્ત્રોમાંથી ચૂંટેલા અત્યંત આત્મોપયોગી શ્લોકો અને ચિંતનો છે. તેમાં પણ અધિક તો મૈત્ર્યાદિ ભાવોથી ભાવિત શ્લોકો જ છે. ખાસ તો વિશેષતા એ છે કે પોતાના હાથે ઉતારેલા તે સર્વે શ્લોકો જે જે ગ્રંથમાંથી લીધા છે અને જે ગ્રંથકાર પૂજ્યોએ રચેલા છે, તે તે નામોના ઉલ્લેખ સાથે ચાલીસેક પાનાની તો અનુક્રમણિકા જ છે! તે આખી મોટી હસ્તલિખિત નોટ જ્યારે મારા ગુરુમહારાજ એટલે કે હાલારના હીરલા પરમ પૂજ્ય આચાર્યદેવ શ્રીમદ્‌વિજય કુંદકુંદસૂરીશ્વરજી મહારાજનાં કિંમતી સંગ્રહમાંથી મળી, ત્યારે અમો સૌ અત્યંત આનંદવિભોર થયેલ.

અમો એમાં રહેલા શ્લોકો વાંચીને માણતાં હતાં અને બીજી બાજુ 'અક્ષયપાત્ર'નું કામ ચાલતું હતું. એટલે રાજકોટથી ભારતીબેનને બોલાવી હાથોહાથ આ અમૂલ્ય ખજાનો સોંપ્યો અને કહ્યું કેઃ 'આને જીવની જેમ સાચવજો.' આજે શ્રી નમસ્કાર મહામંત્રના ૬૮ અક્ષરો સમાન સૌથી છેલ્લો અડસઠમો અને સૌથી વધુ પાનાઓ ધરાવતો અપૂર્વ - અનોખો એવો મૈત્રીમઢિત આ સંસ્કૃત ભાગ તૈયાર થયો છે, તે સાહેબજીની જાણે નવકારપ્રીતિનું જ પૂર્ણ પ્રતિબિંબ છે. સંસ્કૃતના અભ્યાસુઓ તથા મૈત્ર્યાદિ ભાવોનાં ભાવુકો માટે તો આ ગ્રંથ અત્યંત ઉપકારક-ઉપયોગી-લાભકારી-શ્રેયસ્કર બની રહેશે.

કેવા સુંદર શ્લોકો તથા ચિંતનોની વિરાસત રૂપ આ ગ્રંથ બની રહ્યો છે, તેના ફક્ત નમૂના સ્વરૂપ શ્રી ચિરંતનાચાર્ય ભગવંતના કેટલાક શ્લોકો જોઈએ તોઃ

ॐ

मोहोपहतचित्तास्ते, मैत्र्यादिभिरसंस्कृताः । स्वयं नष्टा जनं मुग्धं, नाशयन्ति च धिग् हहा ॥
परे हितमतिर्मैत्री, मुदिता गुणमोदनम् । उपेक्षा दोषमाध्यस्थ्यं, करुणा दुःखमोक्षधीः ॥
मैत्रा निखिलसत्त्वेषु, प्रमोदो गुणशालिषु । माध्यस्थ्यमविनेयेषु, करुणा दुःखिदेहिषु ॥
धर्मकल्पद्रुमस्यैता, मूलं मैत्र्यादिभावनाः । यैर्न ज्ञाता न चाभ्यस्ताः, स तेषामतिदुर्लभः ॥
मानेऽपमाने निन्दायां, स्तुतौ वा लोष्ठुकाञ्चने । जीविते मरणे लाभा-लाभे रङ्के महर्द्धिके ॥
शत्रौ मित्रे सुखे दुःखे, हृषीकार्थे शुभाशुभे । सर्वत्रापि यदेकत्वं, तत्त्वं तद् भेद्यतां परम् ॥
यत्र साम्यं स तत्रैव, किमात्मपरचिन्तया । जानीत तद्विना हंहो! नात्मनो न परस्य च ॥
क्षान्त्यादिर्दशधा धर्मः, सर्वधर्मशिरोमणिः । सोऽपि साम्यवतामेव, मैत्र्यादिकृतकर्मणाम् ॥
साम्यं समस्तधर्माणां, सारं ज्ञात्वा ततो बुधाः । बाह्यं दृष्टिग्रहं मुक्त्वा, चित्तं कुरुत निर्मलम् ॥

આ નોટ ખજાનામાંથી નીકળી પણ આપણા હાથ સુધી આજે પહોંચાડનાર કોઈ હોય તો તે છે અમારા વડોદરા-મુંબઈના દાદાગુરૂમહારાજના પરમ ગુરૂભક્ત, ૯૦ વર્ષના પણ મન-વચન-કાયાથી સંપૂર્ણ રીતે સ્વમાં સ્થ. આ ગ્રંથો તેમના હાથમાં પહોંચે એટલે કોઈ નોવેલના ચાહક નોવેલને જેવા રસથી વાંચે, તેથી શતાધિક રસપૂર્વક તેઓ વાંચે-મનન કરે. દરેક અંક પોતાની નજર સમક્ષ લાવીને હૃદયસ્થ કરીને પછી જ તિજોરીમાં મૂકતા હોય, તેમ ગ્રંથોના કબાટમાં મૂકે. એવા અર્થસારથિ સુશ્રાવકરત્ન **સી.કે.મહેતા**ની જબ્બરદસ્ત આર્થિક ઉદારતા અપ્રતિમ રહી છે. વળી રાજકોટના દાદાગુરૂમહારાજના શ્રાવકરત્નોમાંના એક એવા શશીકાંતભાઈ કે જેઓએ શ્રી નવકાર મહામંત્રની અનુપ્રેક્ષા દ્વારા દેશ-પરદેશમાં સેંકડો ભાવિકોને ધર્મમાર્ગે જોડેલ, તેમના પુત્રવધૂ સુશ્રાવિકા **ભારતીબેન દિપકભાઈ મહેતા** કે જેઓએ પૂજ્ય દાદાગુરૂદેવના ભાવોથી ભાવિત બનીને **'પારસમણી'**નું આલેખન કરી જૈનજગતને એક યોગીપુરૂષની જીવનસાધનાનું આંશિક પણ હાર્દ પ્રગટ કરાવ્યું, તે ભારતીબેને એમના ૩૦ જેટલાં બુદ્ધિશાળી, અરે બહેરા-મુંગા પણ... ભાવુક આત્માઓના સહયોગથી ભગીરથ-અતિ ક્લિષ્ટ કાર્ય સાતેક વર્ષનાં સમયમાં પૂર્ણ કરીને એક મહાન કાર્ય કર્યું છે, તે બદલ તેમનું અંતરથી અભિવાદન કરવા સાથે સાથે આજે પૂજ્યપાદ્ અમારા ગુરૂસ્થાનીય પંન્યાસપ્રવર શ્રી વજ્રસેનવિજયજી મહારાજને આ ગ્રંથ ભાવથી અર્પણ કરીએ છીએ.

આ. મનમોહનસૂરિ
હેમપ્રભ વિ.

ॐ



# આ હસ્તાક્ષરોનું પઠન
# નિત્ય ભેટ આપશે આપણને
# ધર્મમેઘ સમાધિની!

સવારે અગ્યારેક વાગ્યાનો સમય હતો. કોઈ અદ્‌ભુત ગ્રંથનું વાંચન કરી રહ્યાં હતાં પૂજ્ય ગુરૂમહારાજ. પરિસરના સૂક્ષ્મ ધ્વનિ આંદોલને ય તેઓને જરાપણ ખલેલ ન પહોંચાડી. તેઓ તો જાણે કે વાંચનમાં ડૂબી જ ગયેલા. અમો ટગર ટગર તેઓને માણીએ અને તેઓ માણે ગ્રંથને! શરીર થોડું ઉતર્યું લાગ્યું, એટલે જ કદાચ ચશ્મા પણ નાકની દાંડીથી સ્હેજ નીચે ઉતરી ગયેલા. ગોચરીનો સમય થવા આવ્યો. કોઈ શિષ્યે આવી કાન પાસે ધીમા અવાજે કહ્યુંઃ 'ગુરૂ મહારાજ...!' જાણે ઊંડાણથી બહાર આવતા હોય, તેમ તેઓ આ વાતાવરણમાં સ્હેજ ભળ્યાં અને અમને જોઈ પૂછ્યું કેઃ 'અરે, તમે ક્યારે આવ્યા?' અમે માત્ર સ્મિત કર્યું. એ જ બપોરે વાચનામાં તેમણે સમજાવ્યુંઃ 'ધારણા, ધ્યાન કે સમાધિ જ્યારે કોઈ ખાસ પરિણામ નિપજાવવા અર્થે ન હોય, ત્યારે તે સ્વયં પરિણામ સ્વરૂપ હોય. ત્યારે એક એવી વિશુદ્ધ અને સંપૂર્ણ જાગ્રતિ આવતી હોય છે, કે જેમાં 'ધર્મમેઘ સમાધિ' કે બ્રહ્માંડમાંથી જાણે આશિષોની વર્ષા થતી હોય અને આપણે તેમાં આકંઠ ડૂબી ગયાં હોઈએ, તેવી અનુભૂતિ થાય છે. આજે ચીમનભાઈ આવ્યા, ત્યારે લગભગ હું એ જ સ્થિતિમાં હતો!'

સાહેબજી, હવે અમોને ય એવી 'ધર્મમેઘ સમાધિ' લાગી છે. ચૈતન્યવિકાસની અનંત શક્યતાનો વિરલ આલેખ મળ્યો, તે મુજબ પ્રબળ મનોરથ સંગે કર્મમાટી ખંખેરી આ કલ્યાણમાર્ગે મોક્ષના મંગલ કળશ સુધીની યાત્રા પરિપૂર્ણ કરી શકીએ, એવી આ ૬૮મા ગ્રંથના અંતિમ પડાવે મૈત્રીપૂર્ણ ધ્રુવ પ્રાર્થના.

વડોદરા/મુંબઈ

સી. કે. મહેતા












ૐ અર્હં મુખકમલવાસિની પાપાત્મ ક્ષયંકારી ।
વદ વદ વાગ્વાદિની સરસ્વતી ઐં હ્રીં નમઃ સ્વાહા ॥

ૐ

ૐ

'ૐ સોઽહં ૐ હંસઃ સોઽહં ૐ'

દેલવાડા, આબુ, પો. સુદ ૧, સં. ૨૦૨૭, સન ૧૯૭૧

°

આબુ - દેલવાડા આદિ તીર્થોમાં તૈયાર કરેલાં
મંત્ર આદિ ભાવનાઓ સંબંધી હસ્તલિખિત
શાસ્ત્રીય સંસ્કૃત પાઠો :

°

શ્રી જીરાવલા પાર્શ્વનાથ ભગવાનની સ્તુતિ

प्रबलेऽपि कलिकाले
स्मृतमपि ध्यानात् हरति दुरितानि ।
काङ्क्षित फलानि कुरुते
स जयति जीराउला पार्श्वः ॥ १ ॥

ह्रीँ ऐँ ॐ अर्हँ ॐ ॐ अर्हँ ॐ ऐँ ह्रीँ

## મૈત્ર્યાદિયુક્ત ચિત્ત એટલે 'અધ્યાત્મ'

સર્વ જીવો પ્રત્યે સ્નેહપરિણામ સ્વરૂપ
અથવા પરહિતચિંતારૂપ મૈત્રીભાવ પ્રગટાવવાનો છે.
જીવો પ્રત્યે જે દ્વેષ કે ઉદાસીનતાની લાગણી છે,
તે જ જીવને ભવભ્રમણ કરાવનારી છે.
જીવો પ્રત્યે મૈત્રીભાવ કેળવવાથી તે દૂર થાય છે.
જે મિત્રોને પરસ્પર જેવી સહૃદયતા ભાવ હોય છે,
તેવો ભાવ જગતના બધા જીવો પ્રત્યે કેળવવો.
જીવત્વના નાતે સર્વ જીવો એક છે, માટે કોઈ પણ
જીવ પ્રત્યે દ્વેષ કે ઉદાસીનતાની લાગણી રાખવી,
એ હકીકતમાં પોતાના જીવ પ્રત્યે જ દ્વેષ વા
ઉદાસીનતાભાવ રાખવા બરાબર છે.
જડના રાગના કારણે જીવ પ્રત્યે દ્વેષ જન્મે છે
અને પિંડ પ્રત્યેના અધિક વ્યામોહના કારણે પર પ્રત્યે
ઉદાસીનતાનો ભાવ જન્મે છે. આ બંને મહાદોષોને
દૂર કરવા માટે મૈત્રીભાવ એ રામબાણ ઔષધ છે.
એટલે જો પોતાના આત્માના હિત બનવું હોય,
તો અહીં જગતના સર્વ જીવો પ્રત્યે
મૈત્રીપૂર્ણ ભાવ દાખવવો, તે અત્યંત જરૂરી છે.

ॐ

પાઠ શ્રી ઋષભદેવ - સ્વામિ - પ્રસાદાત્

સ્થળ: દેલવાડા, આબુ, વૈ. સુદ ૧, સં. ૨૦૨૭

(૧) જીવોનો પરસ્પર ઉપગ્રહ (ઉપકાર)

परस्परोपग्रहो जीवानाम् । - अ० ५, सू० २१ (पृ - २२५)

तत्त्वार्थसूत्र (हारिभद्रीय टीका)

'अन्योऽन्योपग्रहो जीवानामुपकार इति सूत्रसमुदायार्थः ।
अवयवार्थस्त्वाह - परस्परस्य अन्योऽन्यं
हिताहितोपदेशाभ्यामिति हितप्रतिपादनेन
अहितप्रतिषेधेन च उपग्रहो जीवानामिति ।
तथाऽन्योन्याश्रिता हिताहितनिमित्तता जीवानां प्रयोजनमिति ।
प्राग् उपयोगो लक्षणमित्युक्तं असाधारणं, (अ) तत्र
साधारणा च निमित्ततेति न सूत्रान्तरोपन्यासे दोषः ।'

- श्री हरिभद्रसूरि टीका पृ - २२५

(२) परस्पर शब्दः कर्मव्यतिहारे वर्तते,
कर्मव्यतिहारश्च क्रियाव्यतिहारः ।
परस्परस्योपग्रहः परस्परोपग्रहः ।
जीवानामुपकारः । कः पुनरसौ ? स्वामी भृत्यः,
आचार्यः शिष्यः इत्येवमादिभावेनवृत्तिः परस्परोपग्रहः ।
स्वामी तावद्वित्तत्यागादिना भृत्यानामुपकारे वर्त्तते ।

गुरुश्च हितप्रतिपादनेनाहितप्रतिषेधनेन च ।
आचार्य उभयलोक-फलप्रदोपदर्शनेन तदुपदेश-
विहित क्रियानुष्ठापनेन च शिष्याणामनुग्रहे वर्तते ।
शिष्या अपि तदनुकूलवृत्त्या आचार्याणाम् ।
उपकाराधिकारे पुनरुपग्रह-वचनम् किमर्थं ?
पूर्वोक्तसुखादि चतुष्टयप्रदर्शनार्थं पुनरुपग्रहवचनं क्रियते।
सुखादीन्यपि जीवानां जीवकृत-उपकार इति ।
पूज्यपादापरनाम श्री देवनन्द्याचार्यरचिता
सर्वार्थसिद्धिः टीका ।

(२) सूत्रम् - परस्परोपग्रहो जीवानाम् ।
भाष्य - परस्परस्य हिताहितोपदेशाभ्यां
उपग्रहो जीवानामिति ।
टीका - परस्पर शब्दः कर्मव्यतिहार विषयः ।
अन्योऽन्योपग्रहो जीवानामुपकारः ।
जीवाः परस्पर हिताहितोपदेशादावित्येन अनुगृह्णन्ति
न तु एवं पुद्गलाः । अथवा सुखादीनां एकैकोऽपि
अनुग्राहको जन्तोर्भवति समुपजातः, इह तु पुनः
उपग्रहणाणोपग्राहकयोः परस्परेण स्त्रीपुंसवदनुग्रहे
यौगपद्यार्थं पुनः उपग्रहवचनं प्रतिपत्तव्यं ।

ॐ

जीवानां उपदेशस्य मुख्यत्वेन उपकारकत्वात् ग्रहणं,
न तथा प्राणिनो वित्तादिभिः उपकुर्वन्ति यथोपदेशेन इति।
अहितोपदेशोऽहितानुष्ठानं वा कथमुपकारः ?
न उपकारवचनस्य निमित्तार्थत्वात् अन्यथा हि इष्टोपग्रह
एव उपकारः स्यात्, न अनिष्टोपग्रह इति अव्यापिता
(स्यात्) भवेत्। ननु जीवानां उक्तं लक्षणं उपयोग इति
किं पुनरारंभेण ? नैतत्, तदस्ति अन्तरंगं लक्षणं इदं
तु बहिरंगं, एवं तर्हि धर्मादि-त्रयस्य लक्षणं नाऽस्ति।
अत्र उच्यते गति-स्थिति-अवगाहना-स्वाभाव्यात्।
यो हि अत्र असाधारणो धर्म स एव तस्य लक्षणं इति
शब्दो अधिकार-समाप्त्यर्थ इति। - श्री सिद्धसेनीय टीका

(४) मैत्र्यादि

इच्छा तु जन्मान्तरे सुरजन्मनि तीर्थकरजन्मनि च
दुःखपङ्कमग्नस्य जगत उद्दिधीर्षातिशयवती ॥१॥
- योगशास्त्र, पृ० २९८, पं० १

तत्र समस्त-सत्त्व-विषयः स्नेहपरिणामो मैत्री। नयन-
वंदन-प्रसादादि निर्गुणादिकेष्वभिव्यज्यमानान्तर्भक्तिरनु-
रागः प्रमोदः दीनादिष्वनुकम्पा करुणा। अरागद्वेष-भावो
माध्यस्थ्यमिति। - धर्मसंग्रहे, पू-उपा० श्री यशोविजयगणी

ॐ

## (૫) અનશનમાં પુંડરીકની આરાધના

कृत-पंचनमस्कारो, भावसारं मुहुर्मुहुः ।
स दत्तालोचनः सम्यक्, सिद्धनाथादि चेतसि ॥ १४५ ॥
प्रणिधानं महाभागः, कारणं धर्मशुक्लयोः ।
ध्यानयोस्तीव्रसंवेगश्चकारेत्थं विशुद्धधीः ॥ १४६ ॥
० क्षाम्यन्तु सर्वसत्त्वा मे, क्षान्तिर्मे सर्वजन्तुषु ।
निर्वैरः साम्प्रतं शान्तः, क्षेत्रस्थो मम वर्त्तते ॥ १४९ ॥
निवृत्तः सर्वकार्येऽहं, मनोजालनिरोधकः ।
बन्धुः समस्तभूतानां, स्नुवत्सर्वदोषिताम् ॥ १५३ ॥
० भव-प्रपंचविरतो, मोक्षैकगतचेतसा ।
समर्पितो मयाऽऽत्मैष, जिनानां जन्मनाशिनाम् ॥ १५७ ॥
तत एव महात्मानः सद्भावार्पित-चेतसः ।
स्वशक्त्याऽशेष-कर्मांशच्छेदं कुर्वन्तु मेऽधुना ॥ १५८ ॥

- उपमिति पृ-११०

## પુંડરીક આરાધના

स्थितः सामायिके शुद्धे, सर्वयोग निरोधिनि ।
व्युत्सृष्टचेष्टं मां सिद्धाः, पश्यन्तु परमेश्वराः ॥ १५४ ॥
सर्वोपाधि - विशुद्धोऽहं, ममेदमधुना गतिः ।
साक्षात्केवलिनस्तत्त्वं, भगवन्तो विजानते ॥ १५६ ॥

(६) ध्यानशक्ति

वीतरागोऽप्ययं देवो ध्यायमानो मुमुक्षुभिः ।
स्वर्गापवर्गफलदः शक्तिस्तस्य हि तादृशी ॥१२९॥

- तत्त्वानुशासनग्रन्थे श्री नागसेनाचार्य-विरचिते

श्री बृहत्कल्प सूत्र

(७) अनेकविध धर्मनुं स्वरूप

अथैकव्याकरणेन द्विधा धर्मोऽभिधीयते तथा दर्शयति -
जं इच्छसि अप्पणतो, जं च ण इच्छसि अप्पणतो ।
तं इच्छ परस्स वि य, एत्तियगं जिणसासणयं ॥४५८४॥
यद् आत्मनः स्वजीवस्य सुखादिकमिच्छसि यच्च दुःखादि-कमात्मनो नेच्छसि तत् 'परस्यापि' आत्म व्यतिरिक्तस्य जन्तोः इच्छ आत्मवत् परमपि पश्येति भावः ।
'एतावद्जिनशासनं' इयन्मात्रो जिनोपदेश इति ॥४५८४॥

- गाथया पुनरित्थं धर्म उपदिश्यते

(८) सव्वारंभ - परिग्गहणिक्खेवो सव्वभूतसमया य ।
एक्कग्गमणसमाहाणया य अह एत्तिओ मोक्खो ॥४५८५॥
सर्वस्य - सूक्ष्म - बादरादिभेदजीवविषयस्यारम्भस्य सर्वस्य च - सचित्ता - ऽचित्त - मिश्रभेदभिन्नस्य परिग्रहस्य यो निक्षेपः - संन्यासो यः च सर्वभूतेषु समता या

चैकाग्रमनः समाधानता 'अथ' एष एतावान् मोक्ष उच्यते,
कारणे कार्योपचारात् एष मोक्षोपाय इत्यर्थः ॥४५८५॥
- श्लोकेन दश

(९) सव्वभूयऽप्पभूयस्स, सम्मं भूयाई पासओ ।
पिहियासवस्स दंतस्स, पावं कम्मं न बंधई ॥४५८६॥

अथ किं कारणं स्थित्वा धर्मः कथनीयः ? - इत्याशङ्क्याह

(१०) इरियावहियाऽवण्णो सिद्धंपि न गिण्हए अतो ठिच्चा ।
अद्दिट्ठी पडिणीए अभिओगो चउण्ह वि परेण ॥४५८९॥

यत्र प्राणिवधो नास्ति, यत्र सत्यमनिन्दितम् ।
यत्रात्मनिग्रहो दृष्टः स धर्मो मम रोचते ॥१॥
- टीकायां श्री बृहत्कल्प सूत्रे, पृ० १२३७-८

(११) संवेग - निर्वेद

समणेण कहेयव्वा तव नियमकहा विराग संजुत्ता ।
जं सोऊण मणुस्सो वच्चइ संवेग निव्वेयं ॥४५८९॥

संवेगः मोक्षाभिलाषः, निर्वेदः संसारवैराग्यम् । पृ० १२३९

(१२) परीषह (द्रव्य - भाव)

इह सर्वोऽपि संसारमध्यमध्यासीनेन जन्तुना नारक - तिर्यग्-नरामरगति-निबन्धन-विविध-शारीरमानसानेक दुःखोपनिपात पीडितेन पीडानिर्वेदतः संसारपरिजिहीर्षया

ॐ

जन्मजरामरणरोगशोकाद्य - शेषोपद्रवासंस्पृष्ट
परमानन्दरूप निःश्रेयसपदमधिरोढुकामेन तदवाप्तये
स्वपर-समय-ज्ञानसमुद्रे स्वपरोपकाराय यतितव्यम्,
तत्राऽपि महत्याशय-विशुद्धौ परोपकृतिः कर्तुं शक्यते
इत्याशय - विशुद्धि - प्रकर्षसम्पादनाय
विशेषतः परोपकारे यत्न आस्थेयः,
परोपकारश्च द्वेधा - द्रव्यतो भावतश्च,
तत्र द्रव्यतो विविधान्न-पानकाञ्चनादि-प्रदानजनितः,
स च नैकान्तिकः, कदाचित्ततो विसूचिकादि-
दोष - संभवतः उपकारासंभवात्,
नाप्यात्यन्तिकः कियत्काल - मात्र भावित्वात् ।
भावतो जिनप्रणीतधर्म-सम्पादनजनितः, स चैकान्तिकः,
कदाचिदपि ततो दोषासंभवात्, आत्यन्तिकश्च,
परम्परया शाश्वतिकमोक्ष - सौख्य - सम्पादकत्वात् ।
जिन-प्रणीतोऽपि च धर्मो द्विधा - श्रुतधर्मश्चारित्रधर्मश्च ।
तत्र श्रुतधर्मः स्वाध्यायः,
चारित्रधर्मः क्षान्त्यादिरूपोदशधाश्रमणधर्म,
उक्तं च - सुए धम्मे सज्झाओ चरित्तधम्मे
समणधम्मे । - श्री नंदीसूत्र टीका, पृ० १-२

ॐ

(१३) परस्परोपग्रहो जीवानाम्

जीवानामुपकारः स्यात् परस्परमुपग्रहः ।
सन्तानान्तरवद् भावाद् व्यापारादिवतोऽन्यथा ॥ १ ॥

सन्तानान्तरभाजो हि जीवाः परस्परं असंविदात्मानः
कार्यतोऽनुमेयाः स्युर्न पुनरैक्यभाजः
तत् च कार्यं (कर्म) परस्परमुपग्रहः ।
स च व्यापारादिरालिंगनादि वाहनादिनिर्व्यापारः ।
अनुनयनम् हितप्रतिपादनादि - व्यवहारः ।
स च परस्परोपलम्भनात - सन्तानान्तरत्वम् साधयति
इति तदनुमेयाः सन्तानान्तर - भाजो जीवाः परस्परम्,
संवृत्या संतानान्तरव्यवहार इति अयुक्तं पुरुषाद्वैतवादस्य
पूर्वमेव निरस्तत्वात् संवेदनाद्वैतवादवत् ।

- तत्त्वार्थ श्लोक वार्तिक टीका

(१४) नवविध क्षायिक भाव

ये: क्षायिकभावो नवविध उद्दिष्टस्तस्य
भेद - स्वरूप - प्रतिपादनार्थमाह -
ज्ञानदर्शनदानलाभभोगोपभोगवीर्याणि च ॥ २ - ४

टीका - च शब्दः सम्यक्त्व - चारित्रानुकर्षणार्थः ।
ज्ञानावरणस्यात्यन्तक्षयात् केवलज्ञानं क्षायिकं तथा
केवलदर्शनम् ।

दानान्तरायस्यात्यन्तक्षयादनन्तप्राणिगणानुग्रहकरं
क्षायिकमभयदानं । xxx वीर्यान्तरायस्य कर्मणोऽत्यन्त-
क्षयादाविर्भूतमनन्तवीर्यं क्षायिकम् ।
पूर्वोक्तानां सप्तानां प्रकृतीनामत्यन्तक्षयात् क्षायिकं -
सम्यक्त्वम् । चारित्रमपि तथा । यदि क्षायिकदानादि
भावकृतमभयदानादि सिद्धेष्वपि तत्प्रसंगः ? नैष दोषः,
शरीरनाम - तीर्थकरनाम - कर्मोदयाद्यपेक्षत्वात्तेषां
तदभावे तदप्रसंगः । कथं तर्हि तेषां सिद्धेषु वृत्तिः ?
परमानन्तवीर्याव्याबाधसुख - रूपेणैव तेषां तत्र वृत्तिः ।
केवलज्ञान - रूपेणानन्त - वीर्यवृत्तिवत् ॥
- सर्वार्थसिद्धिः टीका

(१५) भगवदनुग्रह

अथ तत्र पुरे राजा सुस्थितो नाम विश्रुतः ।
समस्त - सत्त्व - संघस्य स्वभावादतिवत्सलः ॥ १ ॥
अटाट्यमानोऽसौ रंकः संप्राप्तस्तस्य मन्दिरम् ।
स्वकर्मविवरो नाम तत्रास्ते द्वारपालकः ॥ २ ॥
सद्द्वारपालस्तं रोरं दृष्ट्वाऽतिकरुणास्पदम् ।
प्रावेशयत् कृपालुत्वादपूर्वं राजमन्दिरम् ॥ ३ ॥
- उपमिति प्रथम प्रस्तावे, श्लोक १३८-९-४०

(१६) भगवद् अनुग्रहः — - उपमिति श्लो० २३४-५-६

अन्येऽस्मात् सद्मनो बाह्याः सन्त्यास्मिंस्तिष्ठन्ति दुःखिताः
तेषु नैवादरोऽस्माकं, न ते राजाऽवलोकिताः ॥१॥
यतस्त्वं भवनं दृष्ट्वा मनागाह्लादितो हृदि ।
तवोपरि नरेन्द्रस्य दयाऽस्तीति गम्यते ॥२॥
प्रिये प्रियं सदा कुर्युः स्वामिनः सेवका इति ।
यो न्यायस्तद्विधानार्थं वयं त्वयि दयालवः ॥३॥

(१७) तत्राऽसौ स्वभावतया समस्तभूत संघाताऽत्यन्त-वत्सलहृदयः प्रख्यातकीर्तिः तस्मिन्नगरे सुस्थिताभिधानो महानरेन्द्रो दर्शितः, स इह परमात्मा जिनेश्वरो भगवान् सर्वज्ञो विज्ञेयः । (प्रत पृ-४३१) - उपमितौ पृ० ४३

(१८) मार्गानुसारिताभिप्राय

भव्यस्य प्रत्यासन्न-भविष्यद् भद्रस्य कथंचिदुपलब्ध सर्वज्ञ-शासनमविदित-तद्गुणविशेषस्यापि मार्गानुसारितया भवत्येवंविधोऽभिप्रायः, यदुत-

अत्यद्भुतं इदं अर्हद्दर्शनं,
यतोऽत्र तिष्ठन्ति ये लोकास्ते सर्वेऽपि सुहृद इव,
बान्धवा इव, एक-प्रयोजना इव,
समर्पित-हृदया इव, एकात्मका इव परस्परं वर्तन्ते,

तथा अमृततृप्ता इव, निरुद्वेगा इव, निरौत्सुक्या इव,
सोत्साहा इव, परिपूर्ण-मनोरथा इव समस्तजंतु-
संघातहितोद्यत-चेतसश्च सकलकालं दृश्यन्ते।

- उपमितौ, पृ० ५१ प्रताकार

(१९) भगवदनुग्रह

यदा अयमात्मा निजभव्यतादि-परिपाकवशादेतावतीं कोटिमधिरूढो भवति तदा अस्य भवत्येव भगवदनुग्रहः। न तद्व्यतिरेकेण एषा मार्गानुसारिता संपद्यते, तदनुग्रहेणैव भवति भावतो भगवति बहुमानो, नाऽन्यथा, स्वकर्मक्षयोपशमादीनां शेषहेतूनां अप्रधानत्वात्, ततोऽयमात्मा तस्यामवस्थायां वर्तमानोऽमुनर्थ आकलय्य भगवता विशेषेण अवलोकित इति उच्यते। स एव परमेश्वरोऽचिन्त्यशक्तियुक्ततया परमार्थ करणैकतानतया चास्य जीवस्य मोक्षमार्ग प्रवृत्तेः परमो हेतुरित्युक्तं भवति, समस्त जगदनुग्रहप्रवणं हि भगवतो निष्कलमपि रूपमिति परिभावनीयं, केवलं तथापि जीवभव्यतां कर्मकालस्वभाव नियत्यादिकं च सहकारिकारणकलापमपेक्ष्य जगदनुग्रहे व्याप्रियते, तेन न यौगपद्येन समस्तप्राणिनां संसारोत्तार इति

ॐ

आलोचनीयमेतदागमानुसारेणेति, तस्माद् भवत्येव
भविकल्याणस्य भद्रकभावे वर्तमानस्यास्य जीवस्य
भगवदवलोकना । - उपमिति, प्रत पृ० ५३

(२०) न तावत्सुन्दरा मनोवाक्कायप्रवृत्तिः सद्धर्मसाधिका
भगवदनुग्रह व्यतिरेकेण कस्यचित्संपद्यते ।
- उपमिति, प्रत पृ० ५४

(२१) मैत्र्यादि : वचनाद्यदनुष्ठानमविरुद्धाद्यथोदितम् ।
मैत्र्यादिभाव - संयुक्तं, तद्धर्म इति कीर्त्यते ॥ १ ॥
- श्री धर्मबिन्दौ, श्लोक २, अ० १

(२२) समस्तभूतसंघाताऽत्यन्त - वत्सल - हृदयः । पृ० ४३

(२३) स एव भगवान् समस्त-भूत-संघातस्यापि सूक्ष्म-रक्षणोपदेश दायितयाऽक्षेपेण मोक्ष-प्रापण-प्रवणप्रवचनार्थ-प्रणेतृतया च स्वभावेनैवाऽति - वत्सल - हृदयः । पृ० ४४

(२४) रागद्वेष - मोहाद्याकुलित - चित्ता यद्यपि यति-श्रावकादिचिह्नाः क्वचिद् भवन्ति तथापि ते सर्वज्ञ-शासनाद् बहिर्भूताः द्रष्टव्याः इत्युक्तं भवति ।
ततश्चाऽयं जीवः तेन स्वकर्मविवरद्वारपालेन तावतीं भुवं प्राप्तो ग्रन्थिभेद द्वारेण सर्वज्ञशासनमंदिरे प्रवेशित इति उक्तमभिधीयते । पृ० ४४ - श्री उपमितौ

ॐ

(२५) सततमसातसंततिजम्बालमग्नसत्त्वोऽयं जीवो ह्रियमाणोऽत्यन्तमात्मीभूत-प्रशमसुखरसानां भगवतां सत्साधूनां भवत्येव कृपास्थानं, क्लिश्यमानेषु सकल-कालं करुणाभावना-भावितचित्तत्वात् तेषाम्। पृ० ३२

न च दानादि-संपादनं विहायाऽन्यैः परमार्थतः परोपकारः संभवति, अवाप्त-सन्मार्गेण च पुरुषेण जन्मान्तरेऽपि तस्याऽविच्छेदनमभिलषता परोपकार-करणपरेण-भवितव्यं, तस्यैव पुरुषगुणोत्कर्षविर्भावकत्वात्, यतः-परोपकारः सम्यक् क्रियमाणो धीरतामभिवर्द्धयति, दीनतामपकर्षति, उदारचित्ततां विधत्ते, आत्मंभरितां मोचयति, चेतोवैमल्यं वितनुते, प्रभुत्वमाविर्भावयति।

ततोऽसौ प्रादुर्भूत-जीव-वीर्योल्लासः, प्रणष्ट-रजोमोहः परोपकारकरण-परः पुरुषः जन्मान्तरेष्वपि उत्तरोत्तर-क्रमेण चारुतरं सन्मार्ग-विशेषमासादयति, न पुनः ततः प्रतिपतति।

- श्री उपमितिभव प्रपंचायाम्।

° 'गुरुआणा - चलणा - सेवा
न निष्फला होइ कइयावि।'

ॐ

(२६) सम्यग्दर्शन स्वरूप

ततः संक्षेपेण प्रधानावस्थोचितमस्य पुरतो धर्मगुरवः सम्यग्दर्शन स्वरूपं वर्णयेयुः, यथा - भद्र ! यो रागद्वेष मोहादिरहितोऽनन्त - ज्ञानदर्शनवीर्यानन्दात्मकः समस्तजगदनुग्रहप्रवणः सकल - निष्कलरूपः परमात्मा स एव परमार्थतो देव इति बुद्ध्यातस्योपरि दृढ़भक्तिकरणं, तथा तेनैव भाषिता ये जीवाजीवपुण्यपापाश्रव - संवर - निर्जराबन्ध - मोक्षाख्या नव पदार्थाः ते अवितथा एवेति या प्रतिपत्तिः, तथा तदुपदिष्टे ज्ञानदर्शनचारित्रात्मके मोक्षमार्गे ये प्रवर्तन्ते साधवः त एव गुरवो वन्दनीया इति या बुद्धिस्तत्सम्यग्दर्शनं।

(२७) मैत्र्यादि भावो

मित्रं मिद्यति इति मित्रं स्निह्यतीत्यर्थः। तस्य भावः समस्त सत्वविषयः स्नेहपरिणामो मैत्री। येऽपि कृतापकाराः प्राणिनः प्रमादात् अन्यथा वा तेष्वपि मित्रतां चेतसि सन्निवेशय मित्रमहमेतेषां एते च मे मित्राणि इति तत्कथमहं मित्रद्रोहितां प्रतिपत्स्ये ? दौर्जन्यमयं हि मित्रद्रोहित्वं, अतः क्षमेऽहं सर्वसत्वानामिति क्षमां भावयेत्।

सम्यक् मनोवाक्कायैः सहेऽहं सर्वसत्त्वानाम् ।
एवं हि मित्रता देहार्थत्वानास्यदरति ।
येषां च मया अपकारः कृतः तान्
अपि सत्त्वान् क्षमयेऽहं मित्रत्वात् ।
क्षमये इति क्षमां ग्राहयामि सर्वान्
प्राणिनः प्रशस्तेन चेतसा ।
स्वचेतसश्च कालुष्यं अपनेयं इत्येवं क्षपनयेस्तंत्रे ।
परस्तु क्षमेत वा न वा
इत्येतदेव स्पष्टतरं विवृणोति, मैत्री मे सर्व सत्त्वेषु,
वैरं मम न केनचित् इति ।
- तत्त्वार्थ, अ० ७, सू० ६ सिद्धसेनीय टीका

(२८) परेषां दुःखानुत्पत्त्यभिलाषो मैत्री ।
वदन-प्रसादादिभिः अभिव्यज्यमानान्तर्भक्तिरागः प्रमोदः ।
दीनानुग्रहभावः कारुण्यं ।
रागद्वेषपूर्वक - पक्षपाताभावो माध्यस्थ्यं ।
सर्वसत्त्वेषु मैत्री, गुणाधिकेषु प्रमोदः,
क्लिश्यमानेषु कारुण्यं, अविनेयेषु माध्यस्थ्यमिति ।
एवं भावयतः पूर्णानि अहिंसादीनि व्रतानि भवन्ति ।
- तत्त्वार्थ - सर्वार्थसिद्धिः टीका

(૨૯) **મૈત્ર્યાદિ**

પરેષાં દુઃખાનુત્પત્ત્યભિલાષો મૈત્રી | સ્વકાયવાઙ્મનોભિઃ
કૃતકારિતાનુમતવિશેષણૈઃ પરેષાં દુઃખાનુત્પત્તૌ અભિલાષઃ
મિત્રસ્ય ભાવઃ કર્મ વા મૈત્રી | - તત્ત્વાર્થ રાજવાર્તિક ટીકા
(શ્લોકવાર્તિક ટીકામાં પણ લગભગ આ પ્રમાણે છે.)

(૩૦) **ભગવદનુગ્રહ**

તસ્ય ચ સિદ્ધસ્ય ભગવત ઈશ્વરસ્યાનુગ્રહોઽપિ
યોગિનોઽપુનર્બન્ધકાદ્યવસ્થોચિત-સદાચાર-લાભ એવ,
ન તુ અનુજિઘૃક્ષારૂપસ્તસ્ય રાગરૂપત્વાત્,
તસ્ય ચ દ્વેષ સહચરિતત્વાત્,
રાગદ્વેષવતશ્ચેતરવદ્ નારાધ્યત્વાદિતિ સંક્ષેપઃ |
- ઉ. શ્રી યશોવિ. વિરચિત પાતંજલયોગસૂત્ર વૃત્તિ, સૂ. ૧/૨૫

(૩૧) **શ્રી લલિત વિસ્તરા**

ધમ્મદયાણમિત્યાદિ સૂત્ર પઞ્ચકં ઇહ ધર્મઃ ચારિત્રધર્મઃ
પરિગૃહ્યતે, સ ચ શ્રાવકસાધુધર્મભેદેન દ્વિધા,
શ્રાવકધર્મોઽણુવ્રતાદ્યુપાસકપ્રતિમાગત - ક્રિયાસાધ્યઃ
સાધુધર્માભિલાષાશયરૂપઃ આત્મપરિણામઃ,
સાધુધર્મઃ પુનઃ સામાયિકાદિગત - વિશુદ્ધક્રિયાઽભિવ્યઙ્ગ્યઃ
સકલસત્ત્વહિતાશયાઽમૃત - લક્ષણઃ સ્વપરિણામ એવ

क्षायोपशमिकादि - भावस्वरूपत्वाद्धर्मस्य,
नाऽयं भगवदनुग्रहमन्तरेण, विचित्रहेतुप्रभवत्वेऽपि
महानुभावतयाऽस्यैव प्राधान्यात्, भवत्यैवेतदासन्नस्य
भगवति बहुमानः, ततो हि सद्देशना योग्यता, ततः पुनरयं
नियोगतः इत्युभय तत्स्वभावतया तदाधिपत्यसिद्धेः,
कारणे कार्योपचारादर्थं ददतीति धर्मदाः ।

पञ्जिका - न - नैवायम् - उक्तरूपो धर्मो भगवदनुग्रहं
सहकारिकारणमन्तरेण - विना, कुत इत्याह - विचित्रहेतु-
प्रभवत्वेऽपि विचित्राः - स्वयोग्यता गुरुसंयोगादयो
हेतवः, प्रभवो - जन्मस्थानं यस्य तद्भावस्तत्त्वं
तस्मिन्नपि धर्मस्य महानुभावतया अचिन्त्यशक्तितया
अस्यैव - भगवदनुग्रहस्य हेतुषु प्राधान्यात् - मुख्यतया,
तदेव भावयति - भवत्येव, न न भवति एतदासन्नस्य
भगवति परम गुरौ बहुमानो भवनिर्वेदरूपः ततो भगवद्ब
-हुमानात् हि स्फुटम् सद्देशना योग्यता सद्देशनाया
वक्ष्यमाणरूपाया योग्यता - उचितत्वं, ततः सद्देशना
योग्यतायाः पुनरयं धर्मो नियोगतः अवश्यंतया इति
एवं परम्परया उभयतत्स्वभावतया उभयस्य
भगवद्बहुमान - प्रकृतधर्मलक्षणस्य तत्स्वभावतया -
कार्यकारण - स्वभावतया तदाधिपत्यसिद्धेः तस्य -

ભગવદ્બહુમાનસ્ય મહાનુભાવતયાऽધિકૃત - ધર્મહેતુષુ
પ્રધાનભાવ - સિદ્ધેઃ, કારણે સદ્દેશના યોગ્યતાયાં કાર્યસ્ય
ધર્મસ્ય ઉપચારાત્ અધ્યારોપાદ્ ધર્મં દદતીતિ ધર્મદાઃ ।

- લલિતવિસ્તરા, પૃ. ૪૬/૪૭

(૩૨) ક્ષમા એ પ્રસન્નતાનું મૂળ છે.

ખંતિએ વિપ્પસીએજ્જા મેહાવી, તહાભૂએણ અપ્પણા ।

- ઉત્તરાધ્યયન, અધ્યા. ૫, ગાથા ૩૦

ટીકાઃ ક્ષાન્ત્યા કરણભૂતયા વિપ્રસીદેત્ પ્રસન્નતામ્ ભજેત્ ।
તથાભૂતેન યથૈવ મરણકાલાત્ પ્રાક્ અનાકુલચેતા
અભૂત્ મરણકાલેऽપિ તથાવસ્થિતેન આત્મના ઉપલક્ષિતઃ ।

ક્ષમા એ પ્રસન્નતાનું સાધન છે.

(૩૩) સમ્યક્ત્વનાં ભૂષણ - દૂષણ

તથાસ્થિરતા, ભગવદાયતનસેવા, આગમકુશલતા, ભક્તિઃ,
પ્રવચનપ્રભાવના ઇત્યેતે પઞ્ચભાવાઃ સમ્યગ્દર્શનં
દીપયન્તિ, તથા શંકાકાંક્ષાવિચિકિત્સા - પરપાષણ્ડ
પ્રશંસા - સંસ્તવશ્ચૈતે તુ તદ્દેવ દૂષયન્તિ, તદેષ સકલ-
કલ્યાણાવહો દર્શનમોહનીયકર્મ ક્ષયોપશમાદિનાऽऽવિર્ભૂતઃ
સ્વચ્છાત્મપરિણામ એવ વિશુદ્ધસમ્યગ્ દર્શનમભિધીયતે ।

- ઉપમિતિ, પીઠબંધ, પૃ. ૧૩

ॐ

(૩૪) સમ્યક્ત્વ સ્વરૂપ અને લિંગ

तदिदमाकर्ण्य स जीवोऽभिदधीत - भगवन् !
इतौ तावदर्थकामौ साक्षादुपलभ्येते, योऽयं
पुनर्भगवद्भिर्धर्मो वर्णितः स नाऽस्माभिः क्वचिद्दृष्टः,
ततो निदर्श्यतामस्य तत्स्वरूपमिति ततो धर्मसूरिरा-
चक्षीत, भद्र ! मोहान्धाः खल्वेनं न पश्यन्ति, -पृ० ९२
લિંગ: तत्पुनर्जीवे वर्तमानं प्रशमसंवेगनिर्वेदानुकम्पा-
स्तिक्याभिव्यक्तिलक्षणैर्बाह्यलिङ्गैर्लक्ष्यते, तथा तदंगीकृत्य
जीवेन सत्त्वगुणाधिकक्लिश्यमानाऽविनेयेषु मैत्रीप्रमोद-
कारुण्यमाध्यस्थ्यानि समाचरणीयानि भवन्ति । पृ० ९३

(૩૫) સમ્યક્ત્વ સ્વરૂપ ॐ ઉપમિતિ પીઠબન્ધ પૃ० ७२

स ब्रूयात् - किं पुनस्तत्सदनुष्ठानम् — ततः
सद्धर्मसूरयोऽभिदधीरन् - सौम्य ! साधुधर्मो गृहिधर्मश्च,
तस्य पुनर्द्विविधस्याऽपि मूलं सम्यग् दर्शनं । ततोऽयं
जीवोवदेत् - भगवन् । उपदिष्टमासीदेतत्सम्यग्दर्शनं
प्राग्भवता, किन्तु तदा मयानाऽवधारितं, तदधुनाकथ्यत
-किमस्य स्वरूपमिति ? — उत्तरा० अध्याय ६, गाथा २

अप्पणा सच्चमेसेज्जा, मेत्तिं भूएहिं कप्पए ।

टीका - 'आत्मना' 'सत्यं' — जीवेभ्यो हितः संयमः
तं एषयेत् । 'कप्पए' कुर्यात् ।

## (૩૬) સમ્યક્ત્વનું સ્વરૂપ (શ્લોક ૩૬ તથા ૩૭)

विवेकिनां पुनः प्रत्यक्ष एव धर्मः, तथाहि - सामान्येन तावद्धर्मस्य त्रीण्येव रूपाणि द्रष्टव्यानि भवन्ति, तद्यथा - कारणं स्वभावः कार्यं च, तत्र सदनुष्ठानं धर्मस्य कारणं, तद् दृश्यत एव, स्वभावः पुनर्द्विविधः - साश्रवोऽनाश्रवश्च, तत्र साश्रवो जीवे शुभपरमाणूपचयरूपः, अनाश्रवस्तु पूर्वोपचितकर्मपरमाणु विलय मात्र लक्षणः, स एष द्विविधोऽपि धर्मस्वभावो योगिभिर्दृश्यते, अस्मादृशैरप्यनुमानेन दृश्यत एव, कार्यं पुनर्धर्मस्य यावन्तो जीवगताः सुन्दरविशेषाः तेऽपि प्रतिप्राणि - प्रसिद्धत्वात् परिस्फुटतरं दृश्यन्त एव, तदिदं कारणस्वभावकार्यरूपत्रयं पश्यता धर्मस्य किं न दृष्टं भवता ? येनोच्यते न दृष्टो मया धर्म इति, यस्मादेतदेव त्रयं धर्मध्वनिनाऽभिधीयते, केवलमेष विशेषो यदुत - सदनुष्ठानं कारणे कार्योपचाराद्धर्म इत्युच्यते, यथा तन्दुलान् वर्षति पर्जन्य इति। स्वभावस्तु।

(३७) यः साश्रवो निगदितः स पुण्यानुबन्धिपुण्यरूपो विज्ञेयः, यः पुनरनाश्रवः स निर्जरात्मको मन्तव्यः, स एष द्विविधोऽपि स्वभावो निरुपचरितः साक्षाद्धर्म एवाभिधीयते,

ये त्वया जीववर्तिनः समस्ता अपि सुन्दरविशेषाः
ते कार्यकारणोपचाराद्धर्मशब्देन गीयन्ते, येषां ममेदं
शरीरं पुराणं करोति। ततः पुनरेष जीवो ब्रूयात्-भगवन्!
अत्र त्रये कतमत्पुनः पुरुषेणोपादेयं भवति?
ततो धर्मगुरुरभिदधीत - भद्र!
सदनुष्ठानमेव, तस्यैवेतरद्वयसम्पादकत्वात्।
(૩૬ તથા ૩૭ નંબરમાં) - ઉપમિતિ પીઠબન્ધઃ, પૃ૦ ૯૨

(૩૮) વિમલને પ્રતિમાદર્શનથી જાતિસ્મરણ અને પૂર્વભવમાં શુભ વિચારો અને વર્તન કર્યાં હતાં, તેનું વર્ણન.

आत्मीभूता मे समस्तभूतेषु मैत्री, गतोऽङ्गाङ्गीभावं गुणाधिकेषु प्रमोदः, धारितं बहुशश्चित्ते क्लिश्यमानेषु कारुण्यं, दृढीभूता दुर्विनीतेषूपेक्षा। - ઉપમિતિ પ્રસ્તાવ ૫, પૃ૦ ૪૮૬

પૃ૦ ૪૮૬ની ૮મી પંક્તિથી ૪૮૭ની ૩જી પંક્તિ સુધી વિમલની ભાવનાઓનું વર્ણન છે.

(૩૯) આત્મસમદર્શિત્વ

अज्झत्थं सव्वओ सव्वं, दिस्स पाणे पियायए।
न हणे पाणिणो पाणे भयवेराओ उवरए॥

ટીકાગત અર્થ: સર્વ આત્માઓને સુખ પ્રિય છે, દુઃખ અપ્રિય છે. પોતાનો આત્મા સૌને પ્રિય છે.

ॐ

સમ જગતને લઈ અને વૈરથી
ઉપરત થતો ભિક્ષુ કોઈની હિંસા ન કરે.

સ્ફુરિત અર્થ : સહુને સ્વાત્મા પ્રિય છે, એથી સહુને સર્વ રીતે સ્વાત્માવત્ સ્વાત્મામાં જોઈને વર્તવું.

(૪૦) अभयदयाणमित्यादि सूत्रपंचकम् xxx
अतोऽस्य गुणप्रकर्षरूपत्वात्, अचिन्त्य-शक्तियुक्तत्वात्, तथाभावेनावस्थितेः सर्वथा परार्थकरणात् भगवद्भ्य एव सिद्धिरिति तदित्थंभूतमभयं ददतीत्यभयदाः ।

पञ्जिका: अत्र चत्वारः परम्पराफलभूता हेतवो गुणप्रकर्ष-रूपत्वाचिन्त्य-शक्तियुक्तत्व-तथाभावावस्थित सर्वथा परार्थकरणलक्षणाः, तथाहि भगवतां गुणप्रकर्ष-पूर्वकमचिन्त्यशक्तियुक्तत्वं, गुणप्रकर्षाभावेऽचिन्त्यशक्ति-युक्तत्वाभावाद्, अचिन्त्यशक्तियुक्तत्वे च तथा भावेन -अत्र च भावेनावस्थितिः, अचिन्त्यशक्तियुक्तत्वमन्तरेण तथाभावेनावस्थातुमशक्यत्वात्, तथाभावेनावस्थितौ च सर्वथा - सर्वप्रकारैर्बीजाधानादिभिः परार्थकरणं परहितविधानं, स्वयं तथारूपगुणशून्येन परेषु गुणाधान-स्याशक्यत्वात्, भगवद्भ्य एव, न स्वतो नाऽप्यन्येभ्यः इति एवकारार्थः । - ललितविस्तरा, पृ० ३८ - ३३

(४१) <u>આઈગરાણં</u>

आदिकरेभ्य इत्यादि इति - इहादौ करणशीला
आदिकराः, अनादावपि भवे तदातदा तत्तत्कर्माणवादि
सम्बन्धयोग्यतया विश्वस्यात्मादिगामिनो जन्मादि -
प्रपञ्चस्येति हृदयं, अन्यथाऽधिकृत प्रपञ्चाऽसम्भवः ।
<u>पञ्जिका</u>: अनादावपि प्रवाहापेक्षया, किं पुनः प्रतिनियत
व्यक्त्यपेक्षया आदिमतीत्यपिशब्दार्थः, भवे - संसारे,
तदा तदा तत्र तत्र काले तत्तत्कर्माणवादिसम्बन्ध-
योग्यतया तत्तद्भिन्नरूपं कर्माणवो - ज्ञानावरणादिकर्म
परिणामार्हाः पुद्गलाः, आदि शब्दात्तेषामेव बन्धोदयोदीरणा
हेतवो द्रव्यक्षेत्रकालभावा गृह्यन्ते, तेन सम्बन्धः -
परस्परानुवृत्ति - चेष्टारूपः संयोगस्तस्य योग्यता -
तं प्रतिप्रह्वता तया विश्वस्य - समग्रस्य एवंविध -
योग्यतैवात्मानः कर्तृत्वशक्तिरिति, आत्मादिगामिनः -
आत्मपरतदुभयगतस्य जन्मादिप्रपञ्चस्य - प्रतीतस्य,
इति हृदयमिति - एष सूत्रगर्भविपक्षे बाधकमाह -
अन्यथा कर्तृत्वेऽनधिकृते प्रपञ्चस्याऽसम्भवो
विश्वस्यात्मादिगामिनो जन्मादि-प्रपञ्चस्याऽनुपपत्तिः ।

ललितविस्तरा, पृ० १६ - १७

(૪૨) સમ્યગ્દર્શન મહત્તા

अन्योऽस्य सदा पित्रा, विहितः परिपालकः ।
अहं महत्तमो वत्स ! सम्यग्दर्शन नामकः ॥२०२॥
अनेन रहितावेतौ, दृश्येते न कदाचन ।
एतौ हि वर्धितावेष, निकटस्थोऽतिवत्सलः ॥२०३॥
अन्येऽपि यानि ते कथितान्यत्र, सोपानस्थानि सत्पुरे ।
दृढनिश्चयमेतेषु, भवचक्रपराङ्मुखम् ॥२०४॥
शमसंवेगनिर्वेदकृपाऽऽस्तिक्यविराजितम् ।
मैत्री-प्रमोद-कारुण्य-माध्यस्थैर्भावितात्मकम् ॥२०५॥

ઉપમિતૌ - પ્રસ્તાવ ૪, પૃ. ૪૫૬, શ્લોક ૨૦૨/૨૦૫

(૪૩) ભિક્ષુનું વિશેષણ

'સવ્વેહિં ભૂએહિં દયાણુકંપી' - સર્વ ભૂતોને વિષે દયા વડે (સ્વાભાવિકતા વડે) અનુકંપાવાળો અથવા દયા સહિત અનુકંપાવાળો । - ઉત્તરાધ્યયન, અધ્યાય ૨૧, ગાથા ૧૩

(૪૪) 'સમયાએ સમણો હોઇ ।' - ઉત્તરા. અ. ૨૫, ગા. ૩૨

(૪૫) તીર્થંકર, ગણધર, મુંડ કેવલીનાં લક્ષણો

अत्यन्ताभोगगोचर-श्रद्धास्थैर्यवतोऽनुष्ठानात्तीर्थकृत्त्वं,
मध्यमश्रद्धासमन्वितात् गणधरत्वं, जघन्यश्रद्धासहिता-
न्मुण्डकेवलित्वमाप्नुत इति परे जगुः ।

- ઉપમિતિ, પ્ર. ૫, પૃ. ૫૨૬/૭

(૪૬) સાધુપુરુષોની ૧૧ અંતેઉરીઓ (મૈત્ર્યાદિ)

तथा गाढानुरक्तमन्तरङ्गमन्तःपुरं एतस्तेषां भगवतां
सन्तोषदायिनी धृतिसुंदरी, चित्तप्रसादहेतुः श्रद्धा,
आह्लादकारिणी सुखासिका, निर्वाणकारणं विविदिषा,
प्रमोदविधायिनी विज्ञप्तिः, सद्बोधकारिणी मेधा,
प्रमोदातिरेकनिमित्तमनुप्रेक्षा अनुकूलचारिणी मैत्री,
अकारणवत्सला करुणा, सदानन्ददायिनी मुदिता,
सर्वोद्वेगविघातिनी उपेक्षा इति ।

(૪૭) બીજો વૈરાગ્ય

तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यं ॥ १-१६ ॥

टीका : विषयदोष-दर्शनजनितमापात-धर्मसंन्यास-लक्षणं प्रथमम्, सतत्त्वचिन्तया विषयौदासिन्येन जनितं द्वितीयापूर्वकरणभावि तात्त्विकधर्मसंन्यास लक्षणं द्वितीयं वैराग्यम्, यत्र...

(૪૮) ક્ષમાથી શું થાય ?

'खमावणयाए णं भंते जीवे किं जणयइ ?
खमावणयाए पल्हायणभावं जणयइ ।
पल्हायणभावमुवगए य सव्वपाणभूयजीव-
सत्तेसु मित्तीभावमुप्पाएइ, मेत्तीभावमुवगए-
यावि जीवे भावविसोहिं काऊण निब्भए भवइ ।' १७॥

<u>ટીકા</u> : (નેમિચંદ્ર) -
'ક્ષમણયા' - દુષ્કૃતાનન્તરં ક્ષમિતવ્યમિદં મમેત્યાદિરૂપયા
'પ્રહ્લાદનભાવં' ચિત્તપ્રસત્તિરૂપં 'ભાવવિશુદ્ધિં' -
રાગદ્વેષ વિગમરૂપાં કૃત્વાનિર્ભયો ભવતિ
અશેષભયહેત્વભાવાત્ -
'ખંતીએ ણં ભંતે જીવે કિં જણયઇ?
ખંતીએ ણં પરીસહે જિણેઇ' - <u>ઉત્તરાધ્યયન, અ૦ ૨૯/૨૧</u>

(૪૧) <u>સાધક ઇંદ્રિયો વશ થાય</u>

યથોક્તં શીતોષ્ણીયાધ્યયને - 'જસ્સિમે સદ્દાય રૂવાય ગંધાય ફાસાય અભિસમન્નાગયા ભવંતિ સે આયવં નાણવં વેયવં ધમ્મવં બંભવં' ઇત્યાદિ । - <u>આચા૦ અ૦ ૩, ઉ૦ ૧</u>
<u>ટીકા</u>: અત્ર અભિસમન્વાગતા ઇત્યસ્ય અભીત્યાભિમુખ્યેન સમ: પરિણામ - પરતન્ત્રા - ઇન્દ્રિયવિષયા ઇતિ - ઉપયોગ - લક્ષણેન, સમિતિ સમ્યક્ સ્વરૂપેણ નૈતે ઇષ્ટા અનિષ્ટા વેતિ નિર્ધારણયા અનુપશ્ચાદાગતા: પરિચ્છિન્ના યથાર્થ-સ્વભાવેન યસ્યેત્યર્થ:, સ આત્મવાનિત્યાદિપરમેન્દ્રિય જયસ્ય ફલાર્થવાદ: । - <u>પાતંજલ સૂત્ર ટીકા, ઉ૦ યશો૦</u>

<u>ચિત્તનિરોધ નહિ પણ સાધન</u>

ઇંદ્રિયોની પરમવશ્યતાનો એકમાત્ર ઉપાય સાધન છે,
ચિત્તનિરોધ નહિ.

ભાન પણ અધ્યાત્મભાવનાથી થવાવાળા
સમભાવના પ્રવાહવાળું જોઈએ, તેને જ રાજયોગ
કહેવામાં આવે છે. ચિત્ત કે બાહ્ય ઇંદ્રિય, કોઈના પણ વિજય
માટે મુખ્ય ઉપાય ઉપર્યુક્ત ભાનરૂપ રાજયોગ જ છે.

- વિવેચન, પૃ. ૧૦૭

उपाधि - सम्बन्ध - योग्यता हि विभाव - स्वभावः ।

- દ્રવ્યગુણપર્યાયરાસ, ગા. ૨૦૧, પૃ. ૧૩૫

(૫૦) મુનિનું વિશેષણ: 'आयतुले पयासु ।'

अनु. टीका: तथा 'प्रजाः' - पृथ्व्यादि प्राणिनः
स्वात्मवत् पश्यति, एवंविधो भावसाधुः
सर्वजीवेषु आत्मतुल्यां कल्पयतीति ।

- सूत्रकृतांग, अध्ययन १०, गाथा ३

(૫૧) મુનિનું વિશેષણ: 'सव्वं जगं तू समयाणुपेही ।'

અર્થ: સર્વ જગતને સમતાથી જોતો - સૂત્ર ૧૦, ગાથા ૭

(૫૨) મુનિનું વિશેષણ

'भावणाजोगसुद्धप्पा जले नावा व आहिया ।'

- શ્રી સૂત્રકૃતાંગ

અર્થ: ભાવનાના યોગથી શુદ્ધ થયેલ આત્મા
સંસારજલધિમાં નાવ સમાન કહ્યો છે.

(५३) मुनिनुं विशेषण

तम्हि सव्वसत्तेसु समता काइव्वत्ति
एतं पइण्णमारूहति साधू । - आवश्यक चूर्णि
तम्हि सामायिके, पइण्णा - प्रतिज्ञा ।
अबहुश्रुतेभ्यो हरिभद्राचार्य वचनानुपलम्भः ।
- षोडशक १६, श्लोक १९, टीका

(५४) सहजमल स्वरूप

चतुर्थमेतत्प्रायेण, योगिनस्य महात्मनः ।
सहजाल्पमलत्वं तु, युक्तिरत्र पुरोदिता ॥ २६२ ॥
टीका: चतुर्थं तुरीयम् एतदनुष्ठानं तद्धेतुनामकं xxx
सहजो जीव-समानकाल-भावित्वेनाल्पस्तुच्छो मलो
वक्ष्यमाणरूपो, अथ मलमेवाधिकृत्याह ।
सहजं तु मलं विद्यात् कर्मसम्बन्धयोग्यताम् ।
आत्मनोऽनादिमत्वेऽपि नायमेनां विना यतः ॥ २६३ ॥
टीका - कर्मसम्बन्धयोग्यता ज्ञानावरणादिकर्मसंश्लेष
निमित्तभावम् जीवस्य, नैव अयं बन्धः, एनां योग्यतां
जीवस्य विना अन्तरेण, यस्मात् बन्धश्च प्रवाह
पेक्षयैवानादिमान् । न तु न जीवयोग्यतामन्तरेणैव उपपद्यते,
अन्यथाऽनेकदोषप्रसंगात् । - योगबिन्दु, श्लो० २६२-३

(५५) तद्योगयोग्यतायां चित्रायां नैव नाऽन्यथानियमात् ।
परिणामनीयमेतद्विद्वद्भिस्तत्त्वदृष्ट्योच्चैः ॥ ६ ॥

टीका : तस्मिन् योग्यता - जीवस्य कर्मपुद्गलग्राहक-स्वभावत्वं अनादिपारिणामिक - भव्यभावलक्षणं सहज-मलरूपं मुक्तावस्थायां निवर्ति योग्यताशब्देनोच्यते ।

- षोडशक० १६, श्लो० ६

(५६) 'जीवभव्याभव्यत्वादीनि ।' - अ० २

भाष्यः आदि शब्दात् - अनादिकर्मसन्तानबद्धत्वमित्यादि ।

- तत्त्वार्थ भाष्य

(५७) आत्मसमदर्शित्व - सूत्रकृतांग, अध्य० ११, गाथा ९

'सव्वाहिं अणुजुत्तिहिं मइमं पडिलेहिया ।
सव्वे अक्कंतदुक्खा य अतो सव्वे न हिंसया ॥'

अभयदेवसूरि टीका: सर्वाभिरप्यनुयुक्तिभिः पृथिव्यादि-जीवनिकायसाधकत्वेन अनुकूलयुक्तिभिः 'मतिमान्' विवेकी पृथिव्यादिजीवनिकायेषु जीवत्वं प्रसाध्य 'प्रत्युपेक्ष्य' पर्यालोच्य तथा सर्वेऽप्याक्रान्तदुःखाः दुःखद्विषः सुखार्थिनश्च (इति) मत्वा मतिमान् सर्वानपि प्राणिनो न हिंस्यादिति मनोवाक्कायकर्मभिः कृत-कारितानुमतिभिश्चनवकेन भेदेन च तत् पीडाकारिणा उपमर्दान्निवर्तनीयमिति गाथार्थः ॥

कुटुंबत्रयं - इह सर्वेषां जीवानां प्रत्येकं त्रीणि त्रीणि कुटुम्बकानि, तद्यथा - क्षान्तिमार्दवार्जवमुक्तिज्ञानदर्शन-वीर्यसुखसत्यशौचतपःसंतोषादीनि यत्र गृहमानुषाणि तदिदमेकं कुटुम्बकम्। तथा क्रोधमानमायालोभरागद्वेषमोहा-ज्ञानशोकभयाविरतिप्रभृतयो यत्र बान्धवाः तदिदं द्वितीयं कुटुम्बकम्। तथा शरीरं तदुत्पादकौ स्त्रीपुरुषा-वन्ये च तथाविधा लोका यत्र सम्बन्धिनः तदिदं तृतीयं कुटुम्बकम्। - उपमितौ, पृ० १९०, कमल प्रकाशनं

(५८) एयं खु णाणिणो सारं, जं न हिंसति कंचण।
अहिंसा समयं चेव एतावंतं वियाणीया ॥ १० ॥

एतदेव ज्ञानिनो ज्ञानस्य सारं - यत्कञ्चन प्राणिनमनिष्टदुःखं सुखार्थिनं न हिनस्ति.

विदितागमार्थस्यैतदेव सारं - यत् प्राणातिपातान्निवर्तनं, ज्ञानमपि परमार्थतस्तदेव यत्किञ्चित्प्राणातिपातान्निवर्तनं, प्राणीपीडाकारिणो ज्ञानमपि अज्ञानमेवेति तत्त्वं यतः-

किं ताए पढियाए पयकोडीए पलालभूयाए।
जत्थित्तियं न नायं, परस्स पीडा न कायव्वा ॥ १ ॥

तदेवमहिंसा प्रधानः 'समय' आगमः, तमेवम्भूतं अहिंसाप्रधानं आगमं एतावन्तमेव विजाय

किमन्येन बहुना परिज्ञानेन ? एतावतैव कार्यसिद्धेः
एतावता अहिंसाप्रधानं समयं ज्ञात्वा न हिंस्यात्
कश्चनेति गाथार्थः ॥ - सूत्रकृतांग, अध्य० ११, गाथा १०

(५९) मैत्र्यादि

किरियामेत्तं तु इहं जायति लद्धादवेक्खयाऽवि ।
गुरुलाघवादिसन्नाणवज्जियं पायमियरेसिं ॥ २४१ ॥

टीका : क्रियामात्र - पुनरुक्तरूपमिह - दूरभव्येष्वभव्येषु
च जायते लब्ध्याद्यपेक्षयापि,
इह लब्धिर्वस्त्रपात्रकीर्त्यादिलाभलक्षणा गृह्यते,
आदि शब्दात् स्वजनाद्यविरोध कुललज्जादिग्रहः,
तामपेक्ष्य स्यात् गुरुलाघवादिसंज्ञानवर्जितं
गुणदोषयोः प्रवृत्तौ गुरुलाघवमादिशब्दात्
सत्त्वादिषु मैत्र्यादिभाव -
ग्रहस्तेषु यत्संज्ञानं
शुद्धि - संवेदनरूपं तेन विनिर्मुक्तं,
प्रायो - बाहुल्येनेतरेषां शुद्धिज्ञानबहुमानविहीनानामिति ।

- उपदेशपद, पृ० १९४

(६०) तुल्लाए किरियाए अभव्व दूरभव्वमाइ जीवाणं ।
धम्मट्ठाण - विसुद्धी एमेव हवेइ इट्ठफला ॥ ३६७ ॥

टीका : तुल्यायामेव क्रियायां चैत्यवन्दना-स्वाध्याय-साधु
पासनादि - रूपायामभव्यदूरभव्यासन्नभव्यादिभेदभाजां
जीवानां धर्मस्थानविशुद्धिविधायकानधर्मविशेष-
निष्फलता एवमेव चित्रकार्यवत्,
भूमिकाशुद्धौ शुद्धबोधिलाभलक्षणायां सत्यामित्यर्थः,
भवतीष्टफला निष्कलंक - कल्याण - लाभप्रयोजना,
अन्यथा तद्विपर्यय एवेति।

एतदेवपरमत संवादेनाह —

अज्झप्पमूलबद्धं इतोणुट्ठाणमो सयं बिंति।
तुच्छ - मल - तुल्लमएणं अण्णे वज्झप्प - सत्थण्णू॥

इहाध्यात्मलक्षणमित्थमवसेयं
औचित्याद्वृत्तयुक्तस्य वचनात् तत्त्वचिन्तनम्।
मैत्र्यादिभाव - संयुक्तमध्यात्मं तद्विदो विदुः ॥१॥ इति।

ततोऽध्यात्ममेव मूलं तेन बद्धमायत्तीकृत-
मध्यात्ममूलबद्धं, अतो भूमिकाशुद्धावेवानुष्ठानस्येष्ट-
फलत्वाद्धेतोर्यदनुष्ठानं परमार्थतस्तदनुष्ठानं ब्रुवते,
तुच्छमलतुल्यमसारशरीरलग्नमलसदृशमन्यदध्यात्म
मूलबंध-विकलमन्येऽपि तीर्थान्तरीया अध्यात्मशास्त्रज्ञा
ब्रुवन्तीति, यद्वाऽध्यात्मबन्धप्रधानमनुष्ठानं तदेव
भव्यादिक्रियकरणतया तत्त्वतोऽनुष्ठानम्।

ॐ

तद्विलक्षणं च शरीरस्थरजोराशिवद् मालिन्यकारित्वाऽ-
त्यन्ततुच्छमन्येऽपि योगशास्त्रविदो विदुरिति ।
- उपदेश पद, गा० २६७ - ६८, पृ० २२१

(६१) तदेवमाज्ञायोगात् उभयसाम्राज्यसिद्धिः
स एव श्रेयानिति विशिष्टफलमुखेनोपदिशति ।

तम्हा आणाजोगो अणुसरियव्वो बुहेहिं जं एसो ।
कज्जलमिवपईवो अणुबंधइ उत्तरं धम्मं ॥५४॥

टीका

तस्मात् उभयसाम्राज्ये - नियतत्वात्
आज्ञायोगोऽनुसर्त्तव्यो बुधैः मोक्षोपायानुसरणनिपुणैः,
क्षणमप्यत्र न प्रमादो विधेय इति यावत् यद् यस्मात्
एष सम्यग् दर्शनकालीन - आज्ञायोगः,
प्रदीपः कज्जलमिव उत्तरं धर्मं देशविरत्याद्यनुष्ठानं,
अनुबध्नाति संतत्या सन्निधापयति,
प्रदीपस्थानीयं हि सम्यग्दर्शनम्,
प्रकाशकत्वात् कज्जलस्थानीयं चोत्तर धर्मम्,
भावचक्षुर्निर्मलताविधायकत्वात्,
निर्वातस्थान - निवेशितोचितश्चाज्ञायोगः,
ततः कार्यानुबन्धाऽविच्छेदादित्यवधेयम् ॥५४॥

(६२) उक्तमेव स्वपरसमयसंमत्याद्रढयति इत्याह

जोगसुद्धी गंभीराजोग - संगहेसु सुआ ।
अज्झप्पबद्धमूला अण्णेहिं वि उवगया किरिया ॥५५॥

टीका

इतस्तु इत एवास्या योगपूर्वकानुष्ठानस्य
सानुबन्धत्वाद्धेतोः, दृष्टिशुद्धिः
तत्सम्यग्दर्शन - निर्मलता, गंभीरा अनुद्घाटि -
महानिधानमिवापरिकलनीयसारा,
योगसंग्रहेषु साधुजनानुष्ठानसंग्राहकसिद्धांता -
लापकेषु द्वात्रिंशत्संख्येषु, श्रुता श्रवणगोचरीकृता,
तथा अन्यैरपि तीर्थांतरीयैरपि,
अध्यात्मतो वचनानुसारि मैत्र्यादिभाव -
संयुक्तचित्तात्मकात्म -
बद्धमूला सुघटित - भूमिका क्रिया उपगता,
अध्यात्मविरहितायास्तस्या अबद्धमूलप्रासादरचनाया
इव विपरीत फलत्वात् उक्तं चैतदपि,
अन्यथा क्रियाभेदाभावेन दूरभव्यासन्नभव्यादि-
भेदभाजां सत्त्वानां धर्मस्थानविशुद्धिभेदानुपपत्तेः ।

- उपदेशरहस्य, श्लोक ५४-५५

ॐ

(६३) आत्मसमदर्शित्व

'विरए गामधम्मेहिं जे केइ जगई जगा ।
तेसिं अत्तुवमायाए, थामं कुव्वं परिव्वए ॥३३॥'
ग्रामधर्मा विषयाः पञ्च, तेभ्यो विरतो मुनिः ये केचन
'जगति' संसारोदरे पृथिव्यां 'जगा' इति जन्तवस्ते
सर्वेऽपि जीविताथिनस्तेषां दुःखद्विषामात्मोपमया
दुःखमनुत्पादयन् तत्पालने सामर्थ्यं कुर्वीत ।
तत् कुर्वंश्च संयमानुष्ठाने परिव्रजेदिति गाथार्थः ॥

- सूत्रकृतांग, अध्ययन ११, गाथा ३३

(६४) 'बत्तीसाए जोगसंगहेहिं'

योगो रत्नत्रयं तस्य संग्रहहेतुत्वात् संग्रहा योगसंग्रहा,
आलोचनादयः द्वात्रिंशत् तैर्योऽतिचारः
कृतस्तस्य मिथ्यादुष्कृतमत्रनिर्युक्तिकृदाह -
आलोयणा निरवलावे आवईसु दढधम्मया ।
अणिस्सिओवहाणे य सिक्खाणिप्पडिकम्मया ॥१॥
अण्णायया अलोहे य तितिक्खा अज्जवे सुई ।
सम्मद्दिट्ठी समाही य आयारे विणओवए ॥२॥
धिई मई य संवेगे पणिही सुविहि संवरे ।
अत्तदोसो व संहारो सव्व काम विरत्तिया ॥३॥

पच्चक्खाणा वि उस्सग्गे अप्पमाए लवालवे ।
झाण संवरजोगे य उदए मारणंतिए ॥४॥
संगाणं च परिण्णा पायच्छित्तकरणे इय ।
आराहणा य मरणंते बत्तीसं जोगसंगहा ॥५॥

टीका - रत्नत्रयसंग्रहाय शिष्येण गुरोरग्रे पापानां शुद्ध्या-
लोचना कार्या, गुरोरालोचनादनु स्वरत्नत्रयाराधनाय
निरपलापः स्यात्परस्मै न वदेत्,
एष हेतुः सर्वत्रापि ज्ञेयः,
द्रव्याद्यापत्सु साधुना दृढधर्मता कार्या,
अनिश्रितमिह परभवानपेक्षमुपधानतपः कुर्यात्,
शिक्षा द्विधा, ग्रहणशिक्षा श्रुतपाठः आसेवनशिक्षा
सामाचारीशिक्षणं, निःप्रतिकर्मता रोगादिषु प्रतीकारा-
करणं, तपस्यज्ञातता कार्या यथाऽन्यो न वेत्ति तथा तपः
कुर्यात्, अलोभता, तितिक्षा परीषहोपसर्गाणां सहनं,
आर्जवं ऋजुता शुचिर्निर्दोष संयमवत्त्वं,
सम्यग्दृष्टित्वं, समाधिमनः स्वास्थ्यं स कार्यः,
आचारोपगोऽवक्रो भवति, विनयोपगोऽगर्वः,
धृतिः संतोषस्तत्प्रधानमति धृतिमतिः,
संवेगः, प्रणिधिर्माया न कार्या, सुविधिः, संवरः,

आत्मनो दोषोपसंहारः, सर्वकामविरक्तता,
मूलोत्तरगुणविषयं प्रत्याख्यानं कार्यं,
विविध-उत्सर्गो द्रव्यभावभेदभिन्नो व्युत्सर्गः, अप्रमादः,
लवालवेति कालोपलक्षण-क्षणेक्षणे सामाचार्यनुष्ठेया,
ध्यानमेव संवरयोगः कार्यः,
मारणान्तिकोपसर्गस्योदयेऽक्षोभता,
संगानाप्रत्याख्यानपरिज्ञा, प्रायश्चित्तकरणं,
मरणान्ते मरणकाले वाऽऽराधना ॥ ३२ ॥

आवश्यक निर्युक्तिदीपिका, गा० १२६९-७०-१-२-३, पृ. १०५

(६५) मैत्रभाव

'तहिं तहिं सुअक्खायं, से य सच्चे सुआहिए ।
सदा सच्चेण संपन्ने मित्तिं भूएसु कप्पए ॥ ३ ॥'

य(ये)त्तनाहिता जीवाजीवादिकं पदार्थजातं तथा
मिथ्यात्वाविरति-प्रमादकषाययोगा-बन्धहेतव
इति कृत्वा संसारकारणत्वेन प्ररूपितास्तथा
"सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः" (तत्त्वा. १-१)
इत्येतत्सर्वं पूर्वोत्तराऽविरोधितया तत्र तत्र चिन्त्यमानं
निर्युक्तिकत्वान्न स्वाख्यातं भवति
सर्वज्ञोक्तं तु स्वाख्यातं ज्ञेयं ।

एवंविधेन सत्येवचसा वेः सम्पन्नः स किं करोतीत्याह
'मित्तिं भूएसु कप्पए' भूतेषु-प्राणिषु मैत्रभावं कल्पयेत्
"मित्ति मे सव्व भूएसु" इति वचनात्सर्वेऽपि प्राणिनः
आत्मसमाना गणनीया इति गाथार्थः ॥ ३ ॥
- सूत्रकृतांग, अध्ययन १५, उद्देश ३ जो, गाथा ३

(६६) मैत्र्याह : सूत्रकृतांग, अध्ययन १५, गाथा - ४

'भूएहिं न विरुज्झेज्जा एस धम्मे वुसीमओ ।
वुसीमं जगं परिन्नाय अस्सिं जीवितभावणा ॥ ४ ॥'
'भूतैः स्थावरजङ्गमैः सह न विरोधं कुर्यात् ।
एष धर्मो भूताऽविरोधकारी (वुसीमतो) त्ति'
तीर्थकृतामयं धर्मः स सत्संयमवतो
वा सेयः (वुसीमं' ति)
स साधुस्तीर्थकृद्वा जगच्चराचरभूत - माकारवं
केवलालोकेन सर्वज्ञप्रणीतागमपरिज्ञानेन वा परिज्ञाय
इह जगति भावनाः पञ्चविंशतिरूपा द्वादश प्रकारा वा
सत्संयमाङ्गतया मोक्षकारिणी भावयेदिति गाथार्थः ॥ ४ ॥

(६७) मैत्र्याह

बीआहाणं इहइं भावाणए उ होइ बहुमाणो ।
तक्कारणेवि अत्था जं दव्वथओ वि सदणुमओ ॥ १ ॥

ॐ

## टीका

बीजाधानम् अत्र प्रक्रमे भावसारो एव बहुमान-उपादेयत्वज्ञानरूप - श्रद्धाजनितः प्रमोदोऽनुमोदनाख्यः; एनं विना हेतु सहस्रादपि आत्मनि धर्मोत्पत्तेरयोगात्, शालिमुद्गादिबीजवपनं विना सुवृष्टेरपि क्षेत्रे शस्यस्येव, यद्यपि शास्त्रान्तरेऽन्यान्यपि धर्मबीजानि पठितानि, यथा हि -

(९८) दुःखितेषु दयाऽत्यन्तं, अद्वेषो गुणवत्सु च ।
औचित्यासेवनं चैव सर्वत्रैवाऽविशेषतः ॥

इत्यादि तथाप्यत्रमुख्यत्वादव्यभिचारित्वाच्च भावसारबहुमान एव गृहीतः ।
यदुक्तं उपदेशपदे अत्रौघेन सामान्येन वीतरागवचने वीतरागप्रतिपादितेऽपुनर्बन्धकचेष्टाप्रभृति - अयोगि केवलिपर्यवसाने तत्तच्छुद्धसामाचारे बहुमानो भावप्रतिबन्ध - श्रद्धोपशमवैचित्र्यान्मृदु - मध्याधिमात्रः कर्तव्यः इति विवृतम् ।
तत्कारणेऽपि भावसारकारणेऽपि अर्हदादिषूपादेयत्वात् बहुमानो बीजाधानं भवतीति योगः ।

- उपदेश रहस्ये, श्लोक - २८, पृ० १३-४

ॐ

(६९) मैत्र्यादि

मेत्तादी सत्ताइसु जिणिंदवयणेण तइय अच्चत्थं
भावेइ तिव्वभावो परमं संवेगमावण्णो ॥ १ ॥

टीका - मैत्र्यादीनि सत्त्वादिषु जिनेन्द्रवचनेन हेतुभूतेन तथा चाऽत्यर्थं नितरां भावयति तीव्रभावः सन् परमं संवेगमापन्नः अतिशयेनार्द्रान्तःकरण इति गाथार्थः ।

- पंचवस्तु, गा० १६९३, पृ० २२५

(७०) सव्वत्थ अपडिबद्धा मेत्तादि गुणण्णियाय णियमेण
सत्ताइसु होंति दढं इय आययमग्ग तल्लिच्छा ॥ १ ॥

टीका - सर्वत्र द्रव्यक्षेत्रकालादौ अप्रतिबद्धा - प्रतिबन्धरहिताः, मैत्र्यादिगुणान्विता नियमेन नियोगेन यथासंख्यं सत्त्वादिषु भवन्ति दृढं अत्यर्थं स्युः, आयतो मोक्षोऽव्यवच्छेदत्वात्

तस्य मार्गो ज्ञानादिस्तत्र लिप्सा लालसा ये ते तीर्थकरास्ता स्थिता भवन्ति इति प्रकृतं । साधु लक्षणं ।

श्री पंचाशक० गा० ४२, पृ० ३१०

(७१) भावकरुणा

हेतुभस्य परं भावं सत्त्वाद्योगो निवर्त्तनम् ।
प्रधानकरुणा रूपं ब्रुवते सूक्ष्मदर्शिनः ॥ ४१८ ॥

- योगबिन्दु, पृ - ९१ / पुंठी - १

टीका - हेतुमस्याऽकरणनियमस्य तत्तत्पापस्थान विषयस्य, परमुत्कृष्टम्, भावमन्तःकरणपरिणामम्, सत्त्वादीनां शत्रुमित्रोदासीनानां जनानामागसोऽशुभ-परिणामरूपस्यापराधस्य निवर्त्तनम् निवृत्तिहेतुम्। प्रधाना यथावस्थितवस्तुविज्ञानानुगतत्वेन भावरूपा

या करुणा परदुःखसमुच्छेदनप्रवृत्तिस्तद्रूपं स्वभावो यस्य तत्तथा। ब्रुवते प्रचक्षते। सूक्ष्मदर्शिनो निपुणाभोगभाज इति। यया करुणया क्रियमाणया

शत्रूणामपि क्लिष्टपरिणाम लक्षणोऽपराधो निवर्त्तते,

चण्डकौशिकसर्पस्येव भगवति, सा सर्वपापानाम-करणनियमनिमित्तमिति। - योगबिन्दु, श्लोक ४१८

(७२) मैत्र्यादि: विवेकिनो विशेषेण भवत्येतद्यथागमम्।

तथा गंभीरचित्तस्य सम्यग्मार्गानुसारिणः ॥१॥

टीका - विवेकिनो लब्धपरमार्थविमर्शस्य, विशेषेण विशिष्टवृत्त्या भवत्येतन्मैत्र्यादि चिन्तनरूपमध्यात्मम्।

यथागममागमनिरूपितक्रमाऽनतिक्रमेण,

तस्य प्राय एतत्परिणामचतुष्टयाद्बहिश्चेतोवृत्तेरभावात्। गंभीर चित्तस्य अनुपलक्ष्यमाणहर्षविषादादिविकारस्य,

अत एव सम्यग्मार्गानुसारिणः

क्षुद्रनिवृत्तिपक्षस्थितस्येति - योगबिन्दु, श्लोक - ४०३

(९३) भावणा जोगसुद्धप्पा, जले णावा व आहिया ।
णावा व तीरसंपन्ना, सव्वदुक्खा तिउट्टति ॥५॥

टीका - भावनायोगेन यो विशुद्धात्मा परित्यक्तसंसार-स्वभावः स च (जले) नौरिव समाख्यातः यथा नौः समुद्रं तीर्त्वा पारगामिनी भवति तथा जीवोऽपि भावना-विशुद्धात्मा संसारार्णवं तीर्त्वा पारगामी स्यात् ।
संसारदुःखेभ्यो मुच्यते इति गाथार्थः ॥५॥

- सूत्रकृताङ्ग, अध्याय १५, गाथा ५

(९४) सर्वेश्वरता

ईश्वर कर्तृत्ववाद (द्वादशार नयचक्र - ईश्वरनिरास प्रकरण)

नन्वेवं त्वदुक्ता एवोपपत्तयः 'सर्व प्राणीश्वरत्व' साधयन्ति । सुखाद्यात्मसंवेद्यलक्षणत्वात्,
सुखादि - अदृष्टाणूनामपि च कार्यत्वात्,
कार्यप्रवर्तनाऽभ्युपगमात् सर्वप्राणिनां कर्तृत्वात्,
कर्तुरेव भवितृत्वाऽभ्युपगमात्,
तस्यैव भवितुश्च प्रयोजनात्, सर्वेश्वरता ।

અર્થ: સિદ્ધાન્તકાર કર્તૃત્વવાદીને કહે છે કે તમારી કહેલા યુક્તિઓ સર્વ જીવોને ઈશ્વર તરીકે સિદ્ધ કરે છે, કારણ કે સુખાદિનું સંવેદન દરેક જીવોને આત્મપ્રત્યક્ષ છે અને સુખાદિ અદૃષ્ટ - કર્માણુના પ્રભાવે થાય છે.

(કર્મનું પ્રવર્તન) સર્વ જીવો સ્વ સ્વ કર્મના
કર્તા હોવાથી, કર્મના પ્રવર્તક - પ્રયોજક થાય છે.
કર્તા સ્વતંત્ર હોવાથી અને તે જ પોતાના સુખાદિનો
પ્રયોજક (કર્તા) હોવાથી સર્વેશ્વરતા ઘટે છે.
(એ રીતે સર્વ જીવોને ઈશ્વર માનીએ,
તો કર્તૃત્વવાદ પણ સંગત થઈ શકે છે.)

(૭૫) ભાવનાયોગ શુદ્ધ

तिउट्टइ उ मेहावी जाणं लोगंसि पावगं ।
तुट्टंति पावकम्माणि नवं कम्ममकुव्वओ ॥६॥

टीका - स भावनायोग शुद्धात्मा नौरिव जले संसारे परिवर्तमानः 'तिउट्टति' त्रुट्यति सर्वबन्धनेभ्यो मुच्यते 'मेधावी' पंडितः पुनः अस्मिँल्लोके यत् किमपि पापकर्म सावद्यानुष्ठानरूपं, तत् ज्ञपरिज्ञया ज्ञात्वा प्रत्याख्यान-परिज्ञया परिहरंस्त्रुट्यति मुच्यते कर्मभिः इति ।
तस्यैवं कर्मस्वरूपं जानतो नवानि कर्माण्यकुर्वतः
निरुद्धास्रवद्वारस्य विकृष्टतपश्चरणवतः
पूर्वसञ्चितानि कर्माणि त्रुट्यन्ति ।
नवं च कर्माकुर्वतोऽशेषकर्मक्षयो भवतीति गाथार्थः ॥६॥

- સૂત્રકૃતાંગ, અધ્ય. ૧૫, ગાથા ૬

(૭૬) आत्मसमदर्शित्व - દશવૈ૰, અ૰ ૧૦, ગા૰ ૫

रोइअ नायपुत्तवयणे अत्तसमे मन्नेज्ज छप्पिकाए।

टीका - रोचयित्वा विधिग्रहण भावनाभ्यां प्रियं कृत्वा भगवान् महावीर - वर्धमान - वचनम् आत्मसमान्
तुल्यान् मन्येत षडपि कायान् पृथिव्यादीन्।

સર્વને સુખનો રાગ, દુઃખનો દ્વેષ, જીવવાની ઇચ્છા, મરણભય ઇત્યાદિ સમાન હોવાથી જીવમાત્ર સ્વસમાન છે, માટે પોતાને ન ગમતું દુઃખ બીજાને કદી ન કરવું, એમ સમજતો સાધુ અહિંસાદિ વ્રતોને પાળતો પરપીડા તજે.

(૭૭) 'अज्झप्परए' (ભિક્ષુનું વિશેષણ)

'अध्यात्मरतः प्रशस्तध्यानासक्तः
सुसमाहितात्मध्यानापादकगुणेषु।'

'हत्थ संजए पाय संजए, वायसंजए संजइंदिए।
च अज्झप्परए सुसमाहिअप्पा,
सुत्तत्थं च वियाणइ जे स भिक्खु ॥१५॥'

હાથ-પગના સંયમથી કાયયોગનો, વચનસંયમથી વચનયોગનો અને અધ્યાત્મરત, સમાધિવંત તથા સૂત્રાર્થનો જ્ઞાતા વગેરેથી મનોયોગનો સંયમ સમજવો. એમ ત્રણે યોગથી સંયમ સાધકને ઉત્તમ સાધુ જાણવો.

- દશવૈ૰, અ૰ ૧૦, ગાથા ૧૫

ॐ

(७८) भगवदनुग्रह - योगबिन्दु

गुणप्रकर्षरूपो यत् सर्वैर्वन्द्यस्तथेष्यते ।
देवतातिशयः कश्चित् स्तवादेः फलदस्तथा ॥२९८॥

टीका - गुणप्रकर्षरूपो ज्ञानादिप्रकृष्ट-गुणस्वभावः सर्वैर्मुमुक्षुभिः वन्दनीयः मन्यते देवतातिशयः विशिष्ट-देवताख्यः (रूपः) कश्चित् जिनादिः, स्तवादेः, स्तवनपूजननमनानुध्यानादेः क्रियायाः फलदः स्वर्गापवर्गादि फलदायी । अत्र यद्यपि स्वकर्तृका क्रिया फलं प्रयच्छति, तथापि स्तवनीयालम्बनत्वेन तस्यास्तत्स्वामिकत्व-मिति स्तोतव्यनिमित्त एव स्तोतुः फललाभ इति ।

(७९) भगवद् ध्यान

तत्प्रणेतृसमाक्रान्त चित्तरत्नविभूषणा ।
साध्यसिद्धावनौत्सुक्य-गांभीर्य-स्तिमितानना ॥२४७॥

तस्याः प्रवृत्तेर्यः प्रणेता प्रस्तापकस्तीर्थकरादिस्तेन प्रतिक्षणं स्मृतिपथव्यवस्थितेन समाक्रान्तं व्याप्तं यच्चित्तरत्नं तदेव विभूषणमलंकारो यस्याः प्रवृत्तेः सा तथा । तथा साध्यसिद्धौ धर्मार्थादि-प्रयोजननिष्पत्तौ अनौत्सुक्येनात्वरारूपेण गांभीर्येण चाऽलक्षितविकाररूपेण स्तिमितं प्रसन्नमाननं मुखं यस्यां सा तथा । - योगबिन्दु ।

ॐ

महाव्रतानां क्षायिकादिभावतो मंगलत्वात् ।

स्थानांग सूत्र - टीका

(८०) आत्मसमदर्शित्व

सव्वे बेइंदिया....... सव्वे पंचिंदिया,

सव्वे तिरिक्खजोणिया परमाहम्मिआ ।

एसो खलु छट्ठो जीवनिकाओ तसकाउत्ति पवुच्चइ ॥

हारिभद्रीया टीका - परम धर्माणा इति अत्र परमं

सुखं तद्धर्माणः सुखधर्माणः सुखाभिलाषिणः इत्यर्थः ।

(८१) स्थानांग सूत्र आत्मसमदर्शित्व

एगो आया

अभयदेव० टीका - सामान्येरूपेणात्मा एको,

विशेषरूपेण त्वनेकः, न चात्मनां तुल्यरूपं नास्ति,

एकात्मव्यतिरेकेण शेषात्मनामनात्मत्वप्रसङ्गादिति,

तुल्यं च स्वरूपमुपयोगः 'उपयोगलक्षणो जीव'

इति वचनात् तदेवमुपयोगरूपैकलक्षणत्वात्

सर्वे एवात्मान एकरूपाः,

एवं चैक लक्षणत्वादेक आत्मेति । अथवा

जन्म - मरण - सुख - दुःखादि - संवेदनेष्व - सहायत्वादेक

आत्मेति भावनीयमिति । - दशवै०, अ० ४, सूत्र १

(८२) आत्मसमदर्शित्व

जेण कारणेण तसथावराणं जीवाणं, अप्पणो य
हियत्थं च भवइ तहा जयंति अतो य ते साहुणो भण्णंति ।।
दशवैकालिक चूर्णि । पृ० ७०, अ-१

(८३) ध्यानयोग

योगश्चित्तवृत्तिनिरोधः । १-२
क्लिष्टचित्तवृत्तिनिरोधो योगः ।
यद्वा समितिगुप्ति-साधारणं धर्मव्यापारत्वमेव योगः ।
इति अस्माकमाचार्याः ।

० तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यम् । १-१६
विषयदोषदर्शनजनितमापातधर्मसंन्यास - लक्षणं
प्रथमम् स तत्त्वचिन्तया विषयौदासिन्येन जनितं द्वितीय
पूर्वकरणभावि तात्त्विकधर्मसन्यासलक्षणं
द्वितीयं वैराग्यम्, यत्र क्षायोपशमिका धर्मा अपि क्षीयन्ते,
क्षायिकाश्चोत्पद्यन्ते इत्यस्माकं सिद्धान्तः ।

० विराम-प्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः ।।
वृत्तिक्षयो ह्यात्मनः कर्मसंयोगयोग्य १-१८
- ताऽपगमः स्थूलसूक्ष्मा ह्यात्मनश्चेष्टावृत्तयः,
तासां मूलहेतुः कर्मसंयोगयोग्यता, सा चाऽकरण-

ॐ

नियमेन ग्रन्थिभेदे उत्कृष्टमोहनीयबन्धव्यवच्छेदेन तत्तद्गुणस्थाने तत्तत्प्रकृत्यात्यन्तिकबन्धव्यवच्छेदस्य हेतुना क्रमशो निवर्तते ।

तत्र पृथक्त्ववितर्क, सविचारैकत्ववितर्का विचाराख्ये, शुक्लध्यानभेदद्वये संप्रज्ञातः समाधिर्वृत्त्यर्थानां सम्यग्ज्ञानात् ।

निर्वितर्कविचारानन्दास्मिता निर्भासस्तु पर्याय-विनिर्मुक्तशुद्धद्रव्यध्यानाभिप्रायेण व्याख्येयः ।

रज्जरमालकोत्तम् - का अरइ के आणंदे ? इत्थंपि अग्गहे चरे इत्यादि ।

- पातंजल योगदर्शन टीका

ધર્મનું બીજ મૈત્રી આદિ ભાવનાઓ છે.
'સર્વ સુખી થાઓ, કોઈ દુઃખી ન થાઓ,'
ઇત્યાદિ ભાવનાને મૈત્રીભાવના કહી છે.
તે ભાવના વિના અશુભ કર્મબંધ અટકતો નથી.
માટે અહીં મૈત્રીભાવનાનું વિધાન કર્યું છે.
વિશ્વપ્રેમને સર્વ જીવોને સમાન દૃષ્ટિથી જોવા, આત્મતુલ્ય માનવા, સદ્ગુણો કેળવવા અને મન-ઇંદ્રિયોનું દમન કરવું, એ સર્વે આત્મવિકાસનાં પ્રાથમિક સાધનો છે,

ॐ

એના અભાવે આકરાં બહુ તપ - જપ વગેરે
અનુષ્ઠાનો કરવા છતાં ગુણો પ્રગટતાં નથી.

અનુવાદ, પૃ૦ ૬૫

(८४) सव्व भूयप्पभूयस्स सम्मं, भूयाइं पासओ ।
पिहिआसवस्स दंतस्स, पावं कम्मं न बंधइ ॥

टीका - सर्वभूतेषु आत्मभूतः सर्वभूतात्मभूतो यः आत्मवत् सर्वभूतानि पश्यति इत्यर्थः तस्यैवं सम्यग् वीतरागोक्तेन विधिना भूतानि पृथिव्यादीनि पश्यतः सतः स्थगितप्राणातिपातादिआश्रवस्य दान्तस्य इन्द्रिय-नोइन्द्रियदमेन पापं कर्म न बध्यते तस्य पापकर्मबन्धो न भवति इत्यर्थः ।

- दशवै०, अ० ४, गाथा ९

(८५) पढमं नाणं तओ दया, एवं चिट्ठइ सव्व संजए ।
अन्नाणी किं काही ? किं वा नाहीइ छेअपावगं ॥१०॥

टीका - प्रथमं आदौ ज्ञानं जीवभवस्वरूप-संरक्षणोपाय-फलविषयं ततः तथाविधज्ञानसमनन्तरं दया-संयमस्तदेकान्तोपादेयतया भावतस्तत्प्रवृत्तेः, एवम् अनेन प्रकारेण ज्ञानपूर्वकक्रियाप्रतिपत्तिरूपेण 'तिष्ठति' आस्ते सर्वसंयतः सर्वः प्रव्रजितः ।

ॐ

यः पुनः अज्ञानी साध्योपाय - फलपरिज्ञानविकलः
स किं करिष्यति ?
सर्वत्राऽन्धतुल्यत्वात् प्रवृत्तिनिवृत्तिनिमित्ताभावात्,
किं वा कुर्वन् ज्ञास्यति छेकं
निपुणं हितं कालोचितं 'पापकं वा'
अतो विपरीतमिति, ततश्च तत्करणं
भावतोऽकरणमेव, समग्रनिमित्ताभावात्,
अन्धप्रदीप्तपलायन, घुणाक्षरकरणवत्
अत एव अन्यत्राऽप्युक्तम् - गीअत्थो अ विहारो
बीओ गीअत्थमीसिओ भणिओ, इत्यादि,
अतो ज्ञानाऽभ्यासः कार्यः ॥१॥

અહીં 'જ્ઞાન' એટલે...
જીવોનું (દ્રવ્ય - ગુણ - પર્યાય) સ્વરૂપ,
તેના રક્ષણના ઉપાયો અને તેનું ફળ વગેરેનું માહાત્મ્ય.
'દયા' એટલે સંયમનાં સર્વ અનુષ્ઠાનો.

(૮૬) દશ. વૈ., અ. ૬, ગાથા ૯

अहिंसा निउणा दिट्ठा सव्व भूएसु संजमो ॥
जावंति लोए पाणा तसा अदुव थावरा ।
ते जाणमजाणं वा न हणे णो विघायए ॥१०॥ णो विघायए॥

टीका - जानन् रागाद्यभिभूततो व्यापादन - बुद्ध्या
अजानन् वा प्रमादपरतन्त्रेण वा ॥

सव्वे जीवा वि इच्छंति, जीविउं न मरिज्जिउं
तम्हा पाणिवहं घोरं निग्गंथा वज्जयंति णं ॥ ११ ॥

दश० अ० ६, गाथा - ५६ : धम्मे संजए सामणिए सदा जए । सामणिए - श्रामण्ये श्रमणभावे चरण-परिणामरूपे चेष्टिते सदा यतः सर्वकालमुद्युक्तः सन् ।

(८७) मैत्र्यादि

मैत्रीकरुणामुदितोपेक्षाणां सुखदुःख-
पुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम् । १-३३

अस्मदाचार्यास्तु - परहितचिन्ता इति लक्षयित्वा
उपकारि - स्वजनेतर इति भेदप्रदर्शन - पूर्वं एताः
स्वल्पाभ्यासात् क्रमेणावचनानुसारिणां पुंसां ।
सद्वृत्तानां सततं भावनां परिणमन्त्युच्चैः ।
इति परिकर्मविधिमाहुः ।

(८८) पातंजल - योगदर्शन

ता एव सबीजः समाधिः । १-४६

पर्यायोपरक्तानुपरक्तस्थूल - सूक्ष्म - द्रव्यभावना
रूपाणामेतासां शुक्लध्यान - जीवानुभूतानां चित्तैकाग्र्य

कारिणीनामुपशान्तमोहापेक्षया सबीजत्वम्,
क्षीणमोहापेक्षया तु निर्बीजत्वम् अपि स्यात्
इति त्वार्हतसिद्धान्त रहस्यम् ।
(८९) तपः स्वाध्यायेश्वर-प्रणिधानानि क्रियायोगः । २-१
बाह्यं तपः परम दुश्चरमाचरध्वम् आध्यात्मिकस्य
तपसः परिबृंहणार्थम् । इत्यस्मदीयाः ।
सर्वत्रानुष्ठाने मुख्यप्रवर्तक-शास्त्रस्मृतिद्वारा तदादि
-प्रवर्तक-परमगुरोर्हृदये निधानमीश्वरप्रणिधानम् ।
तदुक्तम्- अस्मिन् हृदयस्थे सति इत्यादि अस्मन्मतम् ।
० स्वरसवाही विदुषोऽपि तथाऽऽरूढोऽभिनिवेशः ।
अत्राऽविद्या स्थानांगोक्तं दशविधं मिथ्यात्वमेव ।
अस्मितायाः अपि दृश्ये दृगारोपरूपत्वे दृशि वा
दृश्यारोपरूपत्वे मिथ्यात्व एवान्तर्भावः ।
आरोपानंगीकारे 'बौद्ध दृश्य'
इत्यादिना दृष्टिसृष्टिवादापत्ति दोषः ।
अहंकारममकारबीजरूपत्वे तु रागद्वेषान्तर्भाव इति ।
रागद्वेषौ कषायभेदा एव ।
अभिनिवेशश्चोदाहृतोऽर्थतोभय संज्ञात्मक एव,
स च संज्ञान्तरोपलक्षणम्,
विदुषोऽपि भय इवाहारादावप्यभिनिवेशदर्शनात् ।

केवलं विदुषोऽप्रमत्तदशायां दश - संज्ञाविष्कंभणे
न कश्चिदप्यभिनिवेशः ।
संज्ञा च मोहाभिनिवेशः,
संज्ञा च मोहाभिव्यक्तं चैतन्यमिति सर्वेऽपि
क्लेशा मोहप्रकृत्युदयजन्या एव,
अत एव क्लेशक्षये कैवल्यसिद्धिः,
मोहक्षयस्य तद्धेतुत्वात् इति पारमर्षरहस्यम् ।

(१०) <u>शौच</u> - भावशौचानुपरोधेन द्रव्यशौचं
बाह्यमादेयमितितत्त्वदर्शिनः ।

(११) <u>धारणा - ध्यान - समाधि</u>

एकत्र त्रयरूपस्य च संयमस्य चित्तस्थैर्ये
एवोपयोगो बाहुल्येन, आत्मद्रव्य - गुण - पर्यायरूपस्य च
तस्य शुक्लध्यान - शरीरघटकतया कैवल्यहेतुत्वमपि ।
ऐश्वर्यं लब्धिरूपं न समाधिरूप - संयमजन्यं, वैचित्र्य-
प्रतियोगिनस्तस्य विचित्रक्षयोपशमादिजन्यत्वात् ।

(१२) <u>धारणा - ध्यान - समाधि</u>

अत एव केवलज्ञाने शक्तिविक्षेपेण - विषयाणां
सदा सन्निधानाद् ज्ञानावच्छेदकत्वेन तेषां
सदाज्ञातत्वमबाधितमिति तु परमेश्वरप्रवचनप्रसिद्धः

ॐ

પન્થાઃ જ્ઞાનરૂપસ્ય ચિત્તસ્યાત્મનિ ધર્મિતા પરિણામઃ
સદા સન્નિહિતત્વેન તસ્ય સદા જ્ઞાતત્વેઽપ્યનુપપન્નાઃ,
શબ્દાદીનાં કાદાચિત્કસન્નિધાનેનૈવ
વ્યંજનાવગ્રહાદિ લક્ષણેન જ્ઞાતાજ્ઞાતત્વપ્રસંગાત્ ।

યોગદર્શન, સૂ૦ ૪।૧૮

(૧૩) આત્મસમદર્શિત્વ

સવ્વે પાણા સવ્વે જીવા સવ્વે સત્તા
સવ્વે ભૂઆ ન હંતવ્વા ન પરિતાવેયવ્વા ।
સવ્વે પાણા પિયાઉઆ સુહસાયા દુહપડિકૂલા અપ્પિયવહા
પિયજિવિણો જિવિઉકામા સવ્વેસિં જિવિયં પિયં ।

આચારાંગ સૂત્ર૦, અ૦૨, સૂત્ર ૧૨-૧૩

(૧૪) સમ્યક્ત્વ અધિકાર

સે બેમિ જે અઈયા જેય પડુપન્ના,
જે ય આગમિસ્સા અરહંતા ભગવંતા,
તે સવ્વે એવમાઇક્ખંતિ, એવં ભાસંતિ,
એવં પણ્ણવિંતિ, એવં પરૂવિંતિ, સવ્વેપાણા,
સવ્વે ભૂઆ, સવ્વે જીવા, સવ્વે સત્તા ન હંતવ્વા,
ન અજ્જાવેઅવ્વા, ન પરિઘિત્તવ્વા, ન પરિયાવેયવ્વા,
ન ઉદ્દેયવ્વા, એસ ધમ્મે સુદ્ધે, નિઇએ, સાસએ,

ॐ

समिच्चलोयं खेयण्णे हिं पवेइए,

तं जहा उट्ठिएसु वा अणोवहिएसु वा संजोगरएसु वा

असंजोगरएसु वा तच्चं चेयं

तहा चेयं अस्सिं चेयं पवुच्चइ।

आचारांग सूत्र, अ० ४, उ० १

(६५) तेसिं सो निहुओ दंतो, सव्व-भूअ-सुहावहो।
सिक्खाए सुसमाउत्तो, आयक्खइ विअक्खणो ॥ ३ ॥

નિયત-નિશ્ચલ મનવાળા, ઇંદ્રિયોનું દમન કરનાર અને
જગમાત્રનું સુખ ઇચ્છનાર વિચક્ષણ
શિક્ષાથી યુક્ત થઈ કહે છે. - દશવૈ૦, અ૦ ૬, ગાથા ૩

(६६) मैत्र्यादि (अध्यात्मयोग)

एवं परमं नाणं परमो धम्मो इमोच्चिय पसिद्धो।
एवं परम रहस्सं णिच्छयदिसुद्धं जिणा बिंति ॥ १०४ ॥

टीका - परमं ज्ञानं एतदध्यात्मध्यानं
ज्ञानस्य विरतिफलत्वात्, विरतेश्च समतासारत्वात्,
समतायाश्च एतदायत्तत्वादिति।
निश्चये परिशुद्धपारमार्थिकनये - विशदिकृतं।
अध्यात्मस्य प्रवचने परमरहस्यादेव परीक्षकैः
सर्वत्र तदनुल्लङ्घनेनैव प्रवृत्तिः कर्त्तव्या।

ॐ

(९७) मैत्र्यादि (अध्यात्मयोग)

अज्झप्पाबाहेणं विसयविवेगं अओ मुणी बिंति ।
जुत्तो हु धम्मवाओ ण सुक्कवाओ विवाओ वा ॥१०५॥

टीका : अध्यात्माबाधेन - स्वपरगत -
मैत्र्यादि - समन्वित - शुभाशयाऽविच्छेदेन
विषय - विवेकं कर्त्तव्यं ।
साधूनां माध्यस्थ्यप्रधानत्वात्,
शुभानुबन्धित्वाच्च साधूनां प्रयत्नस्य ।

- धर्मपरीक्षा, उ० यशोविजयजी

(९८) मैत्र्यादि (अध्यात्मयोग)

एते पापविकारा न प्रभवन्त्यस्य धीमतः सततम् ।
धर्मामृतप्रभावाद् भवंति मैत्र्यादयश्च गुणाः ॥१४॥

- षोडशक ४, श्लोक १४

(९९) मैत्र्यादि (अध्यात्मयोग)

इति चेष्टावतः उच्चैर्विशुद्धभावस्य सद्धेतोः क्षिप्रम् ।
मैत्रीकरुणामुदितोपेक्षाः किल सिद्धिमुपयान्ति ॥१॥

चेष्टावतः साधुचेष्टायुक्तस्य विशुद्धभावस्य सत् -
साधीः अचिरेणैव निष्पत्तिं लभन्ते ।

षोडशक १३, श्लो० ७

(१००) एतद्रहितं तु तथा तत्त्वाभ्यासात्परार्थकार्येव ।
सद्बोधमात्रमेव हि चित्तं निष्पन्नयोगानाम् ॥१॥

मैत्र्यादिरहितं तु तेन प्रकारेणोत्तरासंभविना परमार्थाभ्यासात् तत्स्वरूपाभ्यासाद्वा परोपकारकरणैकशीलमेव निर्मलज्ञानमात्रमेव हि शेषदोषविमुक्तं - चित्तं - चेतना स्वभावं निष्पन्नयोगानां योगिविशेषाणां तु, लिंगं चेदं -

(१०१) उक्तं विषयेषु चेतः
प्रभाववद्धैर्यसमन्वितं च ।
द्वन्द्वैरधृष्यत्वमभीष्टलाभो
जनप्रियत्वं च तथा परं स्यात् ॥१॥

- षोडशक १३, श्लो. १२

विशेषाऽविशेष - लिंगमात्राऽलिंगानि गुणपर्वाणि ।

प्रागभाव - प्रध्वंसाभावाऽनभ्युपगमे सर्वमेतदुक्तमनुपपन्नम् । तदुक्तमकलंकेन -

कार्यद्रव्यमनादिः स्यात्प्रागभावस्य निह्नवे ।
प्रध्वंसस्यापलापे तु तदेवानन्ततां व्रजेत् ॥१॥

तदुपगमे तु द्रव्यपर्यायोभयरूपत्वाद्वस्तुनः सर्वत्र त्रैलक्षण्येन कथंचिदेषा व्यवस्था युज्यताऽपीति वयं वदामः।

- पातंजल योगसूत्र २ - १९

ॐ

(१०२) लौकिका अपि पठन्ति-

भावशुद्धिर्मनुष्यस्य विशोधा कार्यसाधिनी।
अन्यथाऽऽलिङ्ग्यते कान्ता दुहिता पुनरन्यथा ॥१॥

उपदेशपद, टीका, पृ० १५०

(१०३) आत्मौपम्ये लाभ

अध्यवसायात्तद्धननादौ प्रवृत्तस्य तत्प्रतिषेधार्थमाह-

तुमंसि नाम सच्चेव जं अज्जावेयव्वंति मन्नसि,
तुमंसि नाम सच्चेव जं परियावेयव्वंति मन्नसि,
एवं जं परिघित्तव्वंति मन्नसि, जं उद्दवेयंति मन्नसि,
अंजू चेयपडिबुद्धजीवी तम्हा न हंता, न विघायए,
अणुसंवेयणमप्पाणेणं जं हंतव्वं नाभिपत्थए।

टीका: योऽयं हन्तव्यत्वेन भवताऽध्यवसितः स त्वमेव,
यथा च भवतो हननोद्यतं दृष्ट्वा दुःखमुत्पद्यते
एवमन्येषामपि, तद्दुःखापादनाच्च किल्बिषानुषङ्गः,
नात्रात्मनः आकाशदेशस्य व्यापादनेन हिंसा,
अपितु शरीरात्मनः,
तस्य हि यत्र क्वचित्स्वाधारं
शरीरं नितरां दमितं तद्वियोजीकरणमेव हिंसेति।

आचाराङ्ग सूत्र, अ० ५, सूत्र० १६४

ॐ

(१०४) आत्मौपम्य लक्ष

तेषां च दुःखपरिजिहीर्षूणां सुखलिप्सूनां
आत्मौपम्येनाचरता तदुपमर्दकानि हिंसादिस्थानानि
परिहरताऽऽत्मा पंचमहाव्रतेष्वास्थेयः
तत्परिपालनार्थं चोत्तरगुणा अप्यनुशीलनीयाः ॥
आचारांग सूत्र, अ० २, उद्देशो - २

(१०५) आत्मस्वरूप तथा ध्येय धर्मपरीक्षा

गुरुआणाइ ठियस्स य, बज्झाणुट्ठाणसुद्धचित्तस्स ।
अज्झप्पज्झाणम्मि वि, एगग्गत्तं समुल्लसइ ॥९९॥
तंमि अ आयसरूवं, विसय कसायाइदोसपरहिआ ।
विन्नाणाणंदघणं परिसुद्धं, होइ पच्चक्खं ॥१००॥
का अरइ आणंदे केवत्ति वियप्पणं ण जत्थुत्तरं ।
अप्पो तत्थ वियप्पा पुग्गलसंजोगजा कत्तो ॥१०२॥
अप्पो पुग्गलभावा अप्पणो एगो य नाणमित्तोहं ।
सुद्धो एस वियप्पो अवि अप्पसमाहि-संजणओ ॥१०३॥
(आनंदघनं..... प्रशमसुखैकरसतामापन्नं)

टीका - गुर्वाज्ञा - स्थितस्य च परिणतव्यवहारस्य
सतो बाह्यानुष्ठानेन विहितावश्यकादिक्रियायोगरूपेण
शुद्धचित्तस्य ध्यानयोग - प्रतिबन्धक - कर्ममल

विगतविशदीकृतहृदयस्य, निश्चयावलम्बनदशायां
शुद्धात्मस्वभावपरिणतेः प्रकटीभूतायामध्यात्मध्यानेऽपि
एकाग्रत्वं समुल्लसति । तंनिमित्त ।
तस्मिंश्चाऽध्यात्मध्यानैकाग्रत्वे समुल्लसिते
विषयाः कषायाश्च ये दीपनला
जीवगुणमालिन्ये हेतवस्तद्रहितं ।
तथा विज्ञानानन्दघनं स्वरूपप्रतिभास - प्रशमसुखैक
- रसतामापन्नं परिशुद्धमनुपहितस्फटिकरत्नवत्
प्रकृत्यैव निर्मलमात्मस्वरूपं प्रत्यक्षं भवति ॥
पुद्गल - परिणाम - कायमनोवाग्गणप्राण - कर्मवर्गणा
- देहगृहक्षेत्रारामादि संस्थानभाजोऽविद्याप्रपञ्चो
परचिन्तममकारविषयीभूता अन्ये मदात्म
द्रव्यादेकान्तेनपृथग्भूताः कालत्रयेऽप्युपयोग -
लक्षणासंस्पर्शादितिभावः ।
अहं च ज्ञानमात्रमुपयोगमात्रस्वाभाव इति हेतोः
पुद्गल - भावेभ्योऽन्य - एकश्च कालत्रयेऽपि
अन्यद्रव्यसंसर्गेऽपि तत्स्वभावापरिग्रहाद् अनन्त -
पर्यायविर्भावतिरोभावाभ्यामप्रविचलित
शुद्धात्मद्रव्यैकशक्तिमत्त्वाच्च ।

ॐ

न च सम्यग्दर्शनचारित्ररूप -
रत्नत्रयस्वभाव - शालित्वेनाविशुद्धात्म -
द्रव्यस्यैकात्म्यप्रतीतिः संभवति,
प्रभावोत्कर्षविषहरणशक्तिगुणयोगजात्यरत्नस्यैवेति ।
एवं शुद्धात्मद्रव्यविषयत्वेन शुद्धो
विकल्पो अविकल्पसमाधेः
सम्यक् प्रकारेण जनकः
एतज्जनित - संस्कारस्यविकल्पान्तर
विरोधित्वेन तत्समनुत्थानात्
एतस्य वह्नेः दाह्यं विनाश्यानुविनाशवद् -
शुभविकल्पजालमुच्छेद्य स्वत एवोपरमादिति ।

॰

किं बहुणा इह जह जह रागद्दोसा लहुं विलिज्जंति ।
तह तह पयट्टियव्वं एसा आणा जिणिंदाणं ॥ २०६ ॥
- श्री धर्मपरीक्षायां ।

॰

सव्वपाणभूअजीवसत्ताणं आसायणाए ।
तत्र जीवाशातना विपरीत - प्ररूपणादिनैव ।
- आवश्यकपगामसज्झाये

## (૧૦૬) જિનાજ્ઞા સ્વરૂપ

આણા પુણ જગગુરુણો,
એગંતસુહાવહા સુપરિસુદ્ધા ।
અપરિક્ખિઆણ ગિજ્ઝા,
સા સવ્વા નાય મિત્તેણં ॥૮૯॥

:ટીકા:

પ્રેક્ષાવત્પ્રવૃત્તેઃ પરીક્ષા નિયતત્વાદિતિ ।

એયાહિં પરિક્ખાહિં સુદ્ધે ધમ્મંપિ
પરિણયા ગુરુણો ગુણજલણિહિણો
તેऽવિ વિસુદ્ધા સુવણ્ણં વ ॥૯૦॥

:ટીકા:

ધર્મે યે પરિણતા એવ તે ગુરવોऽપિ ગુણજલનિધયઃ
યદ્ દ્રવ્યં યદા યદ્રૂપેણ પરિણતં
તદા તન્મયમેવેતિ શુદ્ધધર્મપરિણતા ગુરવોऽપિ
શુદ્ધધર્મરૂપત્વે નૈવાદરણીયા ઇતિ ભાવઃ ॥

સત્થોઇય - ગુણજુત્તો
સુવણ્ણસરિસો ગુરુ વિણિદ્દિટ્ઠો ।
તા તસ્સ ભણંતિ ઇમે
વિસઘાયાઈ સુવણ્ણગુણે ॥૯૧॥

विसघाइ-रसायण-मंगलत्थ-विणए-पयाहिणावत्ते ।
गुरुए अडज्झ-कुत्थे अट्ठ सुवण्णे गुणा हवंति ॥९४॥
इय मोहविसं घायइ सिवोवएसा रसायणं होइ ।
गुणओ य मंगलत्थं कुणइ विणीओ अ जोग्गोत्ति ॥९५॥
मग्गाणुसारी पयाहिणा गंभीरो गरुअओ तहा होइ ।
कोहग्गिणा अडज्झो अकुत्थो सइ सील भावेणं ॥९६॥

(१०७) નિશ્ચય - વ્યવહાર

कुमततमोपहतदृशो जगतो भूतार्थबोधविधुरस्य ।
आदौ दर्शयति गुरुर्निश्चयनय-दीपिकामथवा ॥८॥
निश्चयतो निश्चयमागमत्त इव भिनत्ति व्यवहारमुद्राम्।
तस्य पदे व्यवहारो वज्रमयी शृंखलाक्षेप्या ॥९॥
- श्री धर्मपरीक्षायां ।

માર્ગ પરિશુદ્ધિ

अव्यवहारिणि जीवे निश्चयनयविषयसाधनं नास्ति ।
उपदेशो कथमपि न भवति खलु शास्त्रनिष्पत्तिः ॥१०॥

(१०८) નિશ્ચય - વ્યવહાર

नियता हि निश्चयाकूतेन नियतकारण-सामग्रीजन्या च
सकलकालं तद्ध्यानन्तकेवलिज्ञानगोचरीभूता च
समस्ताऽपि जगति बहिरंगान्तरंगकार्यपर्यायमाला,

ॐ

સા ચ યેયં પરિપાટ્યા વ્યવસ્થિતા યૈશ્ચ
કારણૈરાવિર્ભાવનીયા તયૈવ પરિપાટ્યા તાન્યેવ ચ
કારણાનિ આસાદ્ય આવિર્ભવતિ, કુતસ્તસ્યાકસ્મિકભાવઃ ?

- શ્રી ઉપમિતિ ભવપ્રપઞ્ચાયાં | પૃ. ૪૩૦

સર્વત્ર સર્વદા ઉચિત વ્યવહાર એ નિશ્ચયની કસોટી છે
અને સદા સર્વત્ર મધ્યસ્થભાવ તે વ્યવહારની કસોટી છે.
'અહં' 'મમ'ને નિવારવા નિશ્ચય છે અને
પ્રમાદને ટાળવા માટે વ્યવહાર છે.
એ રીતે બંને કસોટીમાંથી પસાર થનારા બંને સત્ય છે,
અન્યથા મિથ્યા છે.
નિશ્ચયની વિચારણા વ્યવહારની અપ્રવૃત્તિ માટે નહિ,
કિન્તુ પ્રવૃત્તિને મધ્યસ્થભાવપૂર્વક કરવા માટે છે.
કર્માદિ કારણસામગ્રી છે,
ત્યાં શુદ્ધ પ્રવૃત્તિ તો કરવી પડે એમ છે જ, પરન્તુ
તે મધ્યસ્થભાવે કરવી, તે મોક્ષમાર્ગ છે.

(૧૦૧) સૂક્ષ્મ પ્રશ્ન - આચારાંગ

શુભૌઘસંસ્થાનયોગાત્ શુભમવિપર્યસ્તમયેન
સામાન્યેન સુબહુવિશેષાવધારણાક્ષમં યત્સંસ્થાનં
વસ્તુતત્ત્વ - સંવેદનરૂપં તસ્ય યોગાત્ |

ॐ

ते हि बहिर्बहुश्रुतमपठन्तोऽपि अतितीक्ष्णसूक्ष्म-
प्रज्ञतया बहुपाठकस्थूलप्रज्ञपुरुषानुपलक्ष्यं
तत्त्वमवबुध्यन्त इति । तदुक्तं -
स्पृशन्ति शरवत्तीक्ष्णाः स्वल्पमन्तर्विशन्ति च ।
बहुस्पृशाऽपि स्थूलेन स्थीयते बहिरश्मवत् ॥१॥
- उपदेशपद टीका, पृ० १५३

(११०) आज्ञायोग

आह - यस्य बुद्धिर्न लिप्येत हत्वा सर्वमिदं जगत् ।
आकाशमिव पंकेन नाऽसौ पापेन लिप्यते ॥१॥
इत्यादि वचन प्रामाण्याद् भावशुद्धिरेव गवेषणीया,
किमाज्ञायोगेनेत्याशंक्याह -
तन्निरवेक्खो निहमा पडिणामो वि हु असुद्धओ चेव ।
तित्थगरेऽबहुमाणासग्गहरूवो मुणेयव्वो ॥१८७॥
तन्निरपेक्ष आज्ञाबाह्यः स्वेच्छामात्रप्रवृत्तो नियमाद्
निश्चयेन शुभोऽपि परिणामोऽन्तःकरणपरिणतिरूपो
अशुद्ध एव मलिन एव । कुतः यतः स तीर्थंकरे
भगवति सर्व जगज्जीववत्सले विषयभूतेऽबहुमानात्
बहुः प्रभूतः स्वात्माऽपेक्षया मानो मननं बहुमानः
तत् प्रतिषेधादबहुमानस्तस्माद्धेतुभूतात् सकाशात्
असद्ग्रहरूपोऽसुन्दराग्रहरूपो मुणितव्यो ज्ञेयः ।

ॐ

××× न हि यो यद्वचननिरपेक्षः प्रवर्त्तते स तत्र
बहुमानवान् भवति, यथा कपिलादिः सुगतशिवादौ
देवताविशेषे, जिनवचननिरपेक्षश्च गुरुकुलवासादि
-परित्यागेन शुद्धपिंडैषणादिकारी साधुः,
तस्माद् न भगवति बहुमानवान् इति ।
- उपदेशपद टीका, पृ० १५०

एवं च कार्यद्वयात्कृतकृत्यं
परमात्मानं स्तुतिकृत्प्रणिनंसुराह ।

(१११) मैत्री पवित्र पात्राय मुदितामोदशालिने ।
कृपोपेक्षाप्रतीक्ष्याय तुभ्यं योगात्मने नमः ॥ १५॥

कुतः पुनरयं मैत्र्यादियोगप्रकारः प्रभोरभूदित्याह
योगात्मने सिद्धाद्भुतयोगसम्पदे । एवंविधाय च तुभ्यं
त्वत्स्वरूप - प्राप्तिनिमित्तमहं प्रणतोऽस्मीति ।
पूर्वोक्तस्य सर्वस्य रहस्यभूतं मैत्र्यादिचतुष्कं प्रकाशयन्त
आहुः- योगात्मने योगस्वरूपाय तुभ्यं नमोऽस्त्विति ।
पृ० २८, श्री वीतरागस्तोत्र, तृतीय स्तवस्य टीकाऽवचूर्णिः ।

इदमत्र हृदयम् -

(११२) धर्मस्तावद्रागादि - मलविगमेन
पुष्टि - शुद्धिमच्चित्तमेव । पुष्टिश्च पुण्योपचयः,

शुद्धिश्च घातिकर्मणां पापानां क्षयेण वा काचिन्निर्मलता,
तदुभयं च प्रणिधानादिलक्षणेन भावेनाऽनुबन्धवद्भवति,
तदनुबन्धाच्च शुद्धि - प्रकर्षः संभवति,
निरनुबंधं च तदशुद्धिफलमेवेति न तच्छलक्षणम्,
ततो युक्तमुक्तं - प्रणिधानादिभावेन परिशुद्धः
सर्वोऽपि धर्मव्यापारः सानुबन्धत्वाद् योगः इति ।

(११२) शुद्ध धर्मनुं स्वरूप (१७) विंशिका, गा० १, टीका

रौद्री विषविकारादिवद्दारुणी खलु अवधारणे
संसारी - नरनारकादि - भ्रमणारूपः सर्वशरीरसाधारणः
पारमार्थिकव्याधिस्वभावतामापन्नो यतः,
ततः शुद्धो धर्म एव पंचनमस्कारस्मरणादिरूपं
औषधं निवृत्तिहेतुरस्य संसारस्य । यथोक्तम् -
'पंच नमोक्कारं खलु विहिदाणं सत्तिओ अहिंसा य ।
इंदिय-कसाय-विजओ एसो धम्मो सुहपओगो ॥ १ ॥'
एवमवगते येदेष पुनर्निर्णीतवान्,
तदाह - गुरुकुलसंवासे गुरोस्तत्तलक्षणस्य कुलं
परिवारस्तत्र सम्यक् तद्गतमर्यादया वासे सति
स शुद्धो धर्मो निश्चयतः परमार्थवृत्त्या संपद्यते ।
अनिश्चयरूपस्तु कृत्रिम - सुवर्णसदृशः
परीक्षाक्षमाणोऽन्यथाऽपि स्यात् ।

ॐ

न च तेन किंचित् संसारफलत्वेनाऽसारत्वात्
इति ज्ञातमेतेन मासतुषादिना साधुजडेनाऽपि सता।
- उपदेशपद, गा० १९४, टीका पृ० १५४

(११४) आत्मौपम्य

पृथिव्यादींश्च षट्कायान् सुखेच्छूं न सुखद्विषः।
गणयित्वाऽऽत्मतुल्यान् यो महाव्रतरतो भवेत् ॥१॥
- द्वात्रिंशद्द्वात्रिंशिका २७, श्लो० २, पृ० १६३

(११५) स्थानादि - ५ योग

स्थीयतेऽनेनेति स्थानं आसन - विशेषरूपं।
ऊर्णः शब्दः स च क्रियादावुच्चार्यमाण सूत्रवर्णलक्षणः।
अर्थः शब्दाभिधेयव्यवसायः, आलम्बनं बाह्यप्रतिमादि विषयध्यानम्, रहितः इति रूपिद्रव्यालंबन रहितो निर्विकल्प चिन्मात्र समाधि

रूप इत्येवं एष योगः पंचविधः।
तंत्रे योगप्रधानशास्त्रे प्रतिपादित इति शेषः। (१७)
विंशिका, गा० २, टीका

(११६) इच्छा - प्रीति - प्रयोग

एएइ चित्तरूवा तहा खओवसमजोगओ हुंति।
तस्स उ सद्धापीयाइजोगओ भव्वसत्ताणं ॥७॥

એતે ચ ઇચ્છાદયઃ ચિત્રરૂપાઃ પરસ્પરં વિજાતીયાઃ
સ્વસ્થાને ચાઽસંખ્યભેદભાજઃ, તસ્ય તુ અધિકૃતસ્ય
સ્થાનાદિ-યોગસ્યૈવ અર્થ-ઇદમિત્થમેવેતિ પ્રતિપત્તિઃ,
પ્રીતિઃ તત્કરણાદૌ હર્ષઃ આદિના-ધૃતિધારણાદિ-પરિગ્રહઃ।
××× ઇચ્છાયોગાદિવિશેષે આશયભેદાભિવ્યંગ્યઃ
ક્ષયોપશમભેદો હેતુરિતિ પરમાર્થઃ।
અત એવ યસ્ય યાવન્માત્રઃ ક્ષયોપશમઃ તસ્ય
તાવન્માત્રેચ્છાદિસંપત્ત્યા માર્ગે પ્રવર્તમાનસ્ય
સૂક્ષ્મબોધાઽભાવેઽપિ માર્ગાનુસારિતા
ન વ્યાહન્યતે ઇતિ સંપ્રદાયઃ। -ગા. ૭, વિંશિકા

(૧૧૭) અર્થાલંબન યોગ

અર્થઃ ઉપદેશપદ-પ્રસિદ્ધ-પદવાક્ય-
મહાવાક્યૈદંપર્યાર્થ-પરિશુદ્ધજ્ઞાનમ્, આલમ્બનં ચ પ્રથમે
દણ્ડકેઽધિકૃત-તીર્થકૃદ્, દ્વિતીયે સર્વતીર્થકૃતઃ,
તૃતીયે પ્રવચનમ્, ચતુર્થે સમ્યગ્ દૃષ્ટિઃ
શાસનાધિષ્ઠાયક ઇત્યાદિ તદ્યોગવતઃ-
તત્પ્રણિધાનવતઃ પ્રાયઃ બાહુલ્યેન અવિપરીતં તુ
અભીપ્સિત-પરમફલ-સંપાદકમેવ,
અર્થાલંબનયોગયોર્ધ્યાનયોગતયોપયોગરૂપત્વાત્,

ॐ

तत्सहितस्य चैत्यवंदनस्य भावचैत्यवंदनत्वसिद्धेः भावचैत्यवंदनस्य चाऽमृतानुष्ठानरूपत्वेनावश्यं निर्वाणफलत्वादिति भावः ।

प्राप्ते ग्रहणं सापायेयोगवद्व्यावृत्तार्थम् ।

- गा० १० - ११, टीका, विंशिका

(११८) तीर्थंकर - आहारक बंधहेतु

न हि णाम तित्थयराहाराणं बंधे सम्मत्त-संजमा हेऊ ।
इत्यनेन साक्षात्सम्यक्त्वसंयमावेव केवलौ तीर्थकराहारकद्विकयोर्बन्धहेतुत्वेन नोच्येते, किन्तु सहकारिकारणभूतौ विशेषहेतू, मौलं तु कारणमनयोरपि कषायविशेषा एव 'सेसा उ कसाए हिं' इति वचनप्रामाण्यात्, एतच्च प्रागेवोक्तम् ।

पंचसंग्रह, पृ० १८७/१

(११९) अध्यात्मादि योगनो स्थानादिमां समवतार

अथैतेषां मध्यात्मादीनां स्थानादिषु कुत्र कस्यान्तर्भावः इति चेद् - अध्यात्मस्य चित्रभेदस्य देवसेवा - जप - तत्त्वचिन्तनादिरूपस्य यथाक्रमं स्थाने ऊर्णेऽर्थे च । भावनाया अपि भावसमानविषयत्वात्तत्रैव ध्यानस्यालंबने । समता - वृत्तिसंक्षययोश्चातदन्ययोगा इति भावनीयम् । - योगविंशिका, गा० ३, टीका

(१२०) <u>मैत्र्यादि</u>

तत्राध्यात्मं उचितप्रवृत्तेर्व्रतभृतो मैत्र्यादिभावगर्भं
शास्त्राज्जीवादि - तत्त्व - चिन्तनम् ।१।
भावना अध्यात्मस्यैव प्रतिदिनं
प्रवर्धमानश्चित्तवृत्तिनिरोधयुक्तोऽभ्यासः ।२।
ध्यानं प्रशस्तैकार्थविषयं स्थिरप्रदीपसदृशमुत्पातादि
- विषयसूक्ष्मोपयोगयुतं चित्तं ।३।
समता अविद्या कल्पितेष्टानिष्टत्वसंज्ञा - परिहारेण
शुभाशुभानां विषयाणां तुल्यताभावनम् ।४।
वृत्तिसंक्षयश्च मनोद्वाराविकल्परूपाणां शरीरद्वारा
परिस्पंदरूपाणामन्यसंयोगात्मक -
वृत्तीनामपुनर्भावेन निरोधः ।५।
अथैतेषामध्यात्मादीनां स्थानादिषु कुत्र कस्यान्तर्भावः
इति चेद् उच्यते (ઉત્તર આગળ આપે છે.) - गा० ३, टीका

(१२१) <u>विष - गरलानुष्ठान स्वरूप</u>

इहरा उ कायवासिय पायं अहवा महामुसावाओ ।
ता अणुरूवाणं चिय कायव्वो एय विन्नासो ॥१२॥
इतरथा तु अर्थालंबन - योगाभाववतां स्थानादिमत्त्वा -
भावे तु तत् चैत्यवंदनानुष्ठानं कायवासितप्रायं
मानसोपयोग शून्यत्वात्,

ऐँ

उपलक्षणाद्ग्रामवासितप्रायमपि द्रष्टव्यं,
तथा चाननुष्ठानरूपत्वान्निष्फलमेतदिति भावः ।
अथवा इति दीक्षान्तरे, तच्चैत्यवन्दनानुष्ठानं
महामृषावादः, स्थानमौनध्यानैरात्मानं व्युत्सृजामि ।
इति प्रतिज्ञया विहितस्य चैत्यवंदनकायोत्सर्गादेः
स्थानादिभंगे मृषावादस्य स्फुटत्वात्,
स्वयं विधि विपर्ययप्रवृत्तौ परेषामेतदनुष्ठाने मिथ्यात्व
-बुद्धिजननद्वारा तस्य लौकिकमृषावादादतिगुरुत्वाच्च,
तथा च विपरीतफलं तेषामेतदनुष्ठानं सम्पन्नम् ।
येऽपिस्थानादिशुद्धमप्यैहिककीर्त्यादीच्छयाऽऽमुष्मिक -
स्वर्लोकादि-विभूतीच्छया वैतदनुष्ठानं कुर्वन्ति तेषामपि
मोक्षार्थकप्रतिज्ञया विहितमेतत्तद्विपरीतार्थतया
क्रियमाणं विषगरानुष्ठानान्तर्भूतत्वेन महामृषावादानु-
बन्धित्वाद्विपरीतफलमेवेति । -गा० १३, विंशिका

मुक्त्वा लोकसंज्ञां, लोक एव प्रमाणं इत्येवं रूपां
शास्त्रानिरपेक्षां मतिं वोढ्वा च । योगविंशिका टीका, गा० १६

व्यवहार-प्रतिभासो दुर्नयकृद्बालिशस्य भवबीजम् ।
व्यवहाराचरणं पुनरनभिनिविष्टस्य शिवबीजम् ॥११॥
गुरुपरतन्त्रस्यातो माषतुषादेः पुनश्च संसिद्धिः ।
स्फटिक इव पुष्परूपं तत्र प्रतिफलति गुरुबोधः ॥१२॥

(१२२) **भावना**

चित्तबालक ! मा त्याक्षीरजस्रं भावनौषधीः ।
यत्त्वां दुर्ध्यानभूताः न छलयन्ति छलान्विषः ॥५॥

समता चित्ताधीनेति चित्तस्यप्रधानमुद्देशः ।

गम्यागम्य-कार्याकार्य-हेयोपादेयपरिज्ञानविकलत्वेन-
चित्तस्य बालकरूपता ।

अणुत्वाच्च पलत्वाच्च चित्तस्यबालकोपमानं ।

भाव्यते-वास्यते वैराग्येण
आत्मा इति भावनाः, ता एव औषधयः

भावनायाश्च स्थैर्य-धैर्य-आपादकत्वेन औषधिरूपता ।

दुर्ध्यानानां पारवश्यापादकत्वेन - दौर्गत्योत्पादकत्वेन -
उन्मादादिजनकत्वेन च भूतरूपता । ते च कदाऽयं
जीवः शुभभावनौषधिरहित इति छलं अन्वेषयन्ति ।
नग्नत्वैकाकित्व-सन्ध्यासमयादिछलविलोकक भूतवत् ।

- अध्यात्म कल्पद्रुम, ९ अधिकार

(१२३) **मार्ग परिशुद्धि**

प्रव्रज्यार्हगुणविधि - प्रव्रजितो गुरुकुलाश्रितो नित्यं ।
अक्षतशीलः शान्तः सत्त्वस्थोऽवगत - सूत्रार्थः ॥१८॥

- पू. उपाध्यायजी महाराज

ॐ

(१२४) દીક્ષાદાતાના ગુણો

प्रवचन वात्सल्य युतः,
सत्त्वहितरतोऽनुवर्त्तको धीरः ।
गुर्वनुमतपदनिष्ठो
धर्मकथाकृज्ज्ञानादेयः ॥१९॥
अविषादी परलोके स्थिररहस्तो-
पकरणोपशमलब्धिः ।
कलिदोषान्मूलगुणैरेकादि-
गुणोज्झितोऽपि गुरुः ॥२०॥
प्रव्राज्य यो विनेयान्
शिक्षां ग्राहयति सम्यगनुवृत्तैः ।
स गुरुर्गुणमणिजलधिः
परः प्रतीपः प्रवचनस्य ॥२१॥

०

(१२५) વ્યવહાર ધર્મનું ફળ

व्यवहारवतस्तनुरपि बोधः सितपक्षचन्द्र इव वृद्धिं ।
इतरस्य याति हानिं, पृथुरपि-शितिपक्ष चन्द्र इव ॥१३॥
अवगत-समयोपनिषद् गुरुकुलवासः सतां सदा सेव्यः ।
आचारादौ निगदितमाद्यव्यवहारबीजमिदं ॥१४॥

ॐ

(१२६) ज्ञानगर्भ वैराग्य

एको नित्यस्तथाऽबद्धः क्षय्यसन्वेह सर्वथा ।
आत्मेति निश्चयाद् भूयो भवनैर्गुण्य - दर्शनात् ॥१॥
तत्त्यागायोपशान्तस्य सद्वृत्तस्यापि भावतः ।
वैराग्यं तद्गतं यत्तन् मोह गर्भमुदाहृतम् ॥२॥
भूयांसो नामिनो बद्धा बाह्येनेच्छादिना ह्यमी ।
आत्मानस्तद्वशात्कष्टं भवे तिष्ठन्ति दारुणे ॥३॥
एवं विज्ञाय तत्त्यागविधिस्त्यागश्च सर्वथा ।
वैराग्यमाहुः सज्ज्ञानसंगतं तत्त्वदर्शिनः ॥४॥

हा० १०, वैराग्याष्टकम्, श्लोक ४-५-६-७

इच्छादिना -
मिथ्यात्वाविरतिकषाययोगलक्षण -
बन्ध - हेतु जन्येन कर्मणेति भावः ।
इच्छादेश्च
बाह्यत्वमात्मव्यतिरिक्त -
कर्मकृतविकाररूपत्वादिति ।
स च भूयांसो
नामिनो बद्धाश्चेत्येवं
सम्बन्धी द्रष्टव्यः । - टीका

(१२७) त्रिसंध्य नमस्कार स्मरण

ता महाभाग ! करेहि किंचि धम्मकम्मं,
जेण जम्मंतरे सुहभाइणं होहि,
त्ति मुणीहिं भणिए चिंतियं ता संगएण को धम्मो,
कहं वा कीरइत्ति विन्नाणंपि मे नत्थि, दूरे तावतक्करणं,
वच्छल्लया य मम एगं तेण भगवओ,
ता करेमि उचियमेयाए संति । भणियं च भयवं !
कुवासदूसिया - अणभिन्ना धम्मसरूवस्स
तहा वि आणवेह जमम्हाणमुचियं ति ।
ततो साहूहि जोग्गं तमवगच्छिऊण उवइट्ठो
पंच नमोक्कारो, भद्द ! पावभक्खणो एस मंतो,
ता सव्वायरेण तुमए तिसंझं तओ पंच अट्ठ वा वारे
नियमओ पढियव्वो, विसेसओ भोयणसयणेसु, न मोत्तव्वो
खणंपि एत्थ बहुमाणो त्ति बहुविहमणुसा-
सिऊणमुवगया अन्नत्थ साहुणो ।
इयरीवि भावसारं गुरुवयणं चिरमणुचरिऊण,
सरीरपज्जवाइं काऊण, पंचनमोक्कारसरणा निच्छयओ
-वज्जियपुण्णप्पभावेण समुप्पन्नो पुहइवरंगणातिलए
सयल-सिरिकुलनिलए xxx देवीए कुच्छिंसि पुत्तत्ताए।

- उपदेश पद टीका, पृ० ४२१, गा० १०३१

अण्णोवि एत्थ धम्मे रयणसिहादी विसुद्धजोगरओ, ।
कल्लाणभाइणो इह सिद्धा णेगे महासत्ता ॥१०३१॥

(१२८) नमस्कार स्मरण

एय महाणिणाय सकोउगेण भणियं राइणा - भयवं
केरिसं पुण पुरा पुण्णमुवज्जियं मए,
जस्स फलं संपयमणुहवामि? भयवया भणियं -
पंच नमोक्कारस्सरण - निच्छय - माहप्पमिणं ।
अवि य । भद्दयभावो भव्वो एत्तो पावेइ सुद्ध - सम्मत्तं ।
सम्मदिट्ठी विरई विरओ सिवसंपयं खिप्पं ॥१॥
जं पुण सुहसोहग्गं रूवं लच्छी पहुत्त देवत्तं ।
एवं पलालकप्पं पसंगपत्तं अणप्पंपि ॥२॥
इय सव्वगुणट्ठाणगकारणमेसो महापभावो य ।
इह - परभव - सुहजणओ पहाणमंतो नमोक्कारो ॥३॥
एमाइगुणविसिट्ठे भगवया जिणेण णमुक्कारमाहप्पे,
निसामिऊण पुव्वभवो भवविरत्तचित्तो सुयस्स
रज्जं दाऊण, काऊण य विसुद्धं संजमं,
समुप्पण्णविमलकेवलो पाविओ
सिवपयं रयणसिहो महारिसित्ति ।
- पृ० ४३१, गा० १०३१, उपदेशपद टीका

(१२१) आराध्याराध्य रूप

यस्य चाराधनोपायः सदाऽऽज्ञाऽऽराध्य एव हि ।
यथाशक्तिविधानेन नियमात्स फलप्रदः ॥ १ ॥
- श्री महादेवाष्टक १, श्लो० ६

आराधनं प्रसादनं आराधनमिवाराधनं तत्फलप्रसाधक -त्वात्, न पुनराराधनमेव सरागत्वप्रसंगात् ॥
प्रसादाभावेऽपि च प्रसादफल सिद्धिर्वस्तुस्वभावत्वात् ।
आह च - वत्थुसहावो एसो अउव्व चिंतामणी महाभागो ।
थोऊणं तित्थयरे पाविज्जइ बोहिलाभोत्ति ॥ १ ॥
पाविज्जइ वंछिओ अत्थो ॥ १ ॥
तथा उवगाराभावम्मि वि, पुज्जाणं पूयगस्स उवयारो ।
मन्ताइ सरणजलणाइ सेवणे जह तहेहं पि ॥ २ ॥
xxx आराध्यन्ते अभिगम्यन्ते मर्यादया अभिविधिना वा अर्था यया सा आज्ञा - आगमः, तस्या अभ्यासो ग्रहण - भावना - पारतन्त्र्यलक्षणा - आज्ञाऽऽराध्यः, स एव, न पुनस्तद्भक्तितोऽपि तदाज्ञोपेता प्रवृत्तिः ।
पूजादिकं तु तदाज्ञाऽऽराध्य एव यस्य द्रव्यस्तव - भावस्तव - रूपत्वात् ।
ननु यथोक्तस्याज्ञाऽऽराधस्यातिदुष्करत्वात्काल-

संहननादि - दोषवतामनाराधनप्रसंग इत्याशंक्याह -
यथाशक्तिः, शक्तेः शरीर-सामर्थ्यस्यानतिक्रमेण,
तेन शक्तेरनुलंघनेनागमोपायेन न चेत्यर्थः ।
एवं हि वार्याचारः कृतो भवति ।
विधानेन विधिना, द्रव्यक्षेत्रकालभावानुवर्त्तन-
लक्षणेनायव्ययतुलनारूपेणागमिकन्यायेनेति भावः ।
आह च - तम्हा सव्वाणुण्णा
सव्वनिसेहो य पवयणे नत्थि ।
आयं वयं तुलेज्जा, लाहाकंखि व्व वाणियओ ॥
ननु आराध्यासेनाराधितो यद्यसौ फलप्रदोऽनाराधित
स्तर्हि न तथा स्यादित्येवं विषमवृत्तिरसौ स्यादिति
अत आह - नियमात् अवश्यंभावेन
स एव आराध्यासो यस्य सम्बन्धी,
फलप्रदोऽभिप्रेतार्थसाधको महादेवः स उच्यते ।
अतस्तस्य फलाप्रदायित्वात्,
तदाराध्यासस्यैव च फलसाधकत्वात्
कुतो विषमवृत्तित्वदोष इति ॥ ६ ॥
भक्तिश्च प्रीतिविशेषः ।
- हारिभद्रीय, प्रथमाष्टक टीका ।

ૐ

(૧૩૦) આત્મૌપમ્ય ભાવ

સર્વ ધર્માન્ પરિત્યજ્ય મામેકં શરણં વ્રજ ।
અહં ત્વા સર્વ પાપેભ્યો મોક્ષયિષ્યામિ મા શુચઃ ॥
- 'ગીતા', અ. ૧૮, શ્લો. ૬૫

યોગસ્થઃ કુરુ કર્માણિ । સંગં ત્યક્ત્વા ધનંજય !।
સિદ્ધ્યસિદ્ધ્યોઃ સમો ભૂત્વા સમત્વં યોગ ઉચ્યતે ॥
- અ. ૨, શ્લો. ૪૮

કર્મણ્યેવાધિકારસ્તે મા ફલેષુ કદાચન ।
મા કર્મ ફલ હેતુર્ભૂર્મા તે સંગોસ્ત્વકર્મણિ ॥
- અ. ૨, શ્લો. ૪૭

મન્મના ભવ મદ્ભક્તો મદ્યાજી માં નમસ્કુરુ ।
મામેવૈષ્યસિ સત્યં તે, પ્રતિજાને પ્રિયોઽસિ મે ॥
- અ. ૧૮, શ્લો. ૬૬

ઉપરના થોડા શબ્દોના વિશિષ્ટ અર્થ

મન્મના - મારી ઇચ્છાને આધીન થાઓ.
મદ્ભક્તો - તમારા અહંકારને, જુદાઈને છોડી દો.
મદ્યાજી - સ્વાર્થનો ભોગ આપી નિઃસ્વાર્થ કર્મ કરો.
માં નમસ્કુરુ - બાહ્ય વસ્તુઓમાં ભાવ રાખો છો, તેના કરતાં મારામાં વધારે ભાવ રાખતાં શીખો.

## પ્રભુની આજ્ઞા

आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन ।
सुखं वा यदि वा दुःखं स योगी परमो मतः ॥

- अ० ६, श्लो० ३२

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥

- अ० ६, श्लो० २९

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥

- अ० ६, श्लो० ३०

बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥

- अ० ७, श्लो० १९

मामुपेत्य पुनर्जन्म - दुःखालयमशाश्वतम् ।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ॥

- अ० ८, श्लो० १५

यत्र योगेश्वरः कृष्णः यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥

- अ० १८, श्लो० ७८

ॐ

**અર્થ** : જ્યાં જીવોને આનંદ આપવાવાળા તથા આત્મહિત કરવાવાળા યોગેશ્વર ભગવાન છે અને જ્યાં ધનુર્ધારી અર્જુન સરીખે જ જાગેલો જીવ છે, પુરુષાર્થ કરવાવાળો - પવિત્ર વૈરાગ્યભાવવાળો જીવ છે, પ્રભુના કૃત્યો પાળવાની કુશળતાવાળો તથા પોતાના મનની લગામ ઈશ્વરને સોંપી દેવાવાળો - ભગવદ્ ઈચ્છાને આધીન થયેલો જીવ છે, ત્યાં જ લક્ષ્મી, વિજય, વૈભવ, નીતિ છે - એમ મારી મત છે.

તદ્વિદ્ધિ પ્રણિપાતેન પરિપ્રશ્નેન સેવયા ।
ઉપદેક્ષ્યંતિ તે જ્ઞાનં જ્ઞાનિનસ્તત્ત્વદર્શિનઃ ॥
- અ૦ ૮, શ્લો૦ ૩૪

ન કર્તૃત્વં ન કર્માણિ લોકસ્ય સૃજતિ પ્રભુઃ ।
ન કર્મફલસંયોગં સ્વભાવસ્તુ પ્રવર્તતે ॥
- અ૦ ૫, શ્લો૦ ૧૪

ઈશ્વરઃ સર્વભૂતાનાં હૃદ્દેશેઽર્જુન ! તિષ્ઠતિ ।
ભ્રામયન્ સર્વભૂતાનિ યંત્રારૂઢાનિ માયયા ॥
- અ૦ ૧૮, શ્લો૦ ૬૧

યથૈધાંસિ સમિદ્ધોઽગ્નિર્ભસ્મસાત્કુરુતેઽર્જુન ! ।
જ્ઞાનાગ્નિઃ સર્વકર્માણિ ભસ્મસાત્કુરુતે તથા ॥
- અ૦ ૪, શ્લો૦ ૩૭

ૐ

## ભગવદ્ ગીતામાંથી લખેલાં શ્લોકો

અપિ ચેદસિ પાપેભ્યઃ સર્વેભ્યઃ પાપકૃત્તમઃ ।
સર્વં જ્ઞાનપ્લવેનૈવ વૃજિનં સંતરિષ્યસિ ॥
- અ૦ ૪, શ્લો૦ ૩૬

સર્વભૂતેષુ યેનૈકં ભાવમવ્યયમીક્ષતે ।
અવિભક્તં વિભક્તેષુ તજ્જ્ઞાનં વિદ્ધિ સાત્ત્વિકં ॥
- અ૦ ૧૮, શ્લો૦ ૨૦

પૃથક્ત્વેન તુ યજ્જ્ઞાનં નાનાભાવાન્ પૃથગ્વિધાન્ ।
વેત્તિ સર્વેષુ ભૂતેષુ તજ્જ્ઞાનં વિદ્ધિ રાજસમ્ ॥
- અ૦ ૧૮, શ્લો૦ ૨૧

યત્તુ કૃત્સ્નવદેકસ્મિન્ કાર્યે સક્તમહૈતુકમ્ ।
અતત્ત્વાર્થવદલ્પં ચ તત્તામસમુદાહૃતમ્ ॥
- અ૦ ૧૮, શ્લો૦ ૨૨

યાવાનર્થ ઉદપાને સર્વતઃ સંપ્લુતોદકે ।
તાવાન્સર્વેષુ વેદેષુ બ્રાહ્મણસ્ય વિજાનતઃ ॥
- અ૦ ૨, શ્લો૦ ૪૬

શ્રેયાન્ દ્રવ્યમયાદ્યજ્ઞાત્ જ્ઞાનયજ્ઞઃ પરંતપઃ ।
સર્વં કર્માખિલં પાર્થ! જ્ઞાને પરિસમાપ્યતે ॥
- અ૦ ૪, શ્લો૦ ૩૩

ॐ

ભગવદ્ ગીતામાંથી લખેલાં શ્લોકો

યસ્ત્વાત્મરતિરેવ સ્યાદાત્મતૃપ્તશ્ચ માનવઃ ।
આત્મન્યેવ ચ સંતુષ્ટસ્તસ્ય કાર્યં ન વિદ્યતે ॥
- અ૦ ૩, શ્લો૦ ૧૭

નૈવ તસ્ય કૃતેનાઽર્થો નાઽકૃતેનેહ કશ્ચન ।
ન ચાઽસ્ય સર્વેષુ ભૂતેષુ કશ્ચિદર્થવ્યપાશ્રયઃ ॥
- અ૦ ૩, શ્લો૦ ૧૮

યસ્ય સર્વે સમારંભાઃ કામ - સંકલ્પવર્જિતાઃ ।
જ્ઞાનાગ્નિદગ્ધકર્માણં તમાહુઃ પણ્ડિતં બુધાઃ ॥
- અ૦ ૪, શ્લો૦ ૧૯

અસંયતાત્મના યોગો દુષ્પ્રાપ ઇતિ મે મતિઃ ।
વશ્યાત્મના તુ યતતા શક્યોઽવાપ્તુમુપાયતઃ ॥
- અ૦ ૬, શ્લો૦ ૩૬

પ્રશાંત મનસં હ્યેનં યોગિનં સુખમુત્તમમ્ ।
ઉપૈતિ શાંતરજસમ્ બ્રહ્મભૂતમકલ્મષમ્ ॥
- અ૦ ૬, શ્લો૦ ૨૭

શક્નોતીહૈવ યઃ સોઢું પ્રાક્ શરીરવિમોક્ષણાત્ ।
કામ - ક્રોધોદ્ભવં વેગં સ યુક્તઃ સ સુખી નરઃ ॥
- અ૦ ૫, શ્લો૦ ૨૩

ભગવદ્ ગીતામાંથી લખેલાં શ્લોકો

બાહ્યસ્પર્શેષ્વસક્તાત્મા વિંદત્યાત્મનિ યત્સુખમ્ ।
સ બ્રહ્મયોગ યુક્તાત્મા સુખમક્ષયમશ્નુતે ॥
- અ૦ ૫, શ્લો૦ ૨૧

ઉદ્ધરેદાત્મનાઽઽત્માનં નાત્માનમવસાદયેત્ ।
આત્મૈવ હ્યાત્મનો બન્ધુરાત્મૈવ રિપુરાત્મનઃ ॥
- અ૦ ૬, શ્લો૦ ૫

બન્ધુરાત્માઽઽત્મનસ્તસ્ય યેનાઽઽત્મૈવાત્મના જિતઃ ।
અનાત્મનસ્તુ શત્રુત્વે વર્તેતાત્મૈવ શત્રુવત્ ॥
- અ૦ ૬, શ્લો૦ ૬

ઇન્દ્રિયાણિ પરાણ્યાહુરિન્દ્રિયેભ્યઃ પરં મનઃ ।
મનસસ્તુ પરા બુદ્ધિર્યો બુદ્ધેઃ પરતસ્તુ સઃ ॥
- અ૦ ૩, શ્લો૦ ૪૨

એવં બુદ્ધેઃ પરં બુદ્ધ્વા સંસ્તભ્યાત્માનમાત્મના ।
જહિ શત્રું મહાબાહો ! કામરૂપં દુરાસદં ॥
- અ૦ ૩, શ્લો૦ ૪૩

યે હિ સંસ્પર્શજા ભોગા દુઃખયોનય એવ તે ।
આદ્યંતવંતઃ કૌંતેય ! ન તેષુ રમતે બુધઃ ॥
- અ૦ ૫, શ્લો૦ ૨૨

ॐ

यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ ।
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥
- अ० २, श्लो० १५

मात्रा स्पर्शांस्तु कौंतेय ! शीतोष्ण - सुख - दुःखदाः ।
आगमापायिनोऽनित्यांस्तां तितिक्षस्व भारत ! ॥
- अ० २, श्लो० १४

भोगैश्वर्य प्रसक्तानां तयापहृतचेतसाम् ।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ॥
- अ० २, श्लो० ४४

नाऽस्ति बुद्धिरयुक्तस्य न चाऽयुक्तस्य भावना ।
न चाऽभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥
- अ० २, श्लो० ६६

आपूर्यमाणमचलप्रतिष्ठं
समुद्रमापः प्रविशन्ति यद्वत् ।
तद्वत्कामा यं प्रविशांति सर्वे
स शान्तिमाप्नोति न कामकामी ॥ - अ० २, श्लो० ७०

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥
- अ० १६, श्लो० २१

काम एष क्रोध एष रजोगुण समुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥
-अ० ३, श्लो० ३७

अथ केन प्रयुक्तोऽयम् पापं चरति पुरुषः ।
अनिच्छन्नपि वार्ष्णेय ! बलादिव नियोजितः ॥
-अ० ३, श्लो० ३६

धूमेनाव्रियते वह्निर्यथादर्शो मलेन च ।
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम् ॥
-अ० ३, श्लो० ३८

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ।
कामरूपेण कौन्तेय ! दुष्पुरेणाऽनलेन च ॥
-अ० ३, श्लो० ३९

(१३१) मैत्र्यादि भावो

सुखचिन्ता मता मैत्री सा क्रमेण चतुर्विधा ।
उपकारि स्वकीय स्वप्रतिपन्नाखिलाश्रया ॥१॥

सुखचिन्ता सुखेच्छा मैत्री मता ।
उपकारी स्वोपकारकर्ता, स्वकीयोऽनुपकर्ताऽपि
नालप्रतिबद्धादिः, स्वप्रतिपन्नश्च स्वपूर्वपुरुषाश्रितः
स्वाश्रितो वा, अखिलाश्च प्रतिपन्नान्यसंबंध-निरपेक्षाः,

सर्व एव तदाश्रया तद्विषया ।
तदुक्तं - उपकारिस्वजनेतर सामान्यगता
चतुर्विधा मैत्रीति ॥ - योगभेद द्वात्रिंशिका, श्लो० ३
करुणा दुःखहानेच्छा मोहाद्दुःखितदर्शनात् ।
संवेगाच्च स्वभावाच्च प्रीतिमत्स्वपरेषु च ॥४॥
दुःखहानस्य दुःखपरिहानस्येच्छा करुणा ।
सा च मोहादज्ञानादेका ।
यथा ग्लान - याचिताऽपथ्य - वस्तुप्रदानाभिलाषलक्षणा ।
अन्या च दुःखितस्य दीनादेर्दर्शनात् तस्य लोक -
प्रसिद्धाहारवस्त्रशयनासनादिप्रदानेन
संवेगान्मोक्षाभिलाषाच्च सुखितेष्वपि
सत्त्वेषु प्रीतिमत्सु सांसारिक - दुःख -
परित्राणेच्छा धर्मस्थानां अपरा ।
अपरा पुनरपरेषु च प्रीतिमत्ता संबंधिविकलेषु
सर्वेष्वेव स्वभावाच्च प्रवर्तमाना केवलिनामिव
भगवतां महामुनीनां सर्वानुग्रह -
परायणानामित्येवं चतुर्विधा ।
आपातरम्ये सद्धेतावनुबन्धयुते परे ।
सन्तुष्टिर्मुदिता नाम सर्वेषां प्राणिनां सुखे ॥५॥

मुदिता नाम सन्तुष्टिः, सा च तत्काल-
मात्ररमणीये स्वपरगते वैषयिकसुखे।
द्वितीया तु सद्वैतौशमनकारणे ऐहिकसुखविशेष
एव परिदृष्टहितमिताहारपरिभोगजनित-
स्वादुरसास्वादसुखकल्पे।
तृतीया चाऽनुबन्धहेतोऽव्यवच्छिन्न - सुखपरंपरया
देवमनुजजन्मसु कल्याणप्राप्ति लक्षणे
इहपर भवानुगते।
चतुर्थी तु परे प्रकृष्टे मोहक्षयादिसंभवे अव्याबाधे च
सर्वेषां प्राणिनां सुखे इत्येवं चतुर्विधा॥ श्लोक-५
करुणातोऽनुबन्धाच्च निर्वेदात्तत्त्वचिन्तनात्।
उपेक्षा ह्यहितेऽकाले सुखेऽसारे च सर्वतः॥६॥
उपेक्षा हि माध्यस्थ्यलक्षणा।
करुणातोऽहिते विषये भवत्येका,
यथातुरस्य स्वातंत्र्यादपथ्यं सेवमानस्य करुणया
तन्निवारणमवधार्योपेक्षा क्रियते।
अपरा चाऽनुबन्धादायत्यालोचनेन
कार्य - विषय - प्रवाह - परिणामादकालेऽनवसरे,
यथा कश्चिदालस्यादेरर्थार्जनादिषु न प्रवर्तते,

ॐ

तं चाऽप्रवर्तमानं कदाचितद्धितार्थी प्रवर्तयति,
कदाचित्तु परिणामसुन्दरं कार्य - सन्तानमनवेक्षमाणो
माध्यस्थ्यमवलंबत इति ।
अन्या च निर्वेदात्मकसुखवैराग्यादसारे
बहुतर - दुःखानुविद्धत्वेन दुःखानतिविशिष्टे सुखे,
यथा सर्वेन्द्रियोत्सवकरं सांसारिक -
सुखमनुपरतयतोऽपि योगिनः ।
इतरा च तत्वचिन्तनान्मनोरमामनोरमानां
वस्तूनां परमार्थतो रागद्वेषानुत्पादकत्वस्य
स्वापराधस्यैव च मोहादि - कर्मविकारसमुत्थस्य
भावनात् सर्वतः सर्वत्रैव स्वव्यतिरिक्तस्य
कस्याऽपि सुख - दुःख - हेतुत्वानाश्रयणात् ।
उक्तभेदानामेतासां मैत्र्यादीनां यथाक्रमं परिणमनानां
विशुद्ध - स्वभावनामेवाऽध्यात्मयोगा
इति फलद्वारा दर्शयन्नाह -
सुखीर्ष्यां दुःखितोपेक्षां पुण्यद्वेषमधर्मिषु ।
रागद्वेषौ त्यजन्नेता लब्ध्वाध्यात्मं समाश्रयेत् ॥
सुखिष्वीर्ष्यां, न तु साध्वेषां सुखित्वमिति मैत्र्यां ।
दुःखितानामुपेक्षां, न तु कथं नु नामैतेषां
दुःखविमुक्तिः स्यादिति कृपां ।

ॐ

पुण्ये प्राणिनां सुकृते हर्षं,
न तु तदनुमोदनेन हर्षं । अद्यापि तु रागद्वेषौ, न तूपेक्षां ।
त्यजन् परिहरन्नेताः परिणतिशुद्धा
मैत्र्याद्या लब्ध्वा अध्यात्मं समाश्रयेत् ।
निष्पन्न-योगानां हि मैत्र्यादिरहितं सद्बोधमेव
स्वभावतः परार्थसारं चित्तं ।
योगारंभकाणां त्वभ्यासादेव सुखोत्कर्षादित्यागेन
मैत्र्यादि-विशुद्धिरिति ।
तदुक्तं - एताः खल्वभ्यासात् क्रमेण
वचनानुसारिणां पुंसां ।
सद्वृत्तानां सततं शुद्धानां (आद्यानां) परिणमन्त्युच्चैः ॥१॥
ततश्च निरपायोऽध्यात्मलाभ इति स्थितम् ।
पतञ्जलिरप्याह - मैत्रीकरुणामुदितोपेक्षाणां
सुखदुःख - पुण्यापुण्य - विषयाणां
भावनातश्चित्त प्रसादनमिति । (१-३३) ॥७॥
अतः पापक्षयः सत्त्वं शीलं ज्ञानं च शाश्वतम् ।
तथाऽनुभव संसिद्धममृतं ह्यद एव नु ॥८॥
अतोऽध्यात्मात् पापक्षयो ज्ञानावरणादिक्लिष्ट कर्मप्रलयः ।
सत्त्वं वीर्योत्कर्षः । शीलं चित्तसमाधिः ।

ज्ञानं च वस्त्वबोधिरूपम् शाश्वतमप्रतिघं ।
तथा अनुभव - संसिद्धं स्वसंवेदन - प्रत्यक्षं, अमृतं
पीयूषं हि स्फुटं, अद एवाध्यात्ममेव नु अतिदारुण -
मोहविषविकार - निराकारकारकत्वादस्येति ॥ ८ ॥

भाववृद्धिः शुद्धसत्त्व - समुत्कर्षरूपा ।
अशुभाभ्यासात् कामक्रोधादि परित्यागात् निवृत्तिरूपरतिः ।
भावनाया एव पटुतर-भावना-जनकत्व निश्चयात् ॥१०॥

समितिगुप्तीनां प्रपंचो यथा पर्यायं विस्तारो योगा उच्यते ।
उत्तम उत्कृष्टः, न तु समिति-गुप्ति-विभिन्न-स्वभावो
योगा - पदार्थोऽतिरिक्तः कोऽपि विद्यत इति ॥ २० ॥

अत एव च योऽर्हन्तं स्वद्रव्यगुणपर्यायैः ।
वेदात्मानं स एव स्वं वेदेत्युक्तं महर्षिभिः ॥ २० ॥

पृ० १२३, योगावतार द्वात्रिंशिका, श्लो० २०

येन एव दलतया परमात्मैव जीवात्मा,
अत एव च योऽर्हन्तं तीर्थकरं स्वद्रव्यगुणपर्यायैर्निज-
शुद्धात्मकेवल ज्ञान-स्वभाव-परिणमन लक्षणैर्वेद जानाति,
स एव स्वमात्मानं वेद तत्त्वतो जानाति,
तथाज्ञानस्य तथाध्यान द्वारा तथासमापत्ति -
जनकत्वादिति महर्षिभिरुक्तं ।

યતઃ પઠ્યતે - જો જાણઇ અરહંતે દવ્વત્તગુણત્તપજ્જયત્તેહિં ।
સો જાણઇ અપ્પાણં મોહો ખલુ જાઇ તસ્સ લયં ॥૧॥

ન ચૈતદ્ગ્રન્થકર્તુર્દિગમ્બરત્વેન મહર્ષિત્વાભિધાનં
ન નિરવદ્યમિતિ મુગ્ધધિયા શંકનીયં,
સત્યાર્થ - કથન - ગુણેન - વ્યાસાદીનામપિ
હરિભદ્રાચાર્યૈસ્તથાભિધાનાદિતિ દ્રષ્ટવ્યં । - શ્લો૦ ૨૦

'ન ખલ્વયં સ્થિરાદિદૃષ્ટિમતાં ભિન્નગ્રન્થીનાં યોગિનાં યથાવિષયં નયભેદાવબોધાત્પ્રવૃત્તિરપિ અમીષાં પરાર્થ-શુદ્ધબોધ ભાવેન વિનિવૃત્તાગ્રહતયા મૈત્ર્યાદ્યપારતંત્ર્યેણ
ગંભીરોદારાશયત્વાચ્ચારિચરક -
સંજીવિન્યચરકચારણનીત્યેત્યાહુઃ ॥ ૨૪ ॥'

(૧૩૨) મૈત્ર્યાદિ ભાવો

ઇહાઽપિ લબ્ધયશ્ચિત્રાઃ પરમ ચ મહોદયઃ ।
પરમાયત્તતા ચૈવ યોગકલ્પતરોઃ ફલમ્ ॥૩॥
- યોગમાહાત્મ્ય દ્વાત્રિંશિકા

ઇહ સિદ્ધિષુ વૈચિત્ર્યે બીજં કર્મક્ષયાદિકમ્ ।
સંયમશ્ચાઽત્ર સદસત્પ્રવૃત્તિવિનિવૃત્તિતઃ ॥૨૨॥
સિદ્ધિષુ વૈચિત્ર્યે કર્મક્ષયાદિકમ્ બીજમ્ ।
તથાજ્ઞાને તથાજ્ઞાનાવરણક્ષયોપશમાદેર્વીર્ય
વિશેષે ચ વીર્યાન્તરાય ક્ષયોપશમાદેર્હેતુત્વાત્ ।

संवेगश्चात्रोक्तासिद्धिषु सत्प्रवृत्त्यसन्निवृत्तिभ्यां
तथाविधक्षयोपशमाधानद्वारैव बीजं न तु
तत्तद्विषय - राग - प्रणिधानादि - रूपः ।
अनंत-विषयक-रागस्य प्रतिविषयं संवेगासाधकत्वाद्वि
-हितानुष्ठान-प्रणिधानमात्र-संवेगेनैव मोक्षयात्तदुपपत्तेः।
चित्तप्रणिधानार्थं त्वालंबनमात्रं क्वापि न वारयामः ।
केवलमात्मप्रणिधानपर्यवसान एव सर्वः संवेगः
फलवानित्यात्मनो ध्येयत्वं विना सर्वं विलूनशीर्णं
भवेदित्यधिकं स्वयमूहनीयम् ।

निकाचितानामपि यः कर्मणां तपसा क्षयः ।
सोऽभिप्रेत्योत्तमं योगमपूर्वकरणोदयम् ॥२४॥

'तवसा उ निकाइआणंपि' इति वचनात् ।
सोऽपूर्वकरणोदयं उत्तमं योगं धर्मसन्न्यासलक्षणमभिप्रेत्य ।
न तु यत्किंचित्तप इति द्रष्टव्यम् । - श्लो० २४, टीका

(१३३) **ईशानुग्रह**

आर्षं व्यापारमाश्रित्य तदाज्ञापालनात्मकम् ।
युज्यते परमेशस्यानुग्रहस्तंत्रनीतितः ॥७॥

ततः सामर्थ्यप्राप्तं, न तु प्रसह्य तेनैव कृतं ।
तदाज्ञापालनात्मकं व्यापारमाश्रित्य । परं केवलं ।

तन्मनीतितोऽस्मात्सिद्धान्तनीत्या ईशस्यानुग्रहो ह्युच्यते ।
तदुक्तं - 'आर्थं व्यापारमाश्रित्य, न च दोषोऽपि विद्यते ।'

एवं च प्रणवेनैतज्जपात् प्रत्यूहसंक्षयः ।
प्रत्यक् चैतन्य - लाभश्चेत्युक्तं ह्युक्तं पतंजलेः ॥८॥

एवं चार्थव्यापारेणेशानुग्रहादेः च । प्रणवेनोंकारेण ।
एतस्येश्वरस्य जपात् । प्रत्यूहानां विघ्नानां संक्षयः ।
विषयप्रातिकूल्ये नाऽन्तः करणाभिमुख्यं चाति यत्तत्
प्रत्यक् चैतन्यं ज्ञानं तस्य लाभश्च ।
इति पतंजलेरुक्तं ह्युक्तं । तस्य वाचकः प्रणवः,
तज्जपस्तदर्थभावनं,
ततः प्रत्यक् चैतनाधिगमोऽन्तरायाभावश्चेति प्रसिद्धेर्गुण-
विशेषवतः पुरुषस्य प्रणिधानस्य महाफलत्वात् ॥८॥

- ईशानुग्रह विचार १६

रजस्तमोमयाद्दोषाद्विक्षेपाश्चेतसो ह्यमी ।
सोपक्रमाः जपान्नाशं यान्ति शक्तिहतिं परे ॥१३॥

विक्षेपा एकाग्रताविरोधिनः परिणामाः ।
जपाद् भगवति प्रणिधानात् नाशं यान्ति ।
शक्तिहतिं दोषानुबन्धशक्तिभंगं । उभयथापि योग-
प्रतिबन्ध - सामर्थ्यमेषामपगच्छति इति भावः ॥१३॥

ऐँ

प्रत्यक् चैतन्यमप्यस्माद् अन्तर्ज्योतिः प्रभामयम् ।
बहिर्व्यापाररोधेन ध्यायमानं मतं हि नः ॥ १४ ॥

अस्माद्भगवज्जापात् ।
बहिर्व्यापाररोधेन शब्दादिबहिरर्थग्रहत्यागेन ।
अन्तर्ज्योतिः प्रभा ज्ञानादिविशुद्धिविस्तारः,
तन्मयं प्रत्यक् चैतन्यमपि हि ध्यायमानं मतं नोऽस्माकं,
तथैव भक्ति - श्रद्धाद्यतिशयोपपत्तेः ।

योगातिशयतश्चायं स्तोत्रकोटिगुणः स्मृतः ।
योगदृष्ट्या बुधैर्दृष्टो ध्यानविश्रामभूमिका ॥ १५ ॥

योगातिशयतश्चाऽऽध्यात्मान्तर - परिणामोत्कर्षाच्च ।
अयं जपः । स्तोत्रकोटिगुणः स्मृतः चिरंतनाचार्यैः ।
वाग्योगापेक्षया मनोयोगस्याधिकत्वात् ।
अत एव मौन - विशेषेणैव जपः प्रशस्यते ।
तथा बुधैर्विशारदैर्योग दृष्ट्या योगजप्रातिभस्थानेन ।
ध्यानस्य विश्रामभूमिका पुनरारोहस्थानं दृष्टः ॥१५॥

माध्यस्थ्यमवलंब्यैव देवतातिशयस्य च ।
सेवा सर्वैर्बुधैरिष्टा कालातीतोऽपि यज्जगौ ॥ १६ ॥

माध्यस्थ्यमनिर्णीतविशेष -
कलहाभिनिवेशाभावलक्षणं अवलंब्यैव ।

ॐ

देवतातिशयस्य च विशिष्टदेवतायाश्च
च सेवा - स्तवनध्यानपूजनादिरूपा ।
सर्वैर्बुधैरिष्टा तन्निमित्तक - फलार्थत्वेनाभिमता ।
स्तवनादि - क्रियायाः स्वकर्तृकायाः फलदान -
समर्थत्वेऽपि स्तवनीयाद्यालंबनत्वेन तस्याः स्तोत्रादेः
फललाभस्य स्तोतव्यादिनिमित्तकत्व व्यवहारात् ।
विशेषस्यापरिज्ञानादयुक्तीनां जातिवादतः ।
प्रायशोऽविशेषितस्यैव फलाभेदाच्च भावतः ॥२०॥
फलस्य क्लेशक्षयलक्षणस्य गुणप्रकर्षविशेषवत् -
पुरुषाराधनसाध्यस्य क्वाचित्कानित्यत्वादौ विशेषे
आराध्यगते सत्यप्यभेदादविशेषाच्च । भावतः परमार्थतः ।
गुणप्रकर्ष-विषयस्य बहुमानस्यैव फलदायकत्वात्तस्य
सर्वत्र मुक्तादावविशेषात् इति ॥२०॥
अनुष्ठानं ततः स्वामिगुणरागपुरःसरम् ।
परमानन्दतः कार्यं मन्यमानैरनुग्रहम् ॥ २२ ॥
ईशानुग्रह विचार १६

(१३४) जिन महत्त्व

धृतिः पतन-प्रतिबंधकः संयोगः, आदिनास्थिति ग्रहः ।
धर्मादिजन्यत्वात् । आदिना स्वभावादिग्रहः ।

ॐ

नाऽत्र जगत्कर्तृत्वे मानता प्रमाणता ।
एतस्य चाऽक्षरस्य प्रशासने गार्गीद्यावा -
पृथिवी विधृते तिष्ठतः ।
उक्तश्रुतावक्षरप्रशासनपदयोः
संग्रहाभिमतैकात्मतत्त्व - परतया नाऽनुपपत्तिः ।
जिनमहत्त्व, द्वा० ४, श्लो० १२ टीका

धृत्यादेरपि धर्मादिजन्यत्वान्नाऽत्र मानता ।
कृतित्वेनाऽपि जन्यत्वाच्चेत्यन्यत्रैष विस्तरः ॥ १२ ॥
तथा च कुशलचित्तस्य न मुख्यत्वं
निर्मोहत्वविरोधादित्यर्थः ।
सरागत्वे तु प्रशस्तरागदशायां तु ।
एतद्बोध्यादि - प्रार्थना - कल्पं ।
आदिनाऽऽरोग्योत्तमसमाधिग्रहः। साध्व्यपि प्रशस्तमपि ।
असंभवि - विषयकयोरपि वाङ्मनसोः प्रशस्त -
भावोत्कर्षकत्वेन चतुर्भंगान्तःपातित्वसंभवात् ।
तदुक्तम् - 'बोध्यादिप्रार्थना कल्पं सरागत्वे तु साध्व्यपि ।'
ननु चतुर्थ - भंगस्थवाङ्मनसोर्भंगवति अपि संभवात्
कथं न कुशलचित्तयोग इति चेन्न,
वैकल्पिक - भक्तिभावप्रयुक्तस्य चतुर्थभंगस्य

प्रार्थनारूपस्य भगवत्य
-नुपपत्तेः विचित्रवर्णना
स्वभावेनैव तत्र तद्रूप -
वर्णनादिति बोध्यम् ॥२५॥

अतो मोहानुगंहेतन्निर्मोहानामसुन्दरम् ।
बोध्यादिप्रार्थनाकल्पं सरागत्वे तु साध्वपि ॥२६॥
परार्थमात्र रसिकस्ततोऽनुपकृतोऽपकृत् ।
अमूढलक्ष्यो भगवान् महानित्येष मे मतिः ॥
अर्हमित्यक्षरं यस्य चित्ते स्फुरति सर्वदा ।
परं ब्रह्म ततः शब्दब्रह्मणः सोऽधिगच्छति ॥
परः सहस्राः शरदां परे योगमुपासताम् ।
हन्तार्हन्तमना सेव्य गन्तारो न परंपदम् ॥
आत्माऽयमर्हतो ध्यानात् परमात्मत्वमश्नुते ।
रसविद्धं यथा ताम्रं स्वर्णत्वमधिगच्छति ॥
पूज्योऽयं स्मरणीयोऽयं सेवनीयोऽयमादरात् ।
अस्यैव शासने भक्तिः कार्या चेद्भीतनाऽस्ति वः ॥
सारमेतन्मया लब्धं श्रुताब्धेरवगाहनात् ।
भक्तिर्भागवती बीजं परमानन्दसंपदाम् ॥

द्वात्रिंशत् द्वा०, श्लो० २७ - ३२, जिनमहत्त्व द्वा०

ॐ

(१३५) जिनभक्ति

देवोद्देशेन मुख्येयमात्मन्येवात्मनो धियः ।
स्थाप्ये समरसापत्तेरुपचाराद्बहिः पुनः ॥ १८ ॥

टीका : देवोद्देशेन मुख्या - देवमुद्दिश्य तथा विषयीकृत्य,
आत्मन्येव कारयितर्येव ।
आत्मनः स्वस्याधियो वीतरागत्वादि - गुणावगाहिन्याः ।
मुख्या निरुपचरिता, इयं प्रतिष्ठा ।
स्वार्थविबोधात्प्रतिष्ठा करणा वचनतीत्या,
स्वभावस्यैव स्थापना । तथैव एव स्थाप्ये वीतरागे ।
समरसापत्तेः वचनानल - क्रियादग्धकर्मफलस्यात्मनो
वीतरागत्वलक्षणस्वर्णभावापत्तिरूप -
परमप्रतिष्ठाया, हेतुत्वादप्यस्य मुख्यत्वं ।
××× नन्वेवं प्रतिष्ठाकारयितर्येव प्रतिष्ठोपपादने
प्रतिमायां प्रतिष्ठितत्वव्यवहारः,
तस्यां च पूजादिफल - प्रयोजकत्वं कथं स्यात् ।
अत आह - उपचारात् बहिः प्रतिमायां पुनरियं
प्रतिष्ठा भवति । यत् षोडशकवृत्तिकृत् - 'बाह्यजिन -
बिंबगता तु प्रतिष्ठा बहिर्निजभावोपचारद्वारेण
निज एव हि भावो मुख्य - देवता - स्वरूपालंबनः'

'स एवाऽयमित्थं भेदोपचारद्वारेण विदुषां
भक्तिमतां पूज्यता - पदवीमासादयतीति ।'
न चैवं तदधिवासनेनाशात् प्रतिमाया
अप्रतिष्ठितत्वापत्तिः इति शंकनीयं, तन्नाशेऽपि
तदाहितस्योपचरित - स्वभाव - विशेषस्यानाशात् ।
द्विविधो ह्युपचरित - स्वभावोऽङ्गीकृते -
स्वाभाविक - औपाधिकश्च ।
आद्यः परमात्म - परदर्शकत्व - लक्षणः,
अन्त्यश्च विचित्र इति न दोषः ॥ १८ ॥
'प्रतिष्ठितत्व - सानोत्थसमापत्त्या परेष्वपि ।
फलं स्याद्वीतरागाणां सन्निधानं त्वसंभवि ॥ १९ ॥'
टीका - प्रतिष्ठितत्वसानोत्थया पूर्वपूर्व -
प्रतिष्ठितत्वप्रतिसन्धानोत्थापित - वचनादरभगवद्बहु
मानाहितया समापत्त्या । परेष्वपि प्रतिमापूजाकारिष्वपि ।
फलं विपुल - निर्जरालक्षणंस्यात् ।
वीतरागाणां रागरहितानां ।
सन्निधानं तु समीपागमनरूपं कायिकं,
अहंकार - ममकार - रूपं मानसं च,
मंत्र - संस्कारादिना असंभवि ।

ॐ

xxx न च भवतापि व्यासंगवशात्प्रतिष्ठितत्वस्याना-
भावे पूजा - फलानुपपत्तिरिति, विशेषफलाऽभावेऽपि
प्रीत्यादिना सामान्ये - फलाऽनपायात् ।
यैस्तु देवार्थं प्रतिष्ठितत्वप्रत्ययमिष्यते पूजाफल -
सामान्ये एव प्रयोजकमिष्यते, तेषामस्माकमपि दोष एव ।
- द्वात्रिंशिका (भक्ति) ५, श्लो॰ १९

अन्यत्रारंभवान् यस्तु तस्यात्रारंभशंकिनः ।
अबोधिरेव परमाविवेकौदार्यनाशतः ॥ ३० ॥
टीका - अबोधिरेव बोधिहानिरेव । विवेकः कार्याकार्यस्यानं,
औदार्यं च विपुलाशयलक्षणं । तयोर्नाशतः ॥ ३० ॥
- जिनभक्ति द्वात्रिंशिका, श्लो॰ ३०

पूज्यः परमानन्दमुपकारं विना कथम् ।
ददाति पूज्य इति चेच्चिन्तामण्यादयो यथा ॥ ३२ ॥
- इति भक्तिद्वात्रिंशिका ॥ ५ ॥

(१३६) जिनमार्ग
परिकल्पणा - अर्थान्तरग्रहणसौकर्यरूपा ।
द्रव्यतः फलानुपयोग - लक्षणात् । सा प्रमाण - देशनाऽपि
न प्रमाणं । यथा वैपरीत्यं ध्यान्ध्यलक्षणं भवेत् ।
अप्राप्तप्रापणशरीरस्यान्महतामारंभस्य ।

अनुमत्यादि साम्राज्यात्, सर्वथाऽसंगात् । चेतसश्चित्तस्य
भावावेशादर्थाद्युपयोगाच्च साध्यभेदाद्युपपत्तेः ।

साधुः श्राद्धश्च संविग्नपक्षः शिवपथास्त्रयः ।
शेषा भवपथा गेहि - द्रव्यलिंगि - कुलिंगिनः ॥ २९ ॥

गुणी च गुणरागी च गुणद्वेषी च साधुषु ।
श्रूयन्ते व्यक्तमुत्कृष्ट - मध्यमाधम - बुद्धयः ॥ ३० ॥

ते च चारित्रसम्यक्त्वमिथ्यादर्शनभूमयः ।
अतो द्वयोः प्रकृत्यैव वर्तितव्यं यथाबलम् ॥ ३१ ॥

इत्थं मार्गस्थिताचारमनुसृत्य प्रवृत्तयः ।
मार्गदृष्ट्यैव लभ्यन्ते परमानन्द संपदः ॥ ३२ ॥

- इति मार्गद्वात्रिंशिका ।

(१३७) **गुरुकुलवास**

'अस्मादेव हि चरणं, सिध्यति मार्गानुसारिभावेन ।
गुरुकुलवासत्यागे, नेदम्*१ भणिता कृतासस्य' ॥ १५ ॥
सामान्ये-धर्मतः खलु, कृतराभावाद्विशिष्यते चरणम् ।
सामान्ये-विरहिणि पुनर्न विशेषस्य स्थितिर्दृष्टा ॥ १६ ॥
तस्माद् गुरुकुलवासः, श्रेणीदृक्चरणादिनविशुद्धिकृते ।
गुरुरपि गुणवानेव, श्लाघ्यस्त्वनुपैति विमलदिशाम् ॥ १७ ॥

- मार्गपरिशुद्धि, पू. उपा. यशोविजयजी म.

*१ 'न इदम् मार्गानुसारिता ।'

ॐ

(१३८) - तहाभव्वत्ताइभावाओ। तस्स पुण विवागसाहणाणि,

टीका : 'तथाभव्यत्वादिभावात्' भव्यत्वं नाम
'सिद्धिगमनयोग्यत्वं' - अनादिपारिणामिको भावः।
तथाभव्यत्वमिति विशिष्टमेतत्,
कालादि - भेदेनात्मनां बीजसिद्ध्यादि - भावात्।
आदि शब्दात् कालनियतिकर्मपुरुषकारपरिग्रहः।
साध्यव्याधिकल्पत्वात्।
तथाभव्यत्वस्य विपाकसाधनान्याह -

- श्री पंचसूत्र, पृष्ठ २

(१३९) तथाभव्यत्व - परिपाकोपाय

एअस्स णं वुच्छित्ती सुहधम्माओ,
सुहधम्मसंपत्ती पावकम्मविगमाओ, पावकम्मविगमो-

टीका - 'एतस्य' भवस्य, 'व्यवच्छित्ति' व्युच्छित्तिः
'शुद्धधर्मात्' ज्ञानदर्शनचारित्ररूपात्,
औचित्येन सातत्यसत्कारविधिसेवितात्।
अयं च श्रावकादेरप्यभिग्रहपालनेन ज्ञेयः।
अभिग्रहभावस्य सातत्येन भावादिति शुद्धधर्मसंप्राप्तिः।
कुतः? इत्याह शुद्धधर्मो यथोदितः तस्य सम्यक्प्राप्तिः,
भावप्राप्तिरित्यर्थः।

ॐ

'पापकर्म' मिथ्यात्वमोहनीयादिः,
तस्य विगमो - विशिष्टो गमः,
अपुनर्बन्धकत्वेन पृथग्भाव इति यावत्,
तस्मात् पापकर्मविगमात् ।
अयं पुनः कुतः ? इत्याह - 'पापकर्मविगमः' यथोदितः
(અનુસંધાન પાનું - ૧૦૬) - શ્રી પંચસૂત્ર ટીકા, પૃ૦૨

(૧૪૦) માધ્યસ્થ્ય ભાવ

માધ્યસ્થ્યાષ્ટક - જ્ઞાનસાર અષ્ટક ૧૬, શ્લો૦ ૮

'मध्यस्थया दृशा सर्वेष्वपुनर्बन्धकादिषु ।
चारिसंजीविनीचारन्यायादाशास्महे हितम्' ॥ ८ ॥

ટબો - સઘળા અપુનર્બંધકાદિકને વિષે,
આદિ શબ્દથી માર્ગાભિમુખ - માર્ગની સન્મુખ થયેલાં,
માર્ગપતિત - માર્ગને પ્રાપ્ત થયેલાં, અવિરતિ સમ્યગ્દૃષ્ટિ,
દેશવિરતિ અને સર્વવિરતિને વિષે મધ્યસ્થદૃષ્ટિ વડે,
સંજીવિનીનો ચારો ચરાવવાના ન્યાયથી -
અજાણપણે સંજીવિની પાલો ચરાવતાં જેમ
પશુ ટાલી મનુષ્ય કરે, તે દૃષ્ટાંતે - હિત ઈચ્છીએ છીએ.
યદ્યપિ મૈત્રીભાવના સર્વ વિષે છે, તો પણ પ્રવૃત્તિને
અનુકૂલ ભાવના અપુનર્બંધકાદિ આશ્રિત જ કહી છે.
(જે તીવ્ર ભાવથી પાપ કરતો નથી, તે અપુનર્બંધક) - ૮

(१४१) मैत्र्यादि

चारि - संजीविनी - चारकारणन्यायतोऽन्तिमे ।
सर्वत्रैव हिता - वृत्तिर्गांभीर्यात्तत्त्वदर्शिनः ॥ ६९ ॥

- अध्यात्मोपनिषद्, शास्त्रयोगशुद्धि अधिकार, १

(१४२) सर्वत्र हितावृत्तिर्गांभीर्यात् समरसापत्त्या ॥ ११॥

व्या० × चरमे भावनामये ज्ञाने सति सर्वत्र - सर्वेषु जीवेषु हितप्रवृत्तिः - हितहेतुः प्रवृत्तिः, न कस्यचिदहिता, गांभीर्यात् आशयविशेषात्, समरसापत्त्या सर्वानुग्रहणरूपया । (सर्वतंत्र - समूहरूपस्य - समय - व्युत्पत्तिकृत - सर्वानुग्रहपरिणात्या).

- षोडशक ११, पृ० ७६

(१४३) व्यवहारशुद्धि

हेउ विसुद्धा किरिया एगग्गालंबणं सरूवं तु ।
अणुबंधो इह णेओ जगहियवित्ती समावत्ती ॥ २९ ॥

व्या० - हेतुस्तत्र निश्चये शान्तिरूपे प्रवृत्तिरूपे च विशुद्धा शास्त्रानुसारिणी क्रिया, सद्व्यवहार - विषयप्रतिक्षेप - भजनकालस्यदोष - निवर्तकत्वेनाऽशुभाऽनेकालंबन - निवर्तकत्वेन च तस्यास्तद्धेतुत्वात् । स्वरूपं त्वेकाग्र्यालंबनम्, शान्तेर्भावमात्र - विषयत्वात् प्रवृत्तेश्च ध्यानादि योगरूपाया आत्ममात्र - विषयत्वात् ।

अनुबन्धः उत्तरोत्तर - शुभसन्तानाऽविच्छेदलक्षणः इह
जिनमते जगद्धितवृत्तिः सर्वहितावहा समापत्तिः चन्दन
-गन्धस्थानीया स्वस्वदर्शनिग्रह-विधुरवसहजमाध्यस्थ्य
परिणतिः। तथा च यथा व्यवहारस्य सज्ज्ञानपूर्वकत्वेन
हेत्वादिशुद्धत्वं तथा निश्चयस्याऽपि
सद्व्यवहाराविरोधित्वेनैवेति सिद्धम् ॥ ३९ ॥

- गुरुतत्त्व विनिश्चय, गा० ३९, पृ० ११/१

एतदेव भावयति -

णिच्छयम बहुमाणे णं ववहारी णिच्छओवगो कोई।
ण य णिच्छओ वि जुत्तो ववहारविराहगो कोई ॥४०॥

व्या० - निश्चयस्य बहुमानेन - स्वविषयशक्त्यनिगूहन
दृढपक्षपातलक्षणेन व्यवहारः शुद्धक्रियालक्षणः कश्चित्
निश्चयोपगः निश्चयकार्यकारी। न च निश्चयोऽपि
निश्चयवदाभासमानोऽपि व्यवहारविराधकः शक्ति-
निगूहना पक्षपाताभ्यां व्यवहारोच्छेदकः कोऽपि युक्तः,
व्यवहारालसस्य निश्चयतत्त्वाऽनास्पदत्वात्,
तदुक्तमावश्यके - संजमजोगेसु सया, जे-
पुणसंतविरिया वि सीअंति। ते कह विसुद्धचरणा,
बाहिरकरणालसा हुंति ॥१॥ त्ति ॥४०॥

(१४४) मैत्र्यादि

- श्री पंचवस्तुनि अभ्युद्यतकरणे, पृ० २३५, गा० १६९३

मेत्तादी सत्ताइसु जिणिंदवयणेण तह य अब्भत्थं ।
भावेइ तिव्वभावो परमं संवेगमावण्णो ॥ १६९३ ॥

व्या०- मैत्र्यादिनि मैत्री - प्रमोद - कारुण्य - माध्यस्थ्य - निःसत्त्वादिषु, सत्त्वगुणाधिकक्लिश्यमानाऽविनेयेषु जिनेन्द्रवचनेन हेतुभूतेन, तथा चाऽत्यर्थं - नितरां भावयति तीव्रभावः सन्, परमं संवेगमापन्नः अतिशयेनार्द्रान्तःकरण इति गाथार्थः ॥ १६९३ ॥

सुहझाणाओ धम्मो - शुभध्यानाद् धर्माद् यः धर्मो भवति ॥ १६९४ ॥

(१४५) पर्युषणा - व्याख्या - विग्रहपूर्वक व्याख्या ।

परिउपसर्गपूर्वकः वस् - निवासे धातुः, तस्मात् कृदन्तीय 'अन' प्रत्यये विहिते वसः उसादेशो च कृते इकारस्य च यत्वे कृते सस्य षत्वे नकारस्य च णकारे कृते - 'पर्युषण' इति जातं, ततः 'कृत्तद्धितसमासाश्चेति' प्रातिपदिकसंज्ञायां विहितायां नपुंसकत्वात् 'पर्युषणम्' इति सिद्धं । यथा - परि + वस् + अन, परि + उस् + अन, परि + उसन, परि + उषन, परि + उषण, पर्युषण ।
पर्युषण + सि = पर्युषणम् ।

ॐ

(१) परि सर्वतोभावेन कायिक - वाचिक - मानसिक दोष - निरसनपूर्वकं वसति वासं करोति आत्मा अस्मिन् जिनेन्द्रभाषित - महापुनीत - पर्वसमये इति पर्युषणम् ।

(२) अथवा - परि सर्वतोभावेन कायिक - वाचिक - मानसिक - सातासातसकलपाप - प्रत्याख्यानपूर्वक - ऐहिक - पारलौकिक - मनोऽभिलषित - निखिलसुखसौभाग्य - कल्याणसमृद्धयर्थं वसति निवासं करोति - समुपास्ते आत्मा अस्मिन् समाराधकाभ्युदयनिःश्रेयसकरे जिनेश्वरादिष्टपरमपुनीतपर्वसमये इति पर्युषणम् ।

(३) अथवा - परितः सर्वभावतः वसति सर्वभूतेषु स्वापराधक्षमापनपूर्वकं मित्रभावेन तिष्ठति आत्मा अस्मिन् परमपावनपर्वाधिराजसमये इति पर्युषणम् ।

(४) परि सम्यक्तया - समीचीनतया मनोवाक्कायविशुद्धिपूर्वकं ऐहिकपारलौकिक - सकलसुखसिद्धये वसति आत्मा अस्मिन् जिनपति - निगदित - परमपुण्यशालिपर्वसमये इति पर्युषणम् ।

(५) परिपूर्णरूपेण पूर्णभावेन वा स्वसकल - पापप्रत्याख्यानपूर्वकं सद्गुणगणग्रहणेन वसति आत्मा अस्मिन्

श्री जिनेश्वर - समादिष्ट - सातिशय - पुण्यशालिनि
सर्वपर्वशिरःकोटी कोटीसमये इति पर्युषणाय् ।
(६) यत्र सर्वतोभावेन व्रतोपवासपुरःस्सरं संयम-
नियम-जप-तपः-स्वाध्याय-प्रतिक्रमणादिना जीवमात्र
- वैरप्रत्याख्यानपूर्वकं सर्वभूतमित्रत्व विधानेन वसति
आत्मा अस्मिन् श्री तीर्थंकरप्ररूपितपुण्यानुगुण्य सर्व-
पर्वशिरोमणिभूतपर्वाधिराजसमये इति पर्युषणाय् ।
(७) यत्र सर्वतोभावेन मनोवाक्कायैः वसति
आत्मा अस्मिन् सर्वज्ञोपदिष्ट धर्मे इति पर्युषणाय् ।
(८) यत्र पूर्णभावेन कारुण्यपूर्णहृदयेन सर्वभूतेषु
आत्मौपम्येन वसति आत्मा अस्मिन्
श्री तीर्थंकरसंनिरूपित सर्वपर्वमुकुटालंकार —
भूतपर्वाधिराजसमये इति पर्युषणाय् ।
(९) यत्र सर्वतोभावेन कामक्रोधादिबाह्याऽभ्यन्तरशत्रून्
व्रतोपवास - सयमनियमजपतपःसदाचरणादिना प्रत्याख्याय
श्री जिनेश्वरोपदिष्ट - धर्मे वसति
आत्मा अस्मिन् इति पर्युषणाय् ।
(१०) यत्र सर्वतोभावेन संयमनियमपूर्वकं
रागद्वेषविनिर्मुक्ते जिनेश्वरे वसति आत्मा अस्मिन्
सर्वपर्वाधिराजसमये इति पर्युषणाय् ।

ॐ

(११) परि सर्वभावतः पूर्णभावेन वा पोषधादिव्रतपरि-
पालनपूर्वकं वसति आत्मा यस्मिन् रागद्वेषजित्वरे
द्वंद्वातीते जिनेश्वरे सकलाभीष्टप्रदातरि इति पर्युषणाम्।
(१२) परि सर्वतोभावेन मनसा वाचा कर्मणा च नाना
जन्मजनित-सकलदुरित-प्रत्याख्यान पुरःस्सरं श्री जिन-
पति प्रतिपादित-ऐहिक-पारलौकिक-धर्मक्रियानुष्ठानं
प्रति वसति वासं करोति सम्यक् उपास्ते वा आत्मा
अस्मिन् सर्वज्ञ-सर्वदर्शि-श्री जिनेश्वरसमुपदिष्टसर्व-
कल्याणकारके श्री सर्वपर्वाधिराजस्मये इति पर्युषणाम्।
(१३) परि सर्वतोभावेन सम्यक्रीत्या वा
सर्वभूतहितेच्छापूर्वकं सर्पस्मिदस्कल्याणकारिणि
श्री जिनेश्वरोपदिष्टे अहिंसाप्रधानधर्मे वसति निवासं
करोति आत्मा यस्मिन् सर्व पर्वाधिराजे तत् पर्युषणं।
(१४६) मैत्र्यादि
सव्वत्थ अपडिबद्धा मेत्तादि गुणण्णिया य णियमेण।
सत्ताइसु होंति दढं इय आयसमग्ग तल्लिच्छा ॥४२॥
व्या॰- सर्वत्र द्रव्यक्षेत्रकालभाव प्रतिबद्धाः-प्रतिबन्धरहिताः,
मैत्र्यादिगुणान्विताः नियमेन नियोगेन यथासंख्यं
सत्त्वादिषु भवन्ति दृढं अत्यर्थं स्युः,

ॐ

आर्हतो मोऽर्होऽव्यवच्छेदत्वात्
तस्य मार्गो ज्ञानादिस्तत्र लिप्सा लालसा ये ते
तीर्थंकरास्तास्थिता भवन्ति इति प्रकृतं ।
- श्री पंचाशक, पृ० ३९०, गा० ४२ (साधु लक्षणं)

(१४७) मैत्र्यादि धर्म - ध्यान

- शास्त्रवार्ता, मोटी टीका, पृ० ३३६/१

तथा हि - लेश्या विशुद्धिः, भावनाहेतुक - साम्यहेतुक
रागद्वेषजयेन वा कृत मनःशुद्धिः मैत्र्यादिप्रमोदकारुण्य
माध्यस्थ्यपवित्रितचित्तो भावितात्मा पर्वतगुहा -
जीर्णोद्यान - शून्यागारादौ मनुष्यापात - विकलेऽवकाशे
मनोविक्षेप - निमित्तशून्ये सत्त्वोपघातरहित - उचिते
शिलातलादौ यथासमाधानं विहितपर्यंकाद्यासनः ।

xxx मन्द - प्राणापान - संचारः xxx

निरुद्धलोचनादिकरणप्रचारो हृदि ललाटे
मस्तकेऽन्यत्र वा यथा परिचयं मनोवृत्तिं प्रणिधाय
प्रसन्नवदनः पूर्वाभिमुखः उदङ्मुखो ध्यायति धर्म्यम् ।
तत्र बाह्याध्यात्मिक - भावानां
याथात्म्यं धर्मस्तस्मादनपेतं धर्म्यम् ।
तच्च द्विविधम् - बाह्यम्, आध्यात्मिकं च ।

तत्र सूत्रार्थपरावर्तन - दृढव्रतता - शीलानुराग -
निभृतकाय - वाग्व्यापारादिरूपं बाह्यम् । आध्यात्मिकं
चाऽऽत्मनः स्वसंवेदनग्राह्यम्, अन्येषामनुमेयम् ।
तच्च तत्त्वार्थसंग्रहादौ संक्षेपतश्चतुर्विधमुक्तम् ।
अन्यत्र दशविधम् - अपायोपाय-जीवाजीवविपाक -
विरागभवसंस्थानाऽऽज्ञाहेतुविचयभेदात् ।
तत्रापाये विचयो विचारो यस्मिंस्तदपायविचयम् ।
एवमन्यत्राऽपि योज्यम् । पृ० ३३६

(१४८) ×× मैत्री सत्त्वेषु भावतः ॥ ६ ॥
भावतो निश्चयतः सत्त्वेषु प्राणिषु,
मैत्री प्रत्युपकारनिरपेक्षा प्रीतिः । मैत्री व्यापारमाह-
मैत्रीं भावयतो नित्यं शुभोभावः प्रजायते ।
ततो भावोदकाज्जन्तोर्द्वेषाग्निरुपशाम्यति ॥ ८ ॥
मैत्रीमुक्तलक्षणां, नित्यं सर्वकालं, भावयतोऽभ्यस्यतः,
शुभः प्रशस्तः, भावः साम्यलक्षणो जायते,
यमन्ये 'प्रशान्तवाहिता' इत्याचक्षते ।
ततस्तस्मात्, भावरूपादुदकात्, द्वेषलक्षणोऽग्निः,
उपशाम्यति समूलमपयाति ।
एवं च शुद्धिप्रयोगलक्षणधर्मे साम्य-द्वेषोपशम द्वारा
मैत्र्युपयुज्यत इति फलितम् ॥ ८ ॥

ॐ

(१४९) धर्मश्रवण

– श्री आदिनेमिपार्श्व पुस्तकालय, देलवाड़ा

'ता एयम्मि पयत्तो ओहेणं वीयरायवयणम्मि ।
बहुमाणो कायव्वो धीरेहिं कयं पसंगेण ॥ २३४ ॥'

टीका–तस्माद् एतस्मिन् धर्मबीजे प्रयत्नो–यत्नातिशयः कर्त्तव्यो धीरैः इत्युत्तरेण योगः ।

किं लक्षणः प्रयत्नः कर्त्तव्य इत्याशंक्याह – ओघेन सामान्येन वीतरागवचने – वीतरागागम – प्रतिपादितेऽपुनर्बन्धक – चेष्टाप्रवृत्त्ययोगि – केवलिपर्यवसाने तत्तच्चित्ताद्युद्दिसमाचारे बहुमानो भावप्रतिबन्धः कर्त्तव्यो धीरैः बुद्धिमद्भिः । स्वोपरागवैचित्र्याद् मृदुमध्यादिमात्रः कर्त्तव्यो धीरैः बुद्धिमद्भिः ।

उपसंहरन्नाह – कृतं प्रसंगेन, पर्याप्तं धर्मबीजप्ररूपणेनेति । – उपदेश पद, पृ० १९२

(१५०) मैत्र्यादि

मैत्री प्रमोद कारुण्य माध्यस्थ्यानि नियोजयेत् ।
धर्मध्यानमुपस्कर्तुं तद्धि तस्य रसायनम् ॥ ११९ ॥

मिदि स्नेहने, मेद्यति स्निह्यति इति मित्रं, तस्य भावः समस्तसत्त्वविषयः स्नेहपरिणामो मैत्री ।

ॐ

प्रमोदनं प्रमोदो वदनप्रसादादि -
निर्गुणादिकेष्वभिव्यज्यमानान्तर्भक्तिरनुरागः ।
करुणैव कारुण्यं दीनादिष्वनुकम्पा ।
रागद्वेषयोरन्तरालं मध्यं, तत्र स्थितो मध्यस्थः
अरागद्वेषवृत्तिः तद्भावो माध्यस्थ्यमुपेक्षा ।
तानि आत्मनि नियोजयेत् । किमर्थं धर्मध्यानमुपस्कर्तुं
त्रुट्यतो ध्यानस्य पुनर्ध्यानान्तरेण सन्धानं कर्तुं ।
कुत इत्याह - तद्धि तस्य रसायनम्,
तत् मैत्र्यादिभावनं हि यस्मात्तस्य ध्यानस्य जराजर्जरस्येव
शरीरस्य त्रुट्यतो रसायनमिव रसायनम् ।
- योगशास्त्र, प्र० ४, श्लो० ११७

तत्र मैत्रीस्वरूपमाह -
'मा कार्षीत् कोऽपि पापानि मा च भूत्कोऽपि दुःखितः
मुच्यतां जगदप्येषा मतिर्मैत्री निगद्यते ॥११८॥'
कोऽपि जंतुरुपकार्यनुपकारी वा पापानि
दुःख - निबन्धनानि मा कार्षीत्,
पापकरण - निषेधात् मा च भूत् कोऽपि दुःखितः ।
जगदिति तांस्तान् देवमनुष्यतिर्यग्नारक -
पर्यायानत्यर्थं गच्छतीति जगत् प्राणिजातं ।

ॐ

अपि शब्दात् नैकः कश्चित्,
किन्तु सकलं जगत् मुच्यतां मोक्षमाप्नुयादित्यर्थः ।
एषा उक्तस्वरूपा मतिर्मैत्री शब्देनोच्यते ।
न हि कस्य चिदेकस्य मित्रं मित्रं भवति ।
व्याघ्रादेरपि स्वापत्यादौ मैत्री दर्शनात्,
तस्मादशेषसत्त्वविषया मैत्री ।
एवं कृतापकाराणामपि सर्वसत्त्वानां भिन्नतां व्यवस्थाप्य
क्षमेऽहं सर्वेषां मनोवाक्कायैर्येषां च मयाऽपकारः
कृतस्तानपि सर्वान् क्षमयेऽहमिति मैत्रीभावना ।
- योगशास्त्र प्रकाश ४, श्लो० ११८

(१५१) लवणस्थितिनुं कारण धर्म छे.

श्री जीवाभिगम सूत्र, प्रतिपत्ति ३, उ० २, सू० १७३

कम्हा णं भंते ? लवणसमुद्दे जंबुद्दीवं - णो उवीलेति णो उप्पीलेति णो चेव णं एक्कोदगं करेंति ? गोयमा ! जंबुद्दीवे णं दीवे भरहेरवएसु वासेसु अरहंत चक्कवट्टि बलदेवा वासुदेवा चारणा विज्जाहरा समणा समणीओ सावया सावियाओ मणुया एगइया पगतिभद्दया पगतिविणीया पगतिउवसंता पगतिपयणु-कोह-माण-माया-लोभा मिउमद्दवसंपण्णा अल्लीणा भद्दगा विणीता,

ॐ

तेसिणं पणिहाते लवणे समुद्दे जंबुद्दीवं दीवं
णो उवीलेति णो उप्पीलेति णो चेव णं एगोदगं करेंति,
गंगासिंधुरत्तारत्तवईसु सलिलासु देवया महिड्ढियाओ
जाव पलिओवमट्ठितीया परिवसंति, तेसिणं पणिहाए
लवणसमुद्दे जाव णो चेव णं एगोदगं करेंति, चुल्लहिमवंत
-सिहरेसु वासहरपव्वतेसु देवा महिड्ढिया तेसिणं पणिहाए०,
हेमवतेरण्णवतेसु वासेसु मणुया पगतिभद्दगा०,
रोहितं ससुवण्णकूलरुप्पकूलासु सलिलासु
देवयाओ महिड्ढियाओ तासिं पणि०,
सद्दावति वियडावति वट्टवेयड्ढपव्वतेसु देवा
महिड्ढिया जाव पलिओवमट्ठितीया,
हरिवासरम्मगवासेसु मणुया पगतिभद्दगा गंधावतिमा
- लवंत परियाएसु वट्टवेयड्ढपव्वतेसु देवा महिड्ढिया,
णिसढनीलवंतेसु वासधरपव्वतेसु देवा महिड्ढिया०,
सव्वाओ दहदेवयाओ भाणियव्वा, पउमद्दहतिगिच्छि
-केसरिदहावसाणेसु देवा महिड्ढियाओ तासिं पणिहाए०,
पुव्वविदेहावरविदेहेसु वासेसु - अरहंत - चक्कवट्टि -
बलदेव - वासुदेवा चारणा विज्जाहरा समणा समणीओ
सावगा सावियाओ मणुया पगति० तेसिं पणिहाए लवणं०,

ॐ

सीआसीतोदगासु सलिलासु देवता महिड्ढिआ०,
देवकुरुउत्तरकुरुसु मणुआ पगति भद्दगा०,
मंदरे पव्वते देवता महिड्ढिआ०,
जंबूए य सुदंसणाए जंबूदीवाहिवती अणाढिए णामं देवे महिड्ढीए जाव पलिओवमठितीए परिवसति तस्स पणि-हाए लवणसमुद्दे नो उवीलेति नो उप्पीलेति नो चेव णं एक्कोदगं करेति, अदुत्तरं च णं गोयमा! लोगट्ठिती लोगाणु - भावे जण्णं लवणसमुद्दे जंबुद्दीवं दीवं नो उवीलेति नो उप्पीलेति नो चेव णामेगोदगं करेति ॥ सू० १९३॥

(१५२) मनःशुद्धि - लेश्यादि

- श्री जीवाभिगम, प्रतिपत्ति ३, उद्देशो २, सू० १९३
पृ० ३२४ - २५, टीकाकार, श्री मलयगिरिजी

'एवं तावदशुद्धलेश्यात्यागेन विशुद्धलेश्या - परिग्रहेण च मनसः शुद्धिः।'

'मनः शुद्धिः - लेश्या विशुद्धया मनसो निर्मलत्वम्।'
कृष्णादिद्रव्याणि च सकलकर्मप्रकृतिनिःस्यन्दभूतानि, तदुपाधिजन्मानो भावलेश्याः कर्मस्थितिहेतवः।
एताश्चाशुद्धितमाऽशुद्धितराऽशुद्धशुद्धशुद्धितरशुद्धितमात्म परिणामरूपा जम्बूफल - स्वादक - दृष्टान्ताद् ग्रामघातक

ૐ

દૃષ્ટાન્તાભ્યામવસેય: મૂલ[1] - શાખા[2] - પ્રશાખા[3] - ગુચ્છ[4]
- ફલ[5] - પતિતાનિ[6] ચ | જંબૂદૃષ્ટાંત: દ્વિપદ[1]ચતુષ્પદ -
મનુષ્ય[2] - પુરુષ[3] - સાયુધ[4] - યુધ્યત્[5] - દીનં[6] ચ | માધ્યસ્થ્યેન-
સમત્વેન - રાગહેતુષુ દ્વેષહેતુષુ ચૌદાસીન્યેનેતિ યાવત્ |
રાગાદય એવ સમ્યગ્દર્શન-વિઘાત-હેતુત્વાત્ તિમિરમ-
ક્ષ્ણોર્વિપ્લવ: તેન ધ્વસ્તં જ્ઞાનં તત્ત્વાલોકો યસ્ય રાગાદિ
તિમિરધ્વસ્ત-જ્ઞાનેન મનસા જન: નરકાવટે પાત્યતે |

- સટીક યોગશાસ્ત્ર પ્ર૦ શ્લો૦ ૪

(૧૫૩) લોકસ્થિતિનું કારણ - ધર્મ

શ્રી ભગવતી સૂત્ર, વ્યાખ્યા પ્રજ્ઞપ્તિ, શ૦૩, ઉ૦૩, સૂ૦૧૫૫

ભંતે ? ત્તિ ભગવં ગોયમે સમણં ભગવં મહાવીરં વંદઇ
નમંસઇ ૨ ત્તા એવં વયાસી - કમ્હાણં ભંતે ? લવણસમુદ્દે
ચાઉદ્દસટ્ઠમુદ્દિટ્ઠ પુણ્ણમાસિણીસુ અતિરેયં વડ્ઢતિ વા હાયતિ-
વા? જહા જીવાભિગમે લવણસમુદ્દવત્તવ્વયા નેયવ્વા જાવ
લોયટ્ઠિતી, જણ્ણં લવણસમુદ્દે જંબૂદ્દીવં ૨ ણો ઉપ્પીલેતિ ણો
ચેવણં એગોદગં કરેઇ (લોયટ્ઠિઈ) લોયાણુભાવે ||

ટીકા - ટીકાકાર શ્રી અભયદેવસૂરિજી

અથ કસ્માલ્લવણો જમ્બૂદ્વીપં નોત્પ્લાવયતિ ?
અર્હદાદિપ્રભાવાલ્લોકસ્થિતિર્વૈષા ઇતિ,

एतदेवाह - 'लोयट्ठिई' त्ति लोकव्यवस्था,
'लोयाणुभावे' त्ति लोकप्रभाव इति ॥३-३॥
- श्री भगवती सूत्र, शतक ३, उद्देश ३, सू० १५५

(१५४) योगशास्त्र, आत्मा-परमात्मा, पृ० १८६, पुंठी १
परिज्ञातात्मनिश्चयः - पुनः पुनः संविदित - आत्मनिश्चयः
आत्मनिर्णयो येन स तथा । रागादय एव स्वरूप-
तिरोधायकत्वाद् ध्वान्तं तस्य विध्वंसः तस्मिन् कृते ।
केन ? सामायिकमेवांशुरादित्यस्तेन ।
सामायिकांशुमत्प्रकाशनेन तु रागादितिमिरेऽपगते
आत्मन्येव परमात्म स्वरूपमभिव्यक्तं भवति । रागद्वेषा
-दिदोषकलुषितत्वात् न साक्षात् परमात्मस्वरूपाभिव्यक्तिः,
तत्त्वतः सर्वेऽपि ह्यात्मानः परमात्मान एव,
केवलज्ञानस्य येन तेनांशेन सर्वत्र भावात् ।
साम्यं निर्ममत्वेनोपायेन स्यात् ।
साम्यं रागद्वेषयोरुभयोरपि प्रतिपक्षभूतं,
निर्ममत्वं रागस्यैकस्य प्रतिपक्षभूतम् ।
तद्दोषद्वयनिवारणाय साम्ये चिकीर्षिते भवति
बलवत्तरस्य रागस्य प्रतिपक्षभूतं निर्ममत्वमुपायः ।
तत्कृते अनुप्रेक्षाः भजेद् योगी ।

ॐ

(१५५) आत्मसमदर्शित्व

अध्याय - ५

योगयुक्तो विशुद्धात्मा, विजितात्मा जितेन्द्रियः ।
सर्वभूतात्मभूतात्मा, कुर्वन्नपि न लिप्यते ॥ ७ ॥
भोक्तारं यज्ञतपसां, सर्वलोकमहेश्वरम् ।
सुहृदं सर्वभूतानां, ज्ञात्वा मां शान्तिमृच्छति ॥ २९ ॥

अध्याय - ६

सुहृन्मित्रार्युदासीन मध्यस्थ द्वेष्यबन्धुषु ।
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥ ८ ॥
सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥ २९ ॥
यो मां पश्यति सर्वत्र, सर्वं च मयि पश्यति ।
तस्याहं न प्रणश्यामि, स च मे न प्रणश्यति ॥ ३० ॥
सर्वभूतस्थितं यो मां, भजत्येकत्वमास्थितः ।
सर्वथा वर्तमानोऽपि, स योगी मयि वर्तते ॥ ३१ ॥
आत्मौपम्येन सर्वत्र, समं पश्यति योऽर्जुन ! ।
सुखं वा यदि वा दुःखं, स योगी परमो मतः ॥ ३२ ॥

शांकरभाष्य xxx आत्मौपम्येन सर्वत्र सर्वभूतेषु समं तुल्यं पश्यति यः अर्जुन ! ।

ॐ

स च किं समं पश्यति इति उच्यते –
यथा मम सुखं इष्टं तथा सर्वप्राणिनां सुखं-अनुकूलं,
वा शब्दः चार्थे, यदि वा यत् च दुःखं मम प्रतिकूलं-
अनिष्टं यथा, तथा सर्वप्राणिनां दुःखं अनिष्टं प्रतिकूलं
इति एवं आत्मौपम्येन सुखदुःखे - अनुकूलप्रतिकूले
तुल्यतया सर्वभूतेषु समं पश्यति, न कस्यचित्
प्रतिकूलं आचरति अहिंसक इत्यर्थः ।
य एवं अहिंसकः सम्यग्दर्शननिष्ठः स योगी
परम-उत्कृष्टो मतः अभिप्रेतः सर्वयोगिनां मध्ये ।

अध्याय - ८

अक्षरब्रह्म परमं, स्वभावोऽध्यात्ममुच्यते ।
भूतभावोद्भवकरो, विसर्गः कर्मसंज्ञितः ॥ ३ ॥
शांकरभाष्य – XXXX आत्मानं देहं अधिकृत्य
प्रत्यगात्मतया प्रवृत्तं परमार्थब्रह्मावसानं वस्तु स्वभावः
अध्यात्मम् उच्यते, अध्यात्मशब्देन अभिधीयते ।
अध्याय - १२ : संनियम्येन्द्रियग्रामं, सर्वत्र समबुद्धयः ।
ते प्राप्नुवन्ति मामेव, सर्वभूतहिते रताः ॥ ४ ॥
अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।
निर्ममो निरहंकारः समदुःख-सुखः क्षमी ॥ १३ ॥

ॐ

शांकरभाष्य — अद्वेष्टा सर्वभूतानां — —
न द्वेष्टा आत्मनो दुःखहेतुं अपि न किञ्चिद् द्वेष्टि
सर्वाणि भूतानि आत्मत्वेन हि पश्यति ।
मैत्रो - मित्रभावो मैत्री, मित्रतया वर्तते इति मैत्रः,
करुण एव च करुणा कृपा दुःखितेषु दया,
तद्वान् करुणः सर्व भूताभयप्रदः संन्यासी इत्यर्थः ।
अध्याय - १३ : समं सर्वेषु भूतेषु, तिष्ठन्तं परमेश्वरम् ।
विनश्यत्स्वविनश्यन्तं, यः पश्यति स पश्यति ॥ २७ ॥
समं पश्यन् हि सर्वत्र, समवस्थितमीश्वरम् ।
न हिनस्त्यात्मनात्मानं, ततो याति परां गतिं ॥ २८ ॥
अध्याय - १८ : सर्वभूतेषु येनैकं भावमव्ययमीक्षते ।
अविभक्तं विभक्तेषु, तज्ज्ञानं विद्धि सात्त्विकं ॥ २० ॥
शांकरभाष्य - सर्वभूतेषु अव्यक्तादि - स्थावरान्तेषु भूतेषु
येन ज्ञानेन एकं आत्मवस्तु इत्यर्थः, अव्ययं न व्येति
स्वात्मना धर्मैः वा कूटस्थनित्यम् इत्यर्थः, ईक्षते - येन
ज्ञानेन पश्यति तं च भावं अविभक्तं प्रतिदेहं - विभक्तेषु
- देहभेदेषु न विभक्तं तद् आत्मवस्तु
व्योमवद् निरन्तरम् इत्यर्थः । तद् ज्ञानं अद्वैतात्मदर्शनं
सात्त्विकं सम्यग्दर्शनं विद्धि इति ।

ॐ

पृथक्त्वेन तु यज्ज्ञानं, नानाभावान् पृथग्विधान् ।
वेत्ति सर्वेषु भूतेषु, तज्ज्ञानं विद्धि राजसं ॥ २१ ॥

ब्रह्मभूतः प्रसन्नात्मा, न शोचति न कांक्षति ।
समः सर्वेषु भूतेषु, मद्भक्तिं लभते पराम् ॥ ५४ ॥

(१५६) ज्ञानगर्भ वैराग्य

'ज्ञानगर्भं तु वैराग्यं गुरुपरतन्त्राणां भवेत् ।
गुरुपरतन्त्रताया एव ज्ञानलक्षणत्वात् ।'
'गुरुपारतंतं नाणं' इति वचनात् । अतो ज्ञानगर्भ
वैराग्याधिकतयाऽपि गुरुरेव गरीयानिति भावः ।'

- गुरुतत्त्व विनिश्चयः, श्लो० ८ टीका

(१५७) कृतज्ञता दृढप्रतिज्ञता

नन्वेवं क्रियाकौशलमेव चारित्रं प्राप्तं
तच्च मरुदेवादावव्यापकमिति चेन्न,
प्रतिपूरुषं संयमाध्यवसायवैचित्र्याभावादित्यन्यत्र विस्तरः ।
अयोग्यत्वं च नासंयतत्वमात्रेण,
सर्वस्यापि दीक्षादानात्प्रागयोग्यत्वप्रसङ्गात् । किन्तु
कृतघ्नत्व, दृढप्रतिज्ञत्वादि गुणाभाववत्त्वेन, तच्च न
प्रतिज्ञातक्रियाकुशल इति न किञ्चिदनुपपन्नम् ॥ ६१ ॥

- गुरुतत्त्वविनिश्चयःउल्लास, पृ० २१

(૧૫૮) <u>ભરતીસ્થિતિનું કારણ</u>

શ્રી <u>લોકપ્રકાશ, ભા - ૨, સર્ગ ૨૧, શ્લોક ૨૨૧</u>

લક્ષમેકં સહસ્રાણિ, ચતુઃ સપ્તતિરેવ ચ ।
વેલન્ધરા નાગદેવા, ભવન્તિ સર્વ સંખ્યયા ॥૧॥
ઉપાનુપક્રમેણૈવ, નિરુદ્ધા નાવતિષ્ઠતે ।
વેલેયં ચપલાઽતીવ, મહેલેવ રસાકુલા ॥૨॥
કિંતુ દ્વીપસ્થ - સંઘાર્હદ્દેવ - ચક્ર્યાદિ - પુણ્યિનામ્ ।
પુણ્યાજ્જગત્સ્વભાવાચ્ચ, મર્યાદાં ન જહાતિ સા ॥૩॥

ઇદં જીવાભિગમ સૂત્ર વૃત્ત્યભિપ્રાયેણ, પઞ્ચમાઙ્ગે તદ્વૃત્તૌ ચ -'જયા ણં દીવિચ્ચયા ઈસિં ણો ણં તયા સામુદ્દયા ઈસિં, જયા ણં સામુદ્દયા ઈસિં ણો ણં તયા દીવિચ્ચયા ઈસિં ?, ગો૦ ? તેસિં ણં વાયાણં અન્નમન્નવિવચ્ચાસેણં લવણ સમુદ્દે વેલં નાતિક્કમઇ,' 'અન્યોઽન્યવ્યત્યાસેન' યદૈકે ઈષત્ પુરોવાતાદિ વિશેષણવાન્તિ તદેતરે ન તથાવિધા વાન્તીત્યર્થઃ । 'વેલં નાઇક્કમઇ' ત્તિ તથાવિધવાયુદ્રવ્ય સામર્થ્યાદ્વેલાયાસ્તથાસ્વભાવત્વાચ્ચે' ત્યુક્તં, ॥

<u>લોકપ્રકાશ ભાગ - ૨, સર્ગ ૨૧, શ્લો૦ ૨૨૧ - ૩, પૃ૦ ૨૫૮</u>

<u>ટિપ્પણ ૧</u> - વાતાનાં તથાવાતે જગત્સ્વભાવવત્ દ્વીપસ્થ-સદ્ધાદિ કારણતાયાં કા હાનિઃ, તત્કૃતશ્ચ વેલોપગમાભાવઃ,

प्रतिकूलवातेन वेगेन वेलाया आगमः स्यात्,—
शनैरागमस्तु द्वीपस्थ - सङ्घादि - भावकृत इव,
तत्वतः सकलेष्टप्राप्त्यऽनिष्ट —
समागमाऽभावस्यादेष्टकृतता ॥१॥ पृ० २५९

(१५९) ध्यान ए मोक्षनुं प्रधानकारण
टिप्पणकार - सागरानंदसूरिजी
संवर विणिज्जराओ मोक्खस्स पहो तवोपहो तासिं ।
झाणं च महाणंगं तवस्स तो मोक्खहेऊ तं ॥१॥
ध्यानशतके । - योगशास्त्र, प्र०४, श्लो० ९०

(१६०) न चैवं स्वाननयावलंबनमन्याय्यम्,
सर्वनयात्मके भगवत्प्रवचने यथोपयोग-
मधिकृतनयावलंबनस्यादुष्टत्वात्,
विप्रपंचितं चेदं कल्पलतायाम् ।
- उपदेश रहस्य, श्लो० ४२, पृ० २१

(१६१) आगमिकादि ग्रन्थोनां नाम (कुल ११४ ग्रंथो)
(१) श्री दशवैकालिक सूत्र हारिभद्रीय वृत्ति
(अध्ययन २ - ३ - ६ - ८ - १०) चूलिका १ - २
(२) श्री प्रश्नव्याकरण सूत्र
(३) श्री विपाक सूत्र (४) श्री अंतगडदशा सूत्र

ॐ

(५) श्री अनुत्तरौपपातिकदशा सूत्र
(६) श्री ज्ञाताधर्मकथा (७ - १७) प्रकीर्णकदशक - सार्थ
(१८) श्री उत्तराध्ययन सूत्र (१९) ऋषिभाषित सूत्राणि
(२०) समवसरणस्तवादि लघुप्रकरणो १० थी १५,
- (आत्मानंद सभा) (२१) गच्छाचारप्रकीर्णक सटीक

सैद्धान्तिक

(१) प्रवचन सारोद्धार, भाग १लो
(२) प्रवचन सारोद्धार, भाग २जो
(३) श्री नवपद प्रकरण (४) विशेषशतक
(५) सेनप्रश्न (६) हीरप्रश्न (७) विचाररत्नाकर
(८) विचारसार (९) रत्नसंचय
(१०) पंचाशक (११) पंचसूत्रसटीक
(१२) नवतत्त्वप्रकरण देवगुप्ताचार्य (१३) धर्मबिंदु
(१४) ललितविस्तरा (१५) द्वात्रिंशद् द्वात्रिंशिका
(१६) गुणस्थानक्रमारोह

औपदेशिक

(१) श्री योगशास्त्र (२) हिंगुल प्रकरादि ४ प्रकरणो
(३) उपदेश रत्नाकर (४) उपदेश सप्ततिकी
(५) उपदेश तरंगिणी

ૐ

(૬ થી ૯) ઉપદેશ ચિંતામણિ, ભાગ ૧ થી ૪
(૧૦ અ) સિંદૂરપ્રકર (૧૦ બ) સૂક્તમુક્તાવલી
(૧૧) પ્રશમરતિ (૧૨) શાંતસુધારસ (૧૩) અધ્યાત્મકલ્પદ્રુમ
(૧૪) જ્ઞાનસાર (૧૫) હારિભદ્રીય અષ્ટક (૧૬) ઉપદેશ માળા
(૧૭) સમ્યક્ત્વ સપ્તતિ (૧૮) શ્રાદ્ધવિધિ પ્રકરણ
(૧૯) શ્રાદ્ધપ્રતિક્રમણ સૂત્ર વૃત્તિ અર્થદીપિકા
(૨૦) વંદારુવૃત્તિ (૨૧) આચાર પ્રદીપ

**કથાનુયોગ**

(૧) ઉપમિતિ ભવપ્રપંચા, ભાગ ૧લો
(૨) ઉપમિતિ ભવપ્રપંચા, ભાગ ૨જો
(૩) પારિણામ માળા (૪) પ્રબોધ ચિંતામણિ
(૫) ભવભાવના, ભાગ ૧લો
(૬) ભવભાવના, ભાગ ૨જો
(૭ અ) ભવ ભાવનાંતર્ગત ભુવનભાનુ કેવલી ચરિત્ર
(૭ બ) ધર્મકલ્પદ્રુમ
(૮) પ્રબંધ ચિંતામણિ (૯) પુરાતન પ્રબંધ સંગ્રહ
(૧૦) વિવિધતીર્થકલ્પ (૧૧) આત્મપ્રબોધ (૧૨) વિવેકમંજરી
(૧૩) સમરાદિત્યચરિત્ર (૧૪) સુદર્શનચરિત્ર
(૧૫) વૈરાગ્યકલ્પલતા, પૂ૦ યશોવિજયજી મહારાજની

ॐ

(१६) भरतेश्वर बाहुबली वृत्ति, भाग १लो
(१७) भरतेश्वर बाहुबली वृत्ति, भाग २जो
(१८ - २०) धर्मरत्नमंजूषा, भाग १ - २ - ३
(२१ - २२) धर्मरत्न करंडक, भाग १ - २
(२३) गौतमपृच्छा (२४) शत्रुंजय माहात्म्य
(२५-२६) विक्रमचरित्र, भाग १-२ (२७) प्रत्येकबुद्ध चरित्र
(२८ - ३१) उपदेश प्रासाद, भाग १ थी ४
(३२ -३८) आनंदकाव्यमहोदधि, भाग १ थी ७ (पुस्तिका)
(३९) पंचपरमेष्ठि गुणमाला
(४०) तिलकमंजरी (पुस्तिका)
(४१) उपमितिसार समुच्चय
(४२) कुवलय माला (पुस्तिका)
(४३ - ५२) त्रिषष्टि शलाका पुरुष चरित्र, पर्व १ थी १०
(५३) परिशिष्ट पर्व (५४) तपागच्छ पट्टावली
(५५ - ५६) पट्टावली समुच्चय, भाग १ - २ (पुस्तिका)

(१६२) निश्चय - व्यवहार चर्चा

गुरुतत्त्वविनिश्चयः प्रश्नोल्लासः ।
इत्थमफासुअणीरं सेवंतो तेउकाइयं तहय ।
गुत्तीउ विराहंतो, मिच्छद्दिट्ठी मुणी भणिओ ॥ २६ ॥

'इत्थं' ति । 'इत्थं' मनागप्यारम्भाङ्गे, चारित्राङ्गोपपत्तौ
सत्यामप्रासुकं नीरं तेजस्कायिकं च सेवमानः 'गुप्तीः'
ब्रह्मचर्यगुप्तीश्च विराधयन् 'मुनिः'
द्रव्यलिङ्गी मिथ्यादृष्टिर्भणितः, तथा
च महानिशीथ सूत्रम् - 'से भयवं !
कयरेणं लिंगेणं वियाणिज्जा जहा णं धुवमेस मिच्छदिट्ठी?
गोयमा ! जे णं कयसामाइए सव्वसंगविमुत्ते
भवित्ता णं अफासुअं पाणं परिभुंजिज्जा,
जे णं अणगारधम्मं पडिवज्जित्ता णं
सयमुद्दिसिअं वा परोद्दिसिअं वा
तेउकायं सेविज्ज वा सेवाविज्ज वा
तेउकायं सेविज्जमाणाणं अन्नेसिं समणुजाणेज्ज वा,
तहा णवण्हं बंभचेरगुत्तीणं
जे केइ साहू वा साहुणी वा
एक्कमवि खंडिज्ज वा विराहिज्ज वा
खंडिज्जमाणं वा विराहिज्जमाणं वा बंभचेरगुत्तिं
परेसिं समणुजाणिज्ज वा मणेण वा वायाए वा
काएण वा से णं मिच्छदिट्ठी ण केवलं मिच्छदिट्ठी,
अभिगहिअमिच्छदिट्ठी विजाणिज्जा' त्ति ॥ २६ ॥ प्र० ७

णिच्छयववहाराणं रूवं अण्णुण्ण समणुविद्धं तु
णिच्छयओ च्चिय सिद्धी ता कह वुत्तं हवइ जुत्तं ॥४१॥

टीका: निश्चयव्यवहारयोः स्वरूपं अन्योन्यसमनुविद्धमेव,
व्यवहारे शुद्धिक्रियारूपे स्थानार्थाद्यालम्बनभावरूप
निश्चयसम्बन्धस्य, शुद्धात्मतत्त्वविवेकलक्षणे
निश्चये च शुभयोग-प्रवृत्तिरूपद्रव्यक्रिया
व्यवहारसम्बन्धस्य नियतत्वात् ।
x x x x अन्योऽन्यं समनुविद्धानामेकाभावे-
ऽन्याभावस्याऽप्यवश्यकत्वाद्व्यवहाराभावे
निश्चयस्याऽप्यभावात् । पृ०१२

अथ निश्चय एव शुद्ध इति पक्षपात-
निरासाय - व्यवहारशुद्धता पक्षपाताभिप्रायवानाह -
'मिच्छत्तविसोहीए ववहारणयस्स होइ सुद्धत्तं ।
ण उ णिच्छयस्स जणियं भणियं ववहारभासम्मि ।'

टीका : मिथ्यात्वशुद्ध्या हेतुभूतया
व्यवहारनयस्य भवति शुद्धत्वम्,
तस्य नियमतो मिथ्यात्व - विशोधकत्वात् ।
न तु निश्चयस्य, मिथ्यात्व-विशोधकत्वाभावात्तस्य ।
यद्भणितमेतद्व्यवहारभाष्ये । गा० ४६, पृ० १३

निश्चयत एव सिद्धिरिति भंगाप्रवेशाद्व्यवहार उपादीयत एव,
सम्यग्दृष्टिनयद्वयस्य प्रधानोपसर्जनभावेनाऽन्योऽन्य-
विषयसंवलितत्वात् यतो भणितमोघनिर्युक्तावेव।
'णिच्छयमवलंबंता णिच्छयओ णिच्छयं अयाणंता।
णासंति चरणकरणं बाहिरकरणालसा केई ॥३७॥'
जो णिच्छयओ पवट्टइ हेउ सरूवाणुबंध पडिपुण्णो।
सो णिच्छयओ णेओ ववहारेण इअरो उ ॥३८॥
णियणियवयणिज्जसच्चा सव्वनया परवियालणे मोहा।
ते पुण अदिट्ठसमओ विभयइ सच्चे अ अलिए वा ॥४५॥

- गुरुतत्त्व विनिश्चये, पृ० १२

'वेणइए मिच्छत्तं ववहारणया उ जं विसोहिंति।
तम्हा ते च्चिय सुद्धा भइयव्वं होइ इयरेहिं ॥४७॥'

टीका : वैनयिको नाम मिथ्यादृष्टिस्तस्मिन्
यत् मिथ्यात्वं तद् व्यवहारनया एव, तुरेवकारार्थः,
नैगम - संग्रह - व्यवहाराः शोधयन्ति अपनयन्ति,
ते ह्यनुयायिद्रव्याऽभ्युपगमपराः,
ततः कृतकर्म - फलोपभोगोपपत्तेः सद्धर्मदेशनादौ प्रवृत्ति
- योगतो भवति तात्त्विकी शुद्धिः, तस्मात्त एव शुद्धाः।
ऋजुसूत्रादिभिर्नयैर्मिथ्यात्व - शोधनमधिकृत्य भजनीयं।

ॐ

न शुद्धिरतीति भावः। ते हि पर्यायमात्रमभ्युपगच्छन्ति,
पर्यायाणां च परस्परमात्यन्तिको भेदः,
ततः कृतविप्रणाशादिदोषप्रसंगः। तथा हि- मनुष्येणाकृतं
कार्यं किल देवो भुंक्ते मनुष्यावस्थाभिन्नः, ततो मनुष्य
कृत कार्यविप्रणाशः, मनुष्येणासता तस्योपभोगाभावात्।
देवस्य फलोपभोगो अकृताभ्यागमः,
देवेन सता तस्य कर्मणोऽकरणात् कृतविप्रणाशादिदोष-
परिज्ञाने च न कोऽपि धर्मश्रवणेऽनुष्ठाने वा प्रवर्तेत
इति मिथ्यात्वशुद्धिरभावः,
तदभावाच्च न ते शुद्धा इति ।४७।
एतदेव स्पष्टतरं विभावयिषुराह -
'ववहारणयस्साया कम्मं काउं फलं समणु होइ।
इय वेणइए कहणं विसेसणेणाहु मिच्छत्तं ॥४८॥
इत्तो कालिय सुत्ते अपरीणामाइसीस हिअहेउं।
ववहारस्साहिगारो भणिदं आवस्सए जाणिणं ॥४९॥ पृ० १३
ननु मिथ्यात्वविशोधकत्वं व्यवहारस्यैव
न तु निश्चयस्येति पक्षपातो न युक्तः। निश्चयस्यापि
पुद्गलात्माभेदग्रहादिरूप - व्यवहाराभिनिवेश -
निवर्तकत्वेन मिथ्यात्व(वि)शोधकत्वात्,

तदर्थमेव निश्चयदेशनाया अपि प्रवृत्तेः,
एकनयाभिनिविष्टं प्रति नयान्तरदेशनायाः
'संविग्गभाविआण' इत्यादि कल्प-निशीथ भाष्यग्रन्थे
नोपपादितत्वाच्च । अथ प्रथमतो मिथ्यात्व-
निवर्तकत्वं व्यवहारस्यैव 'वेणइओ णाम मिच्छदिट्ठी
तप्पढमयाए धम्मं कहेइ त्ति उ ट्ठाइ तस्स ववहारणय-
वत्तव्वयाए कहिज्जइ' त्ति व्यवहारचूर्णि वचनात्,
निश्चयस्य चाऽनन्तरं मिथ्यात्वनिवर्तकत्वमित्यस्ति
विशेष इति चेन्न मिथ्यात्व-
निवर्तकत्वमात्रस्य शुद्धता नियतत्वात्तत्र
प्रथमानन्तरभावस्याप्रयोजकत्वादपक्षपाताभिप्रायेणाह -
'इयराभिणिवेसाहिय मिच्छत्तं णिच्छओ विसोहेइ ।
तम्हा अपक्खवाओ जुत्तो दोण्हं पि सुहत्ते ॥ ५१॥
टीका: इतरः निश्चयापेक्षया भिन्नो व्यवहारनयस्तस्य
योऽभिनिवेशः एकान्तग्रहस्तदाहितं
मिथ्यात्वं निश्चयोऽपि शोधयति, तस्माद् द्वयोरपि
निश्चय-व्यवहारयोः शुद्धत्वे अपक्षपातो युक्तः । पृ० १४
'णिच्छयठियव्व मुणिणो ववहारठियावि परमभावगया ।
णिट्ठियसेलेसि च्चिय सव्वुक्किट्ठो परमभावो ॥'

टीका: निश्चयस्थिता इव व्यवहारस्थिता

'एएहिं दिट्ठिवाए परूवणा सुत्त अत्थ कहणा य ।
इह पुण अणब्भुवगमो अहिगारो तीहि ओसन्नं ॥५०॥

टीका: एतैर्नैगमादि नयैः सप्रभेदैर्दृष्टिवादे
सर्ववस्तूनां प्ररूपणा क्रियते, सूत्रार्थ कथना च। xxx
'इह' पुनः कालिकश्रुतेऽनभ्युपगमः,
नावश्यं नयैर्व्याख्या कार्येति भावः। यदि च श्रोत्रपेक्षया
नयविचारः कर्त्तव्यः तदा त्रिभिराद्यैर्नयैः प्रायेणाधिकारः,
तैरेव लोकव्यवहारपरिसमाप्तेरिति ।
न च कालिकसूत्रे नयानवकाशादाद्यैस्त्रिभिर्नयैरपि
कथं व्याख्या ? इति शंकनीयं,
परिकर्मणार्थं नयपरिग्रहस्यात्राप्यभिधानात्,
अशेषनय-प्रतिषेधस्य त्वाचार्य विनेय-
विशिष्टबुद्ध्यभावापेक्षत्वात्, श्रोतृवक्तृवैचित्र्ये तु
नयव्याख्यावैचित्र्यस्य सम्प्रत्यप्यनुमतत्वात्, तदुक्तं -

'नत्थि नएण विहूणं सुत्तं अत्थो अ जिणमए किंचि।
आसज्ज उ सोयारं नए नय विसारओ बूया ॥१॥
भासेज्ज वित्थरेणावि णय मय परिणाम णासमत्थम्मि ।
तदसत्ते परिकम्मणाणेगमाइणं पि वा कुज्जा ॥२॥ इति

-गुरुतत्त्व विनिश्चये, पृ० १४

'ण णु आलंबण मित्तं बज्झं ववहार संगयं वत्थु ।
णिच्छयओ च्चिय सिद्धी साहूण सुयम्मि जं भणियं ॥
परम रहस्समिसीणं समत्त गणिपिडग झरियसाराणं ।
परिणामियं पमाणं णिच्छयमवलंबमाणाणं ॥१८-१॥

टीका : ननु व्यवहारसंगतं वस्तु आलंबनमात्रं
परसामग्र्यामाकाशादिवद् वर्जनीयसंनिधिकमात्रं,
न तूपादानवत्कारणमपि, अतिशयितस्यैवोपादास्यैव
अपि पुनः परम भावगता एव,
उत्तरत्राप्याश्रवनिवृत्तेरेव परमभावत्वात्,
उत्कर्षलक्षणस्य पारम्यस्याऽप्युत्तरत्राऽविशेषात् ।
सर्वोत्कृष्टश्च परमभावो निष्ठिता - काष्ठा प्राप्ता चरम
समयस्थेति यावत् शैलेश्येव — तदुक्तं धर्मसंग्रहण्यां
'सो उ भवक्खयहेऊ, सेलेसी चरमसमय भावी जो ।
सेसो पुण णिच्छयओ, तस्सेव पसाहगो भणिओ ॥ १ ॥'
इति । तथा च सर्वोत्कर्षाभिधानेन ।
निश्चयवादिना निष्ठितां शैलेशी'
विना न किंचिदाचरणीयम्,
तदर्थमुत्कर्षबुद्ध्यैव प्राचीनादरे च निश्चयार्थं
व्यवहारोऽपि तथैवादरणीय इति सिद्धं ।

निश्चये ध्यानलक्षणं पारम्यमस्ति व्यवहारे तु तन्नेति
'ववहारे वि मुणीणं झाणप्पा अवस्सओ परम भावो ।
जत्तस्स दढत्ताओ जमिणं भणियं महाभासे ॥ ५४ ॥'
टीका: व्यवहारे पदवाक्यमुद्रावर्त्तादि-प्रणिधान-गर्भकाय
वाग्व्यापार रूपेऽपि मुनीनां ध्यानात्मा परम भावोऽक्षतः,
यत्नस्य दृढत्वात् एकाग्रत्वात्,
अत एव योगत्रय - यौगपद्यस्याऽप्यविरोध
प्रतिपादनात्पदवाक्यादि विषय मनसोऽप्याशु
संचारित्वेन कालभेदानुपलक्षणसमर्थनात् ।
यत्नदृढताया ध्यानलक्षणत्वे संमतिमाह-
'सुदढप्पयत्तवावारणं णिरोहो व विज्जमाणाणं ।
झाणं करणाण मयं ण उ चित्तणिरोहमित्तागं ॥ ५५ ॥
टीका: सुदृढस्य-खेदादि दोषपरिहारेणोत्कृष्टस्य प्रयत्नस्य
व्यापारणं, निरोधो वा विद्यमानानां कार्यधानक्षमत्वात् ।
अतो निश्चयेन एव साधूनां सिद्धिः ।
शुद्धनिश्चयेन बाह्यकारणादिकस्य निरासवच्छुद्धेतर
निश्चयेन बाह्यकारणमात्रस्यापि निरासाद्,
आत्ममात्रप्रतिबद्धकार्यकारणभावविचारसारतया बहिः
संकल्पविकल्पपरम्परानिर्वृत्तेरेकान्तस्थैर्यसिद्धेः ।

परमं रहस्यं तत्त्वं श्रमणानां समग्रगणिपिटकस्य
क्षरितः पठितः सारो यैस्तेषां पारिणामिकं परिणाम
-भवं प्रमाणं भवति निश्चयनयावलम्बमानानां,
येतः शब्दादि भेदाः पारिणामिकमिच्छन्तीति। पृ० ५
'गुरु आणाइ कुणंता संजमजत्तं खवित्तु कम्ममलं।
सुद्धमकलंकमउलं आदसहावं उवलहंति ॥ १६० ॥'
टीका: अध्यात्मप्राप्ति-प्रतिबंधक-कर्ममालिन्यं क्षपयित्वा
क्रोधादिकालिमाकलिततया कलंकरहितं सहजानन्द
-सुन्दरतयाऽनन्योपमेयमात्मस्वभावमुपलभन्ते ॥
विण्णाणाणंदघणो आदसहावम्मि सुद्धु उवलद्धे।
करयलगयाइं सग्गापवग्गसुक्खाइं सव्वाइं ॥ १६१ ॥
टीका: सुष्ठु-यथावस्थित-द्रव्यगुणपर्यायावलम्बित्वे-
नोपलब्धे सति, आत्ममात्र-प्रतिबन्ध-विश्रान्त-
सुखसिन्धुमग्नस्य योगिनो।
आदसहावे पत्ते परपरिणामे य सव्वहा चत्ते।
वाहिविगमेव सुक्खं पयडं अपयत्त संसिद्धं ॥ १६२ ॥
टीका: परपरिणामज-कषाय-नोकषायादि-मानस-दुःख
बीजोच्छेदाद्व्याधिविगम इव अप्रयत्न-संसिद्धं सुखं।
क्रियामले-मद-मात्सर्यादिरूपे, सानमलमालस्यादिरूपं,
पृ० २२६-७

ॐ

योगनिरोध-दशायां ध्यानं करणानां कायवाङ्मनसां मतम्।
न तु चित्तनिरोधमात्रं, अन्यत्राव्याप्तेः ।
ध्यै चिन्तायां इति धातुस्तु यथाश्रुतमात्रो न ग्राह्यः,
धातूनामनेकार्थत्वात् परम मुनिवचनानुरोधेनार्थान्तर
-कल्पनाया अपि न्याय्यत्वादिति भावः ।५५।
ननु निश्चयस्येतरोत्तर-शुद्धिहेतुत्वे व्यवहारस्य तु
सदैकरूपत्वमेवेत्यस्ति विशेषो निश्चयस्येति अत आह-
'पढमं वयणाठियाणं धम्मखमाइट्ठियाण तत्तो अ ।
जिणणो च्चिय ववहारो रयणम्मि णिओगदिट्ठिव्व ॥'
टीका : प्रथमं वचने स्थितानां आप्तोपदेशानुस्मरण-
निरत-प्रवृत्तिकतया वचनक्षान्त्यादि व्यवस्थितानां,
तदनन्तरं च धर्मक्षमादिस्थितानां पूर्वदण्डव्यापाराहित-
भ्रमिप्रयुक्त-तन्निरपेक्षोत्तरचक्रभ्रमि-स्थानीय-शास्त्र
व्यापार-निरपेक्षात्मस्वभूत-धर्मव्यवहारारूढानां भिन्न
एव व्यवहारः, अभ्यासानभ्यास-लक्षणयोर्हेत्वोरल्पबहु
-निर्जरालक्षणयोः फलयोश्च भेदात् ।
रत्ने नियोगदृष्टिरिव, यथा हि - बालाद्यवस्था-
कालीन रत्नदृगपेक्षया सुलब्धपरीक्षस्य पुंसो
रेखोपरेखाद्याकलनकुशला नियोगदृष्टिर्भिन्ना,

तथा प्रधान - भिक्षाटनादि - व्यवहारापेक्षयोत्तम -
देशिसम्पन्नस्य तदुत्तरो भिक्षाटनादि -
व्यवहारोऽपि भिन्न एवेति भावः । ५६ । पृ० १८
'पत्ते अवस्सकरणे चरणं नासंति जिणवरिंदाणं ।
आहच्चभावकहणे पंचहिं ठाणेहिं पासत्था ॥ ५९ ॥'
इष्ट - विषयोपनीतं ध्यानमेव
सर्व - कार्यकरमित्युक्तं निराकर्तुमाह -
'इट्ठ विसयाणुगाण य झाणं कलुसाहमं विणिद्दिट्ठं ।
सूअगडे मंसट्ठिअजीवाणं मच्छझाणं वा ॥ ६१ ॥
टीका : इष्ट - विषयानुगानां च मनोरमभोजनादि -
विषयासक्तानां च ध्यानं आर्त्तरौद्ररूपतया
मलिनं चाऽधमं च प्रतिपादितं द्वितीयांगे मांसार्थिनां
जीवानां मत्स्यध्यानमिव, विषय - स्वाभाव्यादेव हीष्ट -
- विषयप्राप्तिर्धर्मध्यानं प्रतिबध्नात्यधर्मं चादत्ते,
विषयद्वेषजनितं वैराग्यं विनाऽर्थप्राप्त्यापीच्छा -
निवृत्त्यसिद्धेरध्यात्ममतपरीक्षायां व्यवस्थापितत्वात् ।
- तथा च मनोरमभोजनादि सेविनामनर्थैरस्त
- चरणानां ध्यानमप्यशुभमेवेति भावः । x x
इष्टविषयानुगानां नास्त्येव शुभध्यानमित्युक्तम्,

ॐ

अतस्तद्विकलानामेव तत्संभवतीत्याह –

'विसय-विरत्तमईणं तम्हा सव्वासवाणिरुद्धाणं ।
झाणं अकिंचणाणं णि सग्गओ होइ णायव्वं ॥ ६४ ॥'

टीका : उक्त हेतोर्विषयविरक्तमतीनां सर्वास्रवान्नि वृत्तानाम् अकिंचनानां परद्रव्य – प्रतिबन्धत्यागेनात्म – स्वभावाचरण – प्रतिबद्धानां स्वभावतः ध्यानं धर्मशुक्ललक्षणं ज्ञातव्यं भवति, गगनेऽभ्रनिवृत्तौ विधोस्तेज इव विषयनिवृत्तावात्मनो ध्यानस्य स्वतः प्रसरणशीलत्वादिति । पृ० २१

○

'किं बहुणा इह जह तह रागद्दोसा लहुं विलिज्जंति ।
तह तह पयट्टिअव्वं एसा आणा जिणिंदाणं ॥ १६५ ॥'

– गुरुतत्त्व विनिश्चये, पृ० २१७

શ્રી સ્થાનાંગ સૂત્રની ટીકામાં
'સ્થાનાંગ |' શબ્દની વ્યાખ્યા કરતાં
ટીકાકાર મહર્ષિ પૂજ્ય આચાર્ય ભગવંત
શ્રી અભયદેવસૂરિજી ફરમાવે છે કે:

'स्थानं च तत्प्रवचनपुरुषस्य क्षायोपशमिकभावरूपस्य
अंगमिवांगं चेति स्थानांगमिति समुदायार्थः ।'

ॐ

(१६३) प्रतिष्ठानुं स्वरूप : द्वात्रिंशत् द्वात्रिंशिकामांथी।

देवोद्देशेन मुख्येयमात्मन्येवात्मनो स्थितिः ।
स्थाप्ये समरसापत्ते रुपचाराद्बहिः पुनः ॥१८॥
० प्रतिष्ठितस्य - ध्यानोत्थ - समापत्त्या परेष्वपि ।
फलं स्याद्वीतरागाणां सन्निधानं त्वसंभवि ॥१९॥

- भक्ति द्वात्रिंशिका, ५

'सव्व पाणभूअजीवसत्ताणं आसायणाए ।' - सज्झाय

(१६४) त्रिषष्टि प्रथम पर्व - लब्धधर्मनुं स्वरूप

'रत्नत्रये - धरेष्वेकाभक्तिस्तत्कार्य कार्य च ।
शुभैकचिन्ता संसार - जुगुप्सा चेति भावना ॥'

धर्मघोषसूरिनी देशना

(१६५) अंतिम आराधना : त्रिषष्टि दशम पर्व, सर्ग १

xxx दुष्कर्मगर्हणां जन्तुक्षामणां भावनामपि ।
चतुःशरणं च नमस्कारं चाऽनशनं तथा ॥२६६॥
एवमाराधनां षोढा स कृत्वा नन्दनो मुनिः ।
धर्माचार्यानक्षमयत् साधून् साध्वीश्च सर्वतः ॥२६७॥
षष्टिं दिनान्यनशनं पालयित्वा समाहितः ।
पञ्चविंशत्यब्दलक्षपूर्णायुः सोऽभवन्मृतः ॥२६८॥

श्लोक २३० थी २६७/८ - नंदनमुनिनी आराधना

ॐ

(१६६) मैत्र्यादि

आवश्यक चूर्णि, सामायिक व्याख्या, पृ० ६०६

'जाव समं आओवम्मेण सव्वसत्ताणं दुक्खस्स अकरणं, अकरणं नाम परिहरणं, समेण ताव मिट्ठाई, मधुरेणेत्यर्थः; अतः सव्वसत्तेसु महुरभावत्ताणं सम।'

- आवश्यक, मलय० पृ० ४६०

(१६७) अनुकम्पाप्रवणचित्तो जीवः सामायिकं लभते, शुभपरिणाम-युक्तत्वात्। पृ० ५५५

नमस्कारः सामायिकं, गमेव।

(१६८) आत्मलाभ सूक्ष्मता

इत्थमन्यैरुपदर्शिते योगमाहात्म्ये उपपत्त्यनुपपत्त्योर्दिशं प्रदर्शयन्नाह —

इह सिद्धिषु वैचित्र्ये बीजं कर्मक्षयादिकम्।
संयमश्चात्र सदसत्प्रवृत्तिविनिवृत्तितः ॥ २२ ॥ इहेति-

इह प्रागुक्तग्रन्थे सिद्धिषु वैचित्र्ये कर्मक्षयादिकं बीजं। तथाज्ञाने तथाज्ञानावरण-क्षयोपशमादेर्वीर्यविशेषे च वीर्यान्तरायक्षयोपशमादेर्हेतुत्वात्। संयमश्चात्रोक्तसिद्धिषु सत्प्रवृत्त्यसन्निवृत्तिभ्यां तथाविधक्षयोपशमाद्याधानद्वारैव बीजं, न तु तत्तद्विषयस्थान-प्रणिधानादिरूपः।

ॐ

अनन्त-विषयकज्ञानस्य प्रतिविषयं संयमासाध्यत्वा-
द्विहितानुष्ठान-प्रणिधानमात्रसंयमेनैव मोहक्षयात्तदुपपत्तेः ।
चित्तप्रणिधानार्थं त्वालंबनमात्रं क्वापि न वारयामः ।
केवलमात्मप्रणिधानपर्यवसान एव सर्वः संयमः
फलवानित्यात्मनो योगत्वं विना
सर्वं विलूनशीर्णं भवेदित्यधिकं स्वयमूहनीयम् ॥२२॥
- द्वात्रिंशिका २६, योगमाहात्म्यम्

प्रायश्चित्तं पुनर्योगः प्राग्जन्मकृतकर्मणाम् ।
अब्धीनां निश्चयादन्तः कोटाकोटिस्थितेः किल ॥२३॥
निकाचितानामपि यः कर्मणां तपसा क्षयः ।
सोऽभिप्रेत्योत्तमं योगमपूर्वकरणोदयम् ॥२४॥
अपि क्रूराणि कर्माणि क्षणाद्योगः क्षिणोति हि ।
ज्वलनो ज्वालयत्येव कुटिलानपि पादपान् ॥२५॥
दृढप्रहारिशरणं चिलातीपुत्ररक्षकः ।
अपि पापकृतां योगः पक्षपातान्न शंकते ॥२६॥
अहर्निशमपि ध्यातं योग इत्यक्षरद्वयम् ।
अप्रवेशाय पापानां ध्रुवं वज्रार्गलायते ॥२७॥
आजीविकादिनार्थेन योगस्य च विडंबना ।
पवनाभिमुखस्थस्य ज्वलनज्वालनोपमा ॥२८॥

ॐ

योगस्पृहापि संसारतापव्ययतपात्ययः ।
महोदयसरस्नीरसमीरलहरीलवः ॥ २९ ॥
योगानुग्राहको योऽन्यैः परमेश्वर इष्यते ।
अचिन्त्यपुण्यप्राग्भारयोगानुग्राह्य एव सः ॥ ३० ॥
भरतो भरतक्षोणीं भुञ्जानोऽपि महामतिः ।
तत्कालं योगमाहात्म्याद्बभुजे केवलश्रियम् ॥ ३१ ॥
पूर्वमप्राप्तधर्मापि परमानन्दनन्दिता ।
योगप्रभावतः प्राप मरुदेवा परं पदम् ॥ ३२ ॥
- इति योगमाहात्म्ये द्वात्रिंशिका ॥ २६ ॥

(१६९) द्रव्यस्तवकुं रूप - मैत्र्यादि

प्रतिमाशतक, पू० उपाध्याय यशोविजयजी विरचित

पूजा - पूजक - पूज्य - संगत - गुणध्यानावधान - क्षणे,
मैत्री सत्त्वगणेष्वनेन विधिना भव्यः सुखी स्यादिति
वैरव्याधि - विरोधमत्सरमदक्रोधैश्च नोपप्लवस्तत्को
नाम गुणो न दीक्षदलनो द्रव्यस्तवोपक्रमे ॥ ३३ ॥
व्याख्या - इति सत्त्वगणेषु प्राणिसमूहे मैत्री भवति ।
इतीति किं ? पूजेति - पूजा - पूजक - पूज्य - संगता
स्तत्पान्वयिनो गुणास्तेषां यत् ध्यान - ध्येय - ध्याता -
समापत्ति - समाधि - फलं ध्यानं ।

ततो द्रव्यविधानमनुप्रेक्षा तत्क्षणे तदवसरे। अनेन द्रव्यस्तव - विधिना भव्यः सर्वोऽपि सुखी स्यात् भवतु इति। च पुनस्तत्र उपद्रवो न भवति। वैरेति वैरं च व्याधिश्च विरोधिश्च मत्सरश्च मदश्च क्रोधिश्च तैः कृत्वा। तत्तस्मात् कारणात् द्रव्यस्तवोपक्रमे उपक्रममाणे द्रव्यस्तवे को नाम गुणो न भवति ? अपि तु भूयानेव भवतीति भावः। कीदृशो गुणः ? दीर्घदलनो दीर्घविच्छेदकारी ॥ २२ ॥

(१९०) त्रिरत्न रोगो तत्त्वार्थ

तत्त्वार्थी वाचि सर्वेषां, केषांचन मनस्यपि।
क्रियस्याऽपि नरीनर्ति, नित्यं जिनमतस्पृशां ॥ १ ॥

- योगशास्त्र प्र० ४, श्लो० १०२, टीकायां।

(१९१) संसार दुःखरूपता

परिणामाच्च तापाच्च संस्कारादृद्धिविधोप्यय्।
गुणवृत्तिविरोधाच्च हन्त दुःखमयः स्थितः ॥ २२ ॥

टीका : परिणामाच्च रक्षोत्तरं गर्धाभिवृद्धेरन्यप्राप्ति कृत-दुःखापरिहार-लक्षणा-दुःखान्तर-जननलक्षणाच्च। तापाच्च उपभुज्यमानेषु सुखसाधनेषु सुखानुभवकाले -ऽपि सदावस्थित - तत्प्रतिपन्थि - द्वेषलक्षणात्।

ॐ

संस्काराच्च अभिमताऽनभिमतविषयसन्निधाने
सुख - दुःख संविदोरुपजायमानयोः
स्वक्षेत्रे तद्वासना - संस्कार -
तद्वासनानुभव - परंपरया संस्कारानुच्छेदलक्षणात् ।
गुणवृत्तिविरोधाच्च गुणानां सत्त्वरजस्तमसां,
वृत्तीनां सुखदुःखमोहरूपाणां,
परस्पराभिभाव्याभिभावकत्वेन
विरुद्धानां जायमानानां
सर्वत्रैव दुःखानुवेधाच्चेत्यर्थः ।
हन्तदुःखमयो दुःखैकस्वभावः स्मृतः ।
- क्लेश - हानोपाय द्वात्रिंशिका, २५

(१९२) समापत्त्यादि

विषयस्य समापत्तिरुत्पत्तिर्भावसंशिनः ।
आत्मनस्तु समापत्तिर्भावो द्रव्यस्य तात्त्विकः ॥ १९ ॥

:टीका:

विषयस्यात्मातिरिक्तस्य भव्यस्य
समापत्तिर्भावसंशिनो भावाभिधानस्यैवोत्पत्तिरुच्यते ।
वदन्ति हि नयदक्षाः
'अनुपयुक्तो माणवकोऽप्यग्निरेवेति ।'

ॐ

शब्दार्थ - प्रत्येकानां तुल्याभिधानत्वान्नात्वर्थ -
सानयोः कथमनैकवृत्त्यास्थितयो,
एकत्वपरिणामः संभवति ।
चेतनाचेतनत्वयोर्विरोधादिति भावः ।
आत्मनस्तु समापत्तिर्द्रव्यस्य परमात्मदलस्य
तात्त्विकः सहजशुद्धो भावः परिणामः ॥१९॥

(१९३) मैत्र्यादि

'सत्त्वेषु मैत्रीं गुणिषु प्रमोदं,
क्लिष्टेषु जीवेषु कृपापरत्वम् ।
माध्यस्थ्यभावं विपरीतवृत्तौ ।
सदा ममात्मा विदधातु देव ! ॥१॥'

- अमितगति स्तोत्र, श्लो. १

त्रिषष्टिशलाकापुरुष चरित्र, पर्व १

रत्नत्रयैकधरेष्वेकाः भक्तिस्तत्कार्यकार्य च ।
शुभैकचिन्ता संसार — जुगुप्सा चेति भावना ॥

- धर्मघोषसूरि देशना, श्लोक २००

(१९४) आत्मसमदर्शित्व, जयदया -

धर्मपरीक्षा - श्री जिनमंडनगणि विरचित - पृ. ६/२
तथा आत्मवत्परत्र कुशलवृत्ति - चिन्तनं

ॐ

शक्तितस्त्यागतपसी च धर्माधिगमोपायाः।
एते आयुर्घृतमिव स्पष्टम् धर्मस्य
हेतुतया धर्मोऽभिधीयन्ते।
यतः - धम्मस्स कारणाइं,
जीवदया दाणपूअणाईणि।
सुहभावजणणाहेऊ, उवयारेणं हवइ धम्मो ॥१॥
० 'शुभैक चिन्ता, कुशलवृत्तिचिन्तनम्।'
(१९५) धर्मज्ञानो
- उपदेशपद, गा० २२४/५/६, पृ० १६९
'अकए बीजक्खेवे जहा सुवासेऽवि न भवती सस्सं।
तह धम्मबीयविरहे ण सुस्समाए वि तस्सस्सं ॥२२४॥'
व्या - अकृते - अविहिते बीजक्षेपे -
शालिमुद्गादे - बीजस्य वपने यथा,
सुवर्षेऽपि - जलभार - मेदुर - जलधर-
धारा - प्राग्भार - निपातलक्षणेऽपि
न नैव भवति सस्यं - धान्यं तथा,
'धर्मबीजविरहे' धर्मबीजानां - सम्यक्त्वादि
समुत्पादकानां धर्मप्रशंसादिकानां हेतूनां परिहारे न
सुषमायामपि समा नाम कालविभागः सुष्ठु - तीर्थंकर

जन्मादि महामहसहायत्वेनातिशयवती
सदा सुषमा तस्यां, किं पुनरितरसदास्तु
दुष्षमादि लक्षणास्वित्यपि शब्दार्थः,
तत्सत्त्वं स एव धर्म एव विषयाकांक्षा
बुभुक्षाक्षयावहत्वेन सत्त्वं भवति इति । यथोक्तम्-
'नाऽकारणं भवेत् कार्यं, नाऽन्यकारण कारणम् ।
अन्यथा न व्यवस्था स्यात्, कार्यकारणयोः क्वचित् ॥'
यस्मादेवं ततः किं कर्तव्यमित्याह —
आणा परतंतेहिं ता बीजाधाणमेत्थ कायव्वं ।
धम्मम्मि जहासत्ती परमसुहं इच्छमाणेहिं ॥ २२५ ॥
आज्ञा परतंत्रैः - सर्वज्ञ - वचनायत्ती - कृतात्मभिः
ता इति तस्माद् बीजाधानं - जिनमुनिप्रभृति
पवित्र पदार्थ कुशलचित्तादि लक्षणम्,
अत्र - प्रस्तुते कर्तव्यं धर्मे -
साध्यत्वेनाऽभिमते सति यथाशक्ति -
स्वसामर्थ्यानुरूपं परम सुखम् -
एकान्तिकात्यन्तिकानन्दसंदोहमयं शर्म इच्छद्भिः -
वांच्छद्भिरिति यथा जिनेषु कुशलं चित्तं इत्यादि ।
- गाथा ६, योगदृष्टि समुच्चय

ॐ

श्री उपदेशपद, गा० ३२२, पृ० २०२

एवं नाऊण इमं परिसुद्धं धम्मबीयमहिगिच्च ।
बुद्धिमया कायव्वो जत्तो सति अप्पमत्तेण ॥ ३२२ ॥

एवं मेघकुमारादि ज्ञातानुसारेण ज्ञात्वेमं धर्म-प्रतिबन्धं
दारुणपरिणामं परिशुद्धं सर्वातिचार-परिहारेण धर्म एव
श्रुत-चारित्राराधनारूपो बीजमनेक - कल्याणकलाप
-कल्पपादपस्य प्ररोहहेतुर्धर्मबीजं तदधिकृत्यापेक्ष्य
विधेयतया बुद्धिमता निरूपितबुद्धिरूपधनेन
पुंसा कर्तव्यो यत्न आदरः, सदा सर्वावस्थास्वपि,
अप्रमत्तेनाऽज्ञान - संशय - (गा० ३५८, पृ० २४७)
मिथ्याज्ञानादि - प्रमादाष्टक - परिहारवता ।
नवरं शुद्धधर्मबीजं शुद्धौ
भवभीरुभिर्भव्यैरादरपरैर्भाव्यमिति भावः ॥ ३२२ ॥

पृ० १६९ : धर्मबीजानि चैवं शास्त्रान्तरे परिपठितानि
दृश्यन्ते यथा - जिनेषु कुशलं चित्तं, तन्नमस्कार एव च ।
प्रणामादि च संशुद्धं, धर्मबीजमनुत्तमम् ॥ १ ॥
उपादेयधियाऽत्यन्तं, संज्ञा विष्कम्भणान्वितम् ।
फलाभिसन्धिरहितं, संशुद्धं ह्येतदीदृशम् ॥ २ ॥
आचार्यादिष्वपि ह्येतद्विशुद्धं भावयोगिषु ।
वैयावृत्त्यं च विधिवच्छुद्धाशयविशेषतः ॥ ३ ॥

ॐ

भवोद्वेगश्च सहजो, द्रव्याभिग्रहपालनम् ।
तथा सिद्धान्तमाश्रित्य, विधिना लेखनादि च ॥४॥
लेखना पूजना दानं, श्रवणं वाचनोद्ग्रहः ।
प्रकाशनाऽथ स्वाध्यायश्चिन्तना भावनेति च ॥५॥
दुःखितेषु दयाऽत्यन्तमद्वेषो गुणवत्सु च ।
औचित्यासेवनं चैव, सर्वत्रैवाऽविशेषतः ॥६॥

કર્મના ક્ષયક્ષયોપશમમાં દ્રવ્યાદિની સહકારિતા

(૧૧૬) શ્રી બૃહત્કલ્પ ટીકા, પીઠિકા પૃ. ૨૨૦

ननु च किं कोऽपि कस्यापि
लाभान्तरायकर्मक्षयोपशमसमुत्थां लब्धिमुपहन्ति ?
येनैवमुच्यते — ते गीतार्थास्तस्य लब्धिमुपघ्नन्ति इति,
अत्रोच्यते — भो भद्र ! किं न कर्णकोटरमुपागतं
सुप्रतीतमपि भवतो ढण्ढणमहर्षेर्लब्धिस्वरूपं
येनैवमनभिज्ञ इव भवान् परिप्रश्नयति ?
यद्वा अस्मिन्नेवार्थे अपरो भवतः
प्रत्ययनाय दृष्टान्तः प्रतिपाद्यते —

भिक्खु विह तण्ह वद्दल,
अभागधिज्जो जहिं जहिं न पडे ।
दुग - तिगमाईभेदे, पडइ तहिं जत्थ सो नत्थि ॥१४२॥

ॐ

कोइ किर पंचसइओ सत्थो अडविं पवन्नो।
तत्थ य एगो रत्तपडो निब्भग्गसिरसेहरो पंचण्ह वि
सयाणं पुण्णे उवहणइ। सो अ सत्थो तण्हाए पारद्धे।
दूरे अ अब्भवद्दलयं वासइ, तेसिं उवरि न पडइ।
ते दुहा भिण्णा। इयरो रत्तपडो पुव्विल्लाणं मज्झे मेलिओ।
सव्वत्थ पडइ, जत्थ सो तत्थ न पडइ,
जाव निव्वेडिओ एक्कओ जाओ। जत्थ सो तत्थ न पडइ।
एवं एयारिसा परस्स पुन्नो उवहणंति ॥
अत्थ गाथाक्षरार्थः — भिक्षुरेकः सार्थेन सार्धं
'विहं' अध्वानं प्रविष्ट इति शेषः।
ततस्तृष्णाया सार्थः प्रारब्धः। वार्दलं च वर्षितुमारब्धम्।
यत्र येषां मध्ये सोऽभाग्यो भिक्षुस्तत्र न वर्षं पतति।
ततः 'द्विक - त्रिकादिना'
द्विधा - त्रिधादिना प्रकारेण सार्थस्य भेदः कृतः।
तस्मिंश्च कृते यत्र स भिक्षुर्नास्ति तत्र सर्वत्र वर्षं पतति,
तस्योपरि न पततीति। अयं दृष्टान्तः।
अथार्थोपनयः – यथा स भिक्षुः पञ्चशतिकस्यापि सार्थस्य
पुण्यान्युपहतवान् एवमन्येऽप्येवंविधा अपरेषां
लब्धिमतामपि स्वस्वकर्मक्षयोपशमसमुत्थां
लब्धिमुपघ्नन्तीति ॥ १४२ ॥

संपादकस्य टीप नं. १ घ्नन्तीति । सद्दृष्टिः
સુદંષ્ટ્રદેવનો ઉપદ્રવ ભગવાનના પ્રભાવે કંબલ - સંબલે
નિવાર્યો, એથી નાવમાં બેઠેલાં બાળકોનું રક્ષણ થયું.

न चैतद् दृष्टान्तेनोच्यते,
कर्मक्षयक्षयोपशमादीनां द्रव्य - क्षेत्र - काल - भाव -
भवसव्यपेक्षतया तत्र तत्र प्रदेशे प्रतिपादनात् ॥९४२॥

(૧૧૯) જ્ઞાનીને જ સંદેહ હોય.

શ્રી બૃહત્કલ્પ સૂત્ર, પૃ. ૨૯૪, પ્રથમ ઉદ્દેશ, સૂ. ૧, ગા. ૯૩૨

दंसण - चरणा मूढस्स नत्थि समया व नत्थि सम्मं तु ।
विरई लक्खण चरणं, तदभावे नत्थि वा तं तु ॥ १ ॥

टीका : ज्ञानाभावादसौ मूढो भवति,
मूढस्य दर्शन-चारित्रे न स्तः ।
यद्वा प्रलम्बग्रहणादस्य जीवेषु समता न विद्यते ।
समताया अभावाच्च सम्यक्त्वमपि नास्ति,
तस्याऽपि सामायिक - भेदतया समता रूपत्वात् ।
विरति - लक्षणं चरणं भणितम्,
तच्च लक्षणं प्रलंबानि गृह्णतो न विद्यते ।
तदभावे लक्षणाभावे तत्तु
तत् पुनश्चारित्रं नास्ति ॥ ९३२ ॥

ॐ

## (૧૧૮) સામાયિક-પદ-માત્રનો પ્રભાવ

- તત્ત્વાર્થ ભાષ્યકારિકા - ૨૭

एकमपि तु जिनवचनाद्, यस्मान् निर्वाहकं पदं भवति।
श्रूयन्ते चाऽनन्ताः, सामायिक-मात्र-पद-सिद्धाः ॥२७॥

व्या०- एकमपि पदं, किं पुनरनेकान् सकल पदार्थसंग्रह इति तु शब्दो विशेषयति xxx

यस्मात्कारणात् निर्वाहकं सुगृहीतमप्येकस्य-मानमुत्तरोत्तर-ज्ञान-कारणत्वाद् भवोत्तारकमित्यर्थः।

न चेदं स्वमनीषिका इत्याह,

श्रूयन्ते चाऽनन्ताः इति च शब्दः समुच्चये, बीजला-भात् तदविनाशादुत्तरोत्तर-वृद्धिं सम्भवोऽवसीयते।

xxx एवं श्रूयन्ते प्रवचने —

'करोमि भदन्त! सामायिकमित्येतावतैव पदेन भावतः सुगृहीतेनाऽनन्तकालेन अनन्ताः सिद्धाः' इत्युक्तं प्रवचने, उदाहरणमात्रं तुशब्दार्थैः स्वाध्याय इति ॥२७॥

- सिद्धसेनीया टीका

'सहजाता गुणा द्रव्ये, सुवर्णे पीतता यथा।
क्रमभूतास्तु पर्याया, मुद्राकुण्डलतादयः ॥१॥'

- गुणस्थान क्रमारोह वृत्ति, श्लो० ६४

(१७९) मैत्र्यादि : संप्रति दशमं गुणं प्रचिकटयिषुराह -
'मूलं धम्मस्स दया, तदणुगयं सव्वमेवऽणुट्ठाणं ।
सिद्धं जिणिंद समए, भण्णिज्जइ तेणिह दयालू ॥ १७ ॥'
- धर्मरत्न प्रकरणम् ।

(१८०) मैत्र्यादि: वचनाद्यदनुष्ठानमविरुद्धाद्यथोदितम् ।
मैत्र्यादि - भाव - संयुक्तं, तद्धर्म इति कीर्त्यते ॥ ३ ॥
- धर्मबिन्दौ

xx पुनरपि कीदृशमित्याह - 'मैत्र्यादि - भाव - संयुक्तं'
मैत्र्यादयो - मैत्री - प्रमोद - कारुण्य - माध्यस्थ्य - लक्षणा ये भावा अंतःकरण - परिणामाः तत्पूर्वकाश्च बाह्यचेष्टा विशेषाः सत्त्वगुणाधिकक्लिश्यमानाऽविनेयेषु तैः संयुक्तं - संमीलितं, मैत्र्यादि भावानां निःश्रेयसाऽभ्युदय -फलधर्मकल्पद्रुममूलत्वेन शास्त्रान्तरेषु प्रतिपादनात् ।
x x x x x

(१८१) मोक्षमार्ग
- तत्त्वार्थ सूत्र, प्रथम अध्याय, प्रथम सूत्र

सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः ॥ १-१ ॥

टीका : इदमाद्यमनवद्यं मुक्तिपथोपदेशसूत्रं सकलतत्त्वार्थशास्त्राभिधेयमुररीकृत्य प्रावृतत्, द्वादशांग - प्रवचनार्थसंग्राहि - सामायिकसूत्रवत् ।
- सिद्धसेनीया टीका

(१८२) मार्गानुसारिता - उपदेशपद, गा० १९३, पृ० १५२

मासतुसादीणं तु मग्गाणुसारित्तओ सुही चेव ।
परिणामो विण्णेओ, सुहोहसण्णाणजोगाओ ॥ १९३ ॥

टीका: मासतुषादिकानां समागमप्रसिद्धानां जडसाधूनां पुनर्जीवाजीवादितत्त्वगोचरव्यक्तश्रुतोपयोगाभावेऽपि मार्गानुसारित्वतस्तीव्रमिथ्यात्वमोहनीयकर्मोपशमभावाद् इह च मार्गश्चेतसोऽवक्रगमनं भुजङ्गमनलिकायाम -तुल्यो विशिष्टगुणस्थानावाप्तिप्रगुणः स्वरसवाही जीवपरिणामविशेषस्तमनुसरति तच्छीलश्च यः स तथा, तद्भावस्तत्त्वं तस्मात्, शुभश्चैव परिशुद्ध एव व्यावृत्तविपर्यास दुःख एव परिणामो विज्ञेयः ।

ननु मार्गानुसारित्वेऽपि बठरता,
कथं तत्परिणामशुद्धिरित्याशंक्याह —

शुभौघसंज्ञानयोगात् शुभमविपर्यस्तमोघेन सामान्येन सुबहुविशेषावधारणाक्षमं यत्संज्ञानं वस्तुतत्त्वसंवेदन रूपं तस्य योगात् । ते हि बहुश्रुतमपठन्तोऽपि अति-तीक्ष्ण - सूक्ष्मप्रज्ञतया बहुपाठकस्थूलप्रज्ञपुरुषानुपलब्धं तत्त्वमवबुध्यन्त इति । तदुक्तं —

स्पृशन्ति शरवत्तीक्ष्णाः स्वल्पमन्तर्विशन्ति च ।
बहुस्पृशाऽपि स्थूलेन स्थीयते बहिरश्मवत् ॥ १ ॥ ॥१९३॥

ॐ

(१८३) ऐं नमः

'चतुःशरण पयन्ना'नी चूंटेल गाथाओ

पृ० १३५, चतुःशरण प्रकीर्णक, गा० ५३

अन्नेसु अ जीवेसु मित्तीकरुणाइगोयरेसु कयं ।
परिआवणाइ दुक्खं इण्हिं गरिहामि तं पावं ॥५३॥
इह मविअन्नमविअं, मिच्छत्तपवत्तणं जमहिगरणं ।
जिणपवयण पडिकुट्ठं, दुट्ठं गरिहामि तं पावं ॥५०॥
मिच्छत्त तमंधेण, अरिहंताइसु अवण्णवयणं जं ।
अन्नाणेण विरइयं, इण्हिं गरिहामि तं पावं ॥५१॥
सुअ धम्म संघ साहुसु, पावं पडिणीअयाइ जं रइयं ।
अन्नेसु अ पावेसुं, इण्हिं गरिहामि तं पावं ॥५२॥
जं मणवय काएहिं, कयकारिअअणुमइहिं आयरिअं ।
धम्म विरुद्धमसुद्धं, सव्वं गरिहामि तं पावं ॥५४॥
ओसरणमवसरित्ता, चउतीसं अइसए निसेवित्ता ।
धम्मकहं च कहंता, अरिहंता हुंतु मे सरणं ॥१८॥
वयणामएण भुवणं, निव्वावंतागुणेसु ठावंता ।
जिअलोअमुद्धरंता, अरिहंता हुंतु मे सरणं ॥२०॥
उच्छिन्नजरमरणाणं, समत्तदुक्खत्तसत्तसरणाणं ।
तिहुअणजणसुहयाणं, अरिहंताणं नमो ताणं ॥२२॥

कुवलइ परमबंभा, दुल्लहलंभा विमुक्कसंरंभा ।
भुवणघर धरणखंभा, सिद्धा सरणं निरारंभा ॥ २९ ॥
जिअलोअ बंधुणो, कुगइ सिंधुणो पारगा महाभागा ।
नाणाइएहिं सिवसुक्ख साहगा साहुणो सरणं ॥ ३१ ॥
हिंसाइ दोस सुन्ना कयकारुण्णा सयंसुप्पन्ना ।
अजरामरपहखुन्ना, साहू सरणं सुकयपुन्ना ॥ ३८ ॥
सुह परिणामो निच्चं चउसरणगमाइ आयरं जीवो ।
कुसलपयडी उ बंधइ, बद्धा उ सुहाणुबंधा उ ॥ ५९ ॥
मंदणुभावाबद्धा तिव्वणुभावाउ कुणइ ता चेव ।
असुहाउ निरणुबंधाउ, कुणइ तिव्वाउ मंदाउ ॥ ६० ॥
ता एयं कायव्वं बुहेहि निच्चंपि संकिलेसंमि ।
होइ तिकालं सम्मं, असंकिलेसंमि सुकयफलं ॥ ६१ ॥
चउरंगो जिणधम्मो न कओ चउरंग सरणमवि न कयं ।
चउरंग भवच्छेओ, न कओ हा हारिओ जम्मो ॥ ६२ ॥
इय जीव पमायमहारि-
वीरभद्दंतमेवमज्झयणं ।
झाएसु तिसंझमवंझ-
कारणं निव्वुइ सुहाणं ॥ ६३ ॥

'ॐ सोऽहं ॐ हंसः सोऽहं ॐ'

ॐ

## (૧૮૪) શુદ્ધૌષધસંધાન યોગ-ગુરુકુલવાસમાં નમસ્કાર સ્મરણ

- ઉપદેશપદ, ગાથા ૧૯૪/૫, પૃ. ૧૫૨

અથાઽધુનૈવ શુદ્ધૌષધસંધાનયોગમેષાં ભાવયન્નાહ-

'રુદ્દો ખલુ સંસારો, સુદ્ધો ધમ્મો ઉ ઓસહમિમસ્સ ।
ગુરુકુલસંવાસે સો નિચ્છયઓ ણાયમેતેણં ॥૧૯૪॥

વ્યા૦ રૌદ્રો વિષ-વિકારાદિવદ્દારુણઃ, ખલુરવધારણે, સંસારો નરનારકાદિભ્રમણરૂપઃ સર્વ-શરીર-સાધારણઃ પારમાર્થિક-વ્યાધિ-સ્વભાવતામાપન્નો યતઃ, તતઃ શુદ્ધો ધર્મ એવ પંચનમસ્કારસ્મરણાદિ-રૂપ ઔષધં નિવૃત્તિહેતુરસ્ય સંસારસ્ય । યથોક્તમ્-

'પંચ નમોક્કારો ખલુ, વિહિદાણં સત્તિઓ અહિંસા ય ।
ઇંદિયકસાય વિજઓ એસો ધમ્મો સુહપઓગો ॥૧॥

એવમવગતે યદેષ પુન નિર્ણીતવાન્, તદાહ-ગુરુકુલ-સંવાસે ગુરોરુક્તલક્ષણસ્ય કુલં પરિવારઃ, તત્ર સમ્યક્ તદુક્તમર્યાદયા વાસે સતિ સ શુદ્ધો ધર્મો નિશ્ચયતઃ પરમાર્થવૃત્ત્યા સમ્પદ્યતે । અનિશ્ચયરૂપસ્તુ કૃત્રિમ-સુવર્ણ-સદેશઃ પરીક્ષામક્ષમાણોઽન્યથાઽપિ સ્યાત્ । ન ચ તેન કિંચિત્, સંસાર-ફલત્વેનાઽસારત્વાદિતિ જ્ઞાતમેતેન માષતુષાદિના સાધુજનેનાઽપિ સતા ॥૧૯૪॥

ॐ

कुत एतदेवमिति चेदुच्यते: —

जं कुणति एवमेवं तस्साणं सव्वहा अलंघंतो ।
एगागि णेगणम्मिवि, तदखंडण णो इहं णातं ॥ १९५ ॥

व्या० - यदस्मात् कुरुते एवं निश्चयतः,
एवं गुरुकुलसंवासं मासतुषादिः ।
कीदृश - इत्याह - तस्य गुरोराज्ञामिच्छामिथ्याकारादि
परिपालनरूपां सर्वथा मनसा वाचा कायेन
च अलंघयन्ननति क्रामन् ।
नन्वेकाकिनस्तस्य किमित्याह — एकाकिनोऽनेकेऽपि
कुतोऽपि शिवादि पर्यायादेकाकिनोऽपरसाधु-
साहाय्यरहितस्य क्वचित् ग्रामनगरादौ गुरुणा स्थापने
सत्यपि तदखंडना गुर्वाज्ञानुल्लंघना वर्तते ।
अयमत्राऽभिप्रायः - बहु साधुमध्ये
लज्जाभयादिभिरपि भवत्येव गुर्वाज्ञानुल्लंघनम् ।
यदा त्वसौ एकाकितया, युक्तोऽपि गुरुकुलवास-
प्रवृत्तां सामाचारीं सम्यगनुवर्त्तते,
तदा ज्ञायते निश्चयतो गुरुकुलसंवाससवानसौ,
तत्साध्यस्य क्रियाकलापस्य सर्वथाऽखंडनात्,
इह गुर्वाज्ञानुल्लंघने ज्ञातं दृष्टान्तो शेयम् ॥ १९५ ॥

ॐ

'नमो नमः शारदायै ।' ॐ - ઉપદેશપદ, પૃ० ૧૬૨

ततोऽसौ सूरिपादान्तेऽधीते सामायिकश्रुतम् ।
उदीर्णं च तकत् तस्य कर्म जन्मान्तरार्जितम् ॥११॥
ततः सूरिरशक्तं तं पाठे मत्वा तपोधनम् ।
सामायिकश्रुतस्यार्थं तं संक्षेपादपीपठत् ॥१२॥

- ઉપદેશપદ, પૃ० ૧૫૨

(૧૮૫) શ્રુત - વિનય સમાધિ સ્થાનો

શ્રી દશવૈકાલિક સૂત્ર, અધ્યયન ૯, ઉદ્દેશ ૪

ચઉવિહા ખલુ સુઅસમાહી ભવઇ,
તં જહા સુઅં મે ભવિસ્સઇ ત્તિ અજ્ઝાઇઅવ્વં ભવઇ ।
એગગ્ગચિત્તો ભવિસ્સામિત્તિ અજ્ઝાઇઅવ્વં ભવઇ ।
અપ્પાણં ઠાવઇસ્સામિત્તિ અજ્ઝાઇઅવ્વં ભવઇ ।
ઠિઓ પરં ઠાવઇસ્સામિત્તિ અજ્ઝાઇઅવ્વં ભવઇ ।
ચઉત્થં પયં ભવઇ, ભવઇ અ ઇત્થ સિલોગો ।
નાણમેગગ્ગચિત્તો અ, ઠિઓ અ ઠાવઇ પરં ।
સુઆણિ અ અહિજ્જિત્તા, રઓ સુઅસમાહિએ ॥ ૨ ॥

૦ સુઅં મે આઉસં તેણં ભગવયા, એવમક્ખાયં, ઇહ ખલુ
થેરેહિં ભગવંતેહિં ચત્તારિ વિણય સમાહિઠાણા પન્નત્તા ।
કયરે ખલુ તે થેરેહિં ભગવન્તેહિં ચત્તારિ
વિણય સમાહિટ્ઠાણા પન્નત્તા ॥ ૧ ॥

इमे खलु ते थेरेहिं भगवन्तेहिं चत्तारि विणय
समाहिट्ठाणा पन्नत्ता, तं जहा - विणयसमाही,
सुयसमाही, तवसमाही, आयारसमाही,
विणए सुए अ तवे आयारे निच्च पंडिया,
अभिरामयन्ति अप्पाणं, जे भवंति जिइन्दिया ॥ १ ॥
चउव्विहा खलु विणयसमाही भवइ,
तं जहा अणुसासिज्जन्तो सुस्सूसइ, सम्मं सम्पडिवज्जइ,
वेयमाराहइ, न य भवइ अत्त सम्पग्गहिए,
चउत्थं पयं भवइ, भवइ य इत्थ सिलोगो ।
'पेहेइ हियाणुसासणं, सुस्सूसइ तं च पुणो अहिट्ठिए ।
न य माणमएण मज्जइ, विणयसमाही आययट्ठिए ॥ २ ॥'

(१८६) आज्ञायोग : उपदेशपद, गा० ३५८-९, पृ० २२७/१

उपसंहरन्नाह —

कयमेत्थ पसंगेणं, सुद्धाणाजोगतो सदा मतिमं ।
वट्टेज्ज धम्मट्ठाणे, तस्सिद्धिपरसाहगतेण ॥ ३५८ ॥

व्या० कृतं पर्याप्तं अत्राज्ञामाहात्म्यवर्णने प्रस्तुते प्रसंगेन दैव - पुरुषकार - स्वरूप - निरूपणादिना, शुद्धाज्ञायोगादुत्कटस्वभावात् सदा सर्वकालं मतिमान् अतिशयबुद्धिधनो वर्तेत प्रवृत्तिमान् भवेद् धर्मस्थाने सम्यक्त्वादि - प्रतिपत्ति - लक्षणे ।

ॐ

अथ हेतुमाह - तस्य शुद्धाशयानुसारिणो
धर्मानुष्ठानस्य स्वल्पस्यापीतरप्रसाधकत्वेनोत्तरोत्तर
- देशविरत्यादिधर्मानुष्ठान - निष्पादकत्वेन ॥ ३५८ ॥

एतदेव भावयति - ।

तस्सेसो उ सहावो जमिह समणुबंधई उ नियमेण ।
दीवोव्व कज्जलं सुणिहिउत्ति कज्जंतर समत्थं ॥ ३५९ ॥

तस्योक्तलक्षणस्य धर्मानुष्ठानस्यैव त्वेष
एव वक्ष्यमाण स्वभावलक्षणं यदितरधर्मानुष्ठान -
मनुबध्नाति न केवलं स्वयं भवतीति चकारार्थः ।
नियमेनाऽव्यभिचारेण कार्यान्तर -
समर्थमित्यत्रापि संबध्यते,
ततः कार्यान्तरसमर्थमुत्तरोत्तर - सुगतिलाभलक्षणाद् ।
दीप इव प्रदीपवत् कज्जलं प्रतीत - रूपमेव
सुनिहितोऽनिवातस्थाननिवेशित इति कृत्वा
कार्यान्तर समर्थं प्रस्तुत - प्रकाशमपेक्ष्य यत्कार्यान्तरं
तरुणी - नयन - निर्मलताप्रदानादि तत्सम्पादकमिति ।
यथा प्रदीपो सुनिहितोऽवश्यं कार्यान्तर -
समर्थं कज्जलमनुबध्नाति तथा
प्रस्तुतमनुष्ठानमप्यनुष्ठानान्तरमिति ॥ ३५९ ॥

ॐ

(१८७) परोपकारपरता: विशेषावश्यक भाष्य, पृ०८८९, गा० २२४३

अणुवकरे पराणुग्गह परो, पमाणं च जं तिहुयणस्स।
सामाइय उवएसे, तम्हा सो वेयवयणो त्ति ॥२२४३॥

व्या० xxx तथा, अनुपकृत-आत्मोपकारे निरपेक्ष एव परानुग्रह परः, प्रमाणं च सकल-त्रिभुवनस्य देसनात्, ततः सामायिकोपदेशोऽस्याक अहेवचनः।

(१८८) श्री अनुयोगद्वार सूत्र - सामायिकना भावार्थो

जो समो सव्व भूएसु, तसेसु थावरेसु वा।
तस्स सामाइयं होइ, इइ केवलिभासियं ॥१२८॥

य: सम: सर्वत्र मैत्र्यभावात्तुल्य:।

जस्स सामाणिओ अप्पा, संजमे नियमे तवे।
तस्स सामाइयं होइ, इइकेवलि भासिअं ॥१२७॥

सामानिक: सन्निहित-आत्मा-सर्वकालं व्यापारात् क्व?

संजमे जह मम न पिअं दुक्खं
जाणिअ एमेव सव्व जीवाणं।
न हणइ न हणावेइ अ
सममणइ तेण सो समणो ॥१२९॥

णत्थि य कोइ वेसो पिओ अ सव्वेसु चेव जीवेसु।
एएण होइ समणो एसो अन्नोऽवि पज्जाओ ॥१३०॥

उरगगिरि जलण सागर नहतल तरुगणसमो अ जो होइ।
भमरमिय धरणिजलरुह रविपवणसमो अ सो समणो ॥१३१॥
तो समणो जइ सुमणो भावेण य जइ ण होइ पावमणो।
सयणे अ जणे अ समो समो अ माणावमाणेसु ॥१३२॥

(१८९) कोण गच्छ छोडे ?

श्री गुरुतत्त्व विनिश्चय, पृ० ८, गा० ३०/३१

'जेण सुसीलाइगुणो, गणनिक्खेवारिहो गुरू भणिओ।
आणाभंगो इयराऽणुण्णाइ महाणिसीहम्मि ॥ ३० ॥'

'येन कारणेन सुशीलाद्यनेकगुणोपेतो
गणनिक्षेपार्हो गुरुर्भणितः।'

इतरस्य - एतद्गुणरहितस्य अनुज्ञायां - गच्छानुज्ञायां
क्रियमाणायामाज्ञाभंगो महानिशीथे भणितः।
तथा च तत्सूत्रं - से भयवं इत्यादि।

o ननु यद्येवं द्रव्यनिर्ग्रन्थानां संविग्नपाक्षिकाणामपि
गुरुत्वं व्यवस्थापितं तदा गुरुतत्त्व-
निश्चयार्थमनेक - गुणान्वेषणाऽकिंचित्करी
अकिंचित्करश्च तदर्थोऽयं प्रयासः इत्याशंक्याह -

गुरुतत्तनिच्छओ पुण, एसो एक्काइ गुणविहीणोऽवि।
जा सुद्ध मग्गकहणं, ताव ठिओ होइ दट्ठव्वो ॥ १५७ ॥

ॐ

व्या० - गुरुतत्त्वनिश्चयः पुनरेष एतावता महता प्रबन्धेन निरूप्यमाणः परीक्षणीयो गुरावनन्ता न साधारणा गुणान - वगाहमानोऽपि कालादिवशादेकादि - गुणविहीनोऽपि चण्डरुद्राचार्यादि - न्यायेन कतिपयेतरगुणहीनोऽपि तिष्ठंश्चारित्रापेक्षया मूलगुणसत्तामपेक्षमाणोऽपि सम्यक्त्वपक्षापेक्षया यावच्छुद्धमार्गकथनं तावत्स्थितो द्रष्टव्यो भवति । उक्तं चागमे -

'ओसन्नो वि विहारे, कम्मं सोहेइ सुलहबोही य ।
चरणकरणं विसुद्धं, उववूहंतो परूवंतो ।'

अत्र हि शुद्धि - मार्ग - प्ररूपणरूप - गुरुलक्षणेनैव कर्मशोधनं सुलभबोधित्वं च प्रतिपादितं । किं च -

'जो जेण सुद्धधम्मम्मि ठाविओ संजएण गिहिणा वा ।
सो चेव तस्स जाणइ, धम्मगुरू धम्मदाणाओ ॥ १ ॥'

इत्यादि वचनाद्गृहिणोऽपि यदि धर्मदान - गुणेन धर्मगुरुत्वं प्रसिद्धं तदा संविग्नपाक्षिकाणामखिल - धर्म - मर्यादा - प्रवर्त्तन - प्रवणानामुचिततरमेव धर्मगुरुत्वमित्येवम् दृष्ट्या विचारणीयम् ॥ १५७ ॥ एतदेव समर्थयति -

संसारुद्धारकरो, जो भव्वजणाण सुद्ध वयणेणं ।
णिस्संकिय गुरुभावो, सो पुज्जो तिहुअणस्सावि ॥ १५८ ॥

ॐ

व्या० स्पष्ट —

पवयणगाहाहिं फुडं, गुरुतत्तं णिच्छिदूण इणं लोऊ ।
गुरुणो आणाइ सदा, संजमजत्तं कुणह भव्वा ॥ १५९ ॥
गुरु आणाइ कुणंता, संजमजत्तं खवित्तु कम्ममलं ।
सुहमकलंकमतुलं, आद सहावं लहंति ॥ १६० ॥
विण्णाणणाणंदघणे, आदसहावम्मि सुद्ध लहदि ।
कयदेलगदाइं सग्गापवग्गसुक्खाइं सव्वाइं ॥ १६१ ॥
आद सहावे पत्ते, परपरिणामे सव्वहा चत्ते ।
वाहिविणामे व सुक्खं, पदइ अपदत्त संक्किट्टं ॥ १६२ ॥
सुद्धविनदणाणाणं, ण तदं किरिया मलम्मिसंत्तम्मि ।
जं खलु लवसमसुक्खं, लद्धसहावस्स णाणिस्स ॥ १६३ ॥

व्या० - 'सुष्ठ्वपि' मासक्षपणादि करणेनाऽत्यर्थमपि देतमानानां 'क्रियामले' मदमात्सर्यादिरूपे संति न, तदुपशमसुखं भवति, यत् खलु लब्धस्वभावस्य ज्ञानिनः प्रादुर्भवति, तस्मात् क्रियामलापनोदकत्वात् ज्ञानमत्यन्तमभ्यर्हितमिति भावः ।

० तम्हा गुरु आणाए, कायव्वा णाणपुव्विगा किरिया ।
अब्भासो कायव्वो, सुहणाणे जहासत्ति ॥ १६४ ॥

व्या० –

तस्मात् शुद्धचारित्रिणा गुर्वाराध्य ।
ज्ञानपूर्विका क्रिया कर्त्तव्या ।
संविग्नपाक्षिकेण शुद्धज्ञाने वा यथाशक्त्यभ्यासः कर्त्तव्यः,
अधिकारिवैचित्र्यात्प्रवृत्तेऽपि न दोष इति सर्वनयवादात्॥
० किं बहुणा इह जह जह, रागद्दोसा लहुं विलिज्जंति ।
तह तह पयट्टियव्वं, एसा आणा जिणिंदाणं ॥१६५॥
गुरुतत्तनिच्छयत्थिणं, सोहिंतु बुहा सया पसायपरा ।
पवयण सोहाहेउं, परगुणगहणे पवट्टंता ॥ १६६ ॥
(१९०) श्रुत – चिन्ता – सवितर्क ध्यान
पृ० ४१, श्लोक ६१
गुणस्थान – क्रमारोह – वृत्तिसमेतम्
श्रुतचिन्ता वितर्कः स्यात्, विचारः संक्रमो मतः ।
पृथक्त्वं स्यादनेकत्वं, भवत्येतत् त्रयात्मकम् ॥ ६१॥
० स्वशुद्धात्मानुभूतात्मभावश्रुतावलम्बनात् ।
अन्तर्जल्पो वितर्कः स्यात्, यस्मिंस्तत्सवितर्कजम् ।
व्या० – यस्मिन् ध्यानेऽन्तर्जल्पोऽन्तरंग – ध्वनिरूपो
वितर्को विचारणात्मकस्तत्सवितर्कं ध्यानं स्यात्,
कस्मात् स्वशुद्धात्मानुभूतात्मभावश्रुतावलम्बनात्,

ॐ

स्वकीय-निर्मल-परमात्मतत्त्वानुभवमयान्तरंग-भाव-
गतागमावलम्बनतः, इत्युक्तं सवितर्कं ध्यानम् ॥ ६२॥

द्रव्याद् द्रव्यान्तरं याति, गुणाद्याति गुणान्तरं ।
पर्यायादन्यपर्यायं, सपृथक्त्वं भवत्यतः ॥ ६३॥
इति त्रयात्मकं ध्यानं, प्रथमं शुक्लमीरितम् ।
प्राप्नोत्यतः परां शुद्धिं, सिद्धिश्री सौख्यवर्णिकाम् ॥ ६४॥
निजात्मद्रव्यमेकं वा, पर्यायमथवा गुणम् ।
निश्चलं चिन्त्यते यत्र, तदेकत्वं विदुर्बुधाः ॥ ७६॥
यद्व्यञ्जनार्थयोगेषु, परावर्त्त - विवर्जितम् ।
चिन्तनं तदविचारं, स्मृतं सद्ध्यान - कोविदैः ॥ ७७॥
निजशुद्धात्म - निष्ठं हि, भावश्रुतावलम्बनात् ।
चिन्तनं क्रियते यत्र, सवितर्कं तदुच्यते ॥ ७८॥
इत्येकत्वमविचारं, सवितर्कमुदाहृतम् ।
तस्मिन् समरसी भावं, धत्ते स्वात्मानुभूतितः ॥ ७९॥

(१९१) वीस स्थानको

विशेषात् तीर्थकृत्कर्म, येनाऽस्त्यर्जितमूर्जितम् ।
तत्कर्मोदयतोऽत्राऽसौ, स्याज्जिनेन्द्रो जगत्पतिः ॥ ८५॥

व्या० xxx तीर्थकृत्कर्मार्जने हि हेतुभूतान्यर्हद्भक्ति-
मुख्यानि विंशतिस्थानान्येतानि —

ॐ

अरिहंत सिद्ध पवयण गुरु थेर बहुस्सुए तवस्सीसुं ।
वच्छलया एएसिं अभिक्खनाणोवओगे अ ॥ १ ॥
दंसणविणए आवस्सए अ सीलव्वए निरइआरे ।
खणलवतवच्चियाए, वेयावच्चे समाही अ ॥ २ ॥
अपुव्वनाणगहणे, सुअभत्ती पवयणे पभावणया ।
एएहिं कारणेहिं, तित्थयरत्तं लहइ जीवो ॥ ३ ॥

અરિહંત, સિદ્ધ, પ્રવચન, આચાર્ય, સ્થવિર, ઉપાધ્યાય,
સાધુને વિષે વત્સલતા, જ્ઞાન, દર્શન, વિનય, ચારિત્ર,
બ્રહ્મચર્ય, ક્રિયા, તપ, ગૌતમ, જિન,
સંયમ, અભિનવ જ્ઞાન, સૂત્ર અને તીર્થ —
એ રીતે પણ વીસ સ્થાનકો અન્યત્ર કહ્યાં છે.

સ સર્વાતિશયૈર્યુક્તઃ, સર્વામરનરૈર્નતઃ ।
ચિરં વિજયતે સર્વોત્તમં તીર્થં પ્રવર્તયન્ ॥ ૮૬ ॥

० आत्मस्पन्दात्मिका सूक्ष्मा, क्रियायत्राऽनिर्वृत्तिका ।
तत्तृतीयं भवेच्छुक्लं, सूक्ष्मक्रियाऽनिवृत्तिकम् ॥ ९८ ॥
० आत्मानमात्मनाऽऽत्मैव, ध्याता ध्यायति तत्त्वतः ।
उपचारस्तदन्यो हि, व्यवहारनयाश्रितः ॥ १०९ ॥
व्या० xxx यः कश्चिदुपचारोऽष्टांग-योग-प्रवृत्तिलक्षणः
स सकलोऽपि व्यवहारनयाश्रितो ज्ञेयः ॥

(૧૯૨) નંદનમુનિની આરાધના

ત્રિષષ્ટિ પર્વ ૧૦, સર્ગ ૧, શ્લો. ૨૨૯ થી ૨૬૨

અર્હદ્ભક્ત્યાદિભિઃ સ્થાનૈર્વિંશત્યાઽપિ મહાતપાઃ ।
દુરર્જમર્જયામાસ તીર્થકૃન્નામ કર્મ સઃ ॥ ૨૨૯ ॥
૦ યે મયા સ્થાપિતા દુઃખે, સર્વે ક્ષામ્યન્તુ તે મમ ।
ક્ષામ્યામ્યહમપિ તેષાં, મૈત્રી સર્વેષુ મે ખલુ ॥ ૨૪૭ ॥
૦ ધીરેણ કાતરેણાઽપિ મર્તવ્યં દેહિના ખલુ ।
તન્મ્રિયેત તથા ધીમાન્ ન મ્રિયેત યથા પુનઃ ॥ ૨૫૫ ॥
અર્હન્તો મમ શરણં, શરણં સિદ્ધ - સાધવઃ ।
ઉદીરિતઃ કેવલિભિર્ધર્મઃ શરણમુચ્ચકૈઃ ॥ ૨૫૬ ॥
જિનધર્મો મમ માતા ગુરુસ્તાતોઽથ સોદરાઃ ।
સાધવઃ સાધર્મિકાશ્ચ બન્ધવોઽન્યત્તુ જાલવત્ ॥ ૨૫૭ ॥
૦ તીર્થકૃદ્ભ્યો નમસ્કારો દેહભાજાં ભવચ્છિદે ।
ભવતિ ક્રિયમાણઃ સ બોધિલાભાય ચોચ્ચકૈઃ ॥ ૨૫૯ ॥
સિદ્ધેભ્યશ્ચ નમસ્કારં ભગવદ્ભ્યઃ કરોમ્યહમ્ ।
કર્મેધોઽદાહિ યૈર્ધ્યાનાઽગ્નિના ભવસહસ્રજમ્ ॥ ૨૬૦ ॥
આચાર્યેભ્યઃ પંચવિધાચારેભ્યશ્ચ નમો નમઃ ।
યૈર્ધાર્યતે પ્રવચનં ભવચ્છેદે સદોદ્યતૈઃ ॥ ૨૬૧ ॥
શ્રુતં બિભ્રતિ યે સર્વં શિષ્યેભ્યો વ્યાહરન્તિ ચ ।
નમસ્તેભ્યો મહાત્મભ્ય ઉપાધ્યાયેભ્ય ઉચ્ચકૈઃ ॥ ૨૬૨ ॥

ॐ

शीलव्रतरत्नाढ्येभ्यः साधुभ्यश्च नमो नमः ।
भवलक्ष - सञ्चितं पापं निर्णाशयन्ति ये ॥२६३॥
चतुर्विधाहारमपि यावज्जीवं त्यजाम्यहम् ।
उच्छ्वासे चरमे देहमपि हि व्युत्सृजाम्यहम् ॥२६५॥
दुष्कर्मगर्हणां जन्तुक्षामणां भावनामपि ।
चतुःशरणं च नमस्कारं चानशनं तथा ॥२६६॥
एवमाराधनां षोढा स कृत्वा नन्दनो मुनिः ।
धर्माचार्यानक्षमयत् साधून् साध्वीश्च सर्वतः ॥२६७॥

(१९३) चरित्र ग्रन्थो (मैत्र्यादि भावो माटे)
- वीर सौभाग्य काव्य, सर्ग १७, श्लो० १५०/१

मैत्री मम स्वेष्विव सर्व - सत्त्वेषु
आस्तां क्षितिस्वर्बलिवेश्मजेषु ।
धर्मोऽर्जितो वैभववन्मया यः
तं प्रीतचेता अनुमोदयामि ॥१॥
वृन्दं द्रुमाणामिव पुष्पकालात्
यस्माद्दतेऽन्येद्धिफलं व्रतादि ।
शुभः स भावोऽस्तु ममापवर्ग -
मार्गानुलग्नांगभृतां सहायः ॥२॥
व्या० - क्षितिः भूलोकः, स्वर्देवलोकः,

ॐ

बलिवैरिणपाताललोकाः, तेषु जायन्ते स्मेति
त्रिजगज्जानास्तु समस्तजन्तुजातेषु
विषये मम मैत्री सखिता आस्ताम् ।
स्वेष्विव आत्मीयजनेषु यथा सख्यं स्यात् ।
अथवा मम मैत्री स्वैरिव सर्वं सर्ववैरास्ताम् ।
तत्र स्वर्बलिवैरिणजातैः सर्वसत्त्वैः सार्धं स्वैरिव
मम मैत्री अस्तु । अथ यो मया वैभववत् संपत्तिरिव
धर्मोऽर्जितः संचितः, प्रीतचेताः हृष्टमनाः
सन् तं धर्मं पुण्यं सुकृतमनुमोदयामि प्रशंसामि ॥१५०॥
यस्मात् शुभभावादृते विना अन्यदितरव्रतादि-
सर्वनियम - चारित्रादिपालन - प्रमुखं
सकलमपि विफलं वन्ध्यमेव । किमिव, वृन्दमिव ।
यथा पुष्पकालात् वसन्तसमयादृते समस्तं
पादपानां वृंदं कदम्बकं निष्फलं भवेत् ।
स शुभो भावो ममाऽस्तु,
निर्मलपरिणामो मम भवतु ।
किं भूतः, अपवर्गो मोक्षः अर्थाज्जगारं तस्मै
मार्गः पन्थाः तत्रानुलग्नास्तमनुप्रस्थिता
येऽग्रभूतो भव्यजनास्तेषां सहायः ॥ १५१ ॥

ॐ

(१९४) मैत्र्यादि (समताधिकार)

अध्यात्म कल्पद्रुमे - अत्र शान्तरसे रसता स्वरूप-
निरूपणाय विभावादयस्त्रयो भावा भावनीया इति।
वैराग्यसंसार-भीरुता तत्त्वज्ञान-वीतरागपरिशीलन
परमेश्वरानुग्रहादीनां विभावत्वम्, यमनियमाध्यात्म
शास्त्रचिन्तनादीनामनुभावत्वम्, धृति-स्मृति-निर्वेद
मत्यादीनां व्यभिचारित्वम्, एतैस्त्रिभिर्भावैर्व्यक्तस्य
तृष्णाक्षयरूपस्य शमस्य स्थायिभावत्वं भवति।
अस्यैव चर्वणा प्राप्तस्य शान्तरसत्वं भवति। xxx
न चाऽस्य विषयजुगुप्सारूपत्वाद्बीभत्सेऽन्तर्भावोऽपि
उक्तः। जुगुप्सा हि व्यभिचारिणी भवति न तु
स्थायितामेति पर्यन्तनिर्वाहे तस्या मूलत एवोच्छेदात्।
न च दयावीरेऽन्तर्भावः तस्याभिमानमयत्वादस्य
चाऽभिमानप्रशमैकरूपत्वात्। तथापि तयोर्दयावीर-
शान्तरसयोरेकत्वकल्पने वीररौद्रयोरपि तथात्वप्रसंगः।
दयावीरादीनां चित्तवृत्तिविशेषाणां सर्वथाऽहंकाररहितत्वे
शान्तरसप्रभेदत्वमहंकारसहितत्वे तु वीररस-
प्रभेदत्वमिति व्यवस्थाप्यमाने न कश्चिद्विरोध इति।

— अथ प्रथमः समताधिकारः।

વિશ્વજંતુષુ યદિ ક્ષણમેકં...... - શ્લો० ૮/૧૦/૧૧ વ ૧૫,
પંદરમો અધિકાર, શ્લો० ૮

(૧૯૫) મૈત્રીં પ્રમોદં કરુણાં ચ સમ્યક્.......

(૧૯૬) દ્રવ્યસ્તવ ફળ - પ્રતિમાશતક સ્વોપજ્ઞ ટીકા, પૃ० ૧૧૦

'પૂજા - પૂજક - પૂજ્ય - સંગતગુણધ્યાનાવધાનક્ષણે
મૈત્રી - સત્ત્વગણેષ્વનેનવિધિના ભવ્યૈઃ સુખીસ્યાદિતિ
વૈર-વ્યાધિ-વિરોધ-મત્સરમદક્રોધૈશ્ચનોપપ્લવસ્તત્કો
નામ ગુણો ન દોષદલનો દ્રવ્યસ્તવોપક્રમે ॥ ૩૩ ॥'

ટીકા - 'પૂજા' ઇતિ પૂજા - પૂજક - પૂજ્ય -
સંગતાસ્ત્રયાણામન્વયિનો યે ગુણાસ્તેષાં યદ્ દૃગ્ દૃશ્ય દૃષ્ટ
સમાપત્તિસમાધિફલં ધ્યાનં, તતો યદ્ અવધાનમનુપ્રેક્ષા
તત્ક્ષણે તદવસરે અનેન દ્રવ્યસ્તવવિધિના ભવ્યૈઃ
સર્વોઽપિ સુખીસ્યાદિતિ । સત્ત્વગણેષુ પ્રાણિસમૂહેષુ
મૈત્રી ભવતિ, અત એવ 'અલ્પાબાધયા
બહૂપકારાદનુકમ્પોપપત્તિઃ' — ઇતિ પંચલિંગીકારઃ ।
તથા વૈરં ચ વ્યાધિશ્ચ વિરોધશ્ચ મત્સરશ્ચ
મદશ્ચ ક્રોધશ્ચ તૈઃ કૃતોપપ્લવ ઉપદ્રવો ન ભવતિ,
તત્તસ્માત્ કારણાત્ દ્રવ્યસ્તવોપક્રમે ઉપક્રમ્યમાણે દ્રવ્ય-
સ્તવે દોષદલનો દોષોચ્છેદકારી કો નામગુણો ન ભવતિ ।
અપિ તુ ભૂયાનેવ ભવતીતિ ભાવઃ ॥ ૩૩ ॥

ॐ

(१९७) अनुकंपा - आस्तिक्य

- शास्त्रवार्ता, मोटी टीका, पृ० ३२७

'अनुकम्पा - आत्मवत् सर्वसत्त्वेषु सुख - दुःखयोः
प्रियाऽप्रियत्वदर्शनेन परपीडा - परिहारेच्छा ।
आस्तिक्यम् - भगवदुक्त - सूक्ष्मातीन्द्रिय -
भावेष्वसंभावना विपक्षः सद्भाव - परिणामः
इत्याहुरिति ध्येयमिदं विभावनीयम् ।'

(१९८) मैत्र्यादि (धर्म कल्पवृक्षनुं मूळ छे) - योगसार

मैत्री निखिलसत्त्वेषु, प्रमोदो गुणशालिषु ।
माध्यस्थ्यमविनेयेषु, करुणा दुःखिदेहिषु ॥१॥
धर्मकल्पद्रुमस्यैता, मूलं मैत्र्यादिभावनाः ।
यैर्नज्ञाता न चाऽभ्यस्ता, स तेषामति दुर्लभः ॥२॥

(१९९) मैत्र्या सर्वेषु सत्त्वेषु, प्रमोदेन गुणाधिके ।
माध्यस्थ्येनाऽविनीतेषु, कृपया दुःखितेषु च ॥१॥
सततं वासितं स्वान्तं, कस्यचित्पुण्यशालिनः ।
वितनुते शुभं कार्यं, द्विचत्वारिंशदात्मकम् ॥२॥

- आश्रवभावना, धर्मसंग्रह भा० २

(२००) 'तत्त्वं धर्मस्य सुस्पष्टं, मैत्रीभाव विकासनम् ।
परोपकारनिर्माणं, शमवृत्त्युपासनम् ॥१॥'

(२०१) सम्यग्दर्शन - शास्त्रवार्ता, मोटी टीका, पृ० ३३८
इदमेव हि प्रधानो मोक्षोपायः । उक्तं च -
'ज्ञान - प्रधान - जीवातुर्बीजं ज्ञानचरित्रयोः ।
हेतुस्तपः श्रुतादीनां, सद्दर्शनमुदीरितम् ॥ १ ॥' - इति

(२०२) श्री गुरुतत्त्व विनिश्चय, पृ० ८०/१, श्लो० ११७
'जइआ णेणं चत्तं, अप्पणओ णाणदंसणाचरित्तं ।
तइआ तस्स परेसुं, अणुकंपा णत्थि जीवेसु ॥ ११७ ॥'
टीका - यदाऽनेनात्मनः सम्बन्धि - ज्ञानदर्शनचारित्रं त्यक्तं तदा तस्य परेषु जीवेष्वनुकम्पा नास्ति ।
यस्य ह्यात्मनो दुर्गतौ प्रपततो नाऽनुकम्पः ।
तस्य कथं परेष्वनुकम्पा भवेत् ?
न कथञ्चित् स्यात्, स्वानुकम्पार्थप्रवृत्त्यनुषंगलभ्यत्वात् परानुकम्पाया इति भावः ॥ ११७ ॥
भवसयसहस्सलद्धं, जिणवयणं भावओ जहंतस्स ।
जस्स ण जायं दुक्खं, तस्स ण दुक्खं परे दुहिए ॥ ११८ ॥
टीका - यस्य भवशतसहस्त्रैः कथमपि लब्धं जिनवचनं भावतः परमार्थतो जहतो दुःखं न जातं तस्य परस्मिन् दुःखिते कथं दुःखम् ?
न कथंचित्, आत्मदुःखे दुःखितस्यैव परदुःखे दुःखितत्वसंभवात् इति भावः ॥ ११८ ॥

(२०३) संसारविरत्तस्स उ, आणाभंगो महब्भयं होइ ।
गारवरहिअस्स पुणो, जिणआणाभंजणं कीला ॥ ११९ ॥

(२०४) સામાયિક પદમાત્રનો પ્રભાવ (૧૧૮)

- તત્ત્વાર્થકારિકા ૨૭, મોટી ટીકા, પૃ. ૧૭, દેવગુપ્ત ટીકા ।

एकमपि तु जिनवचनाद् यस्मान् निर्वाहकं पदं भवति ।
श्रूयन्ते चाऽनन्ताः सामायिकमात्रपदसिद्धाः ॥ २७ ॥

टीका - एकमपि पदं, किं पुनरियान् सोऽपदार्थसंग्रह इति तु शब्दो विशेषयति, जिनवचनादित्यवच्छेदे पञ्चमी, यथा समूहाच्छुक्लं प्रकाशते । यस्मादिति कारणे पञ्चमी । यस्मात् कारणात् निर्वाहकं सुगृहीतमप्येकमस्थान मुत्तरोत्तर - स्थानकारणत्वात् भवोत्तारकमित्यर्थः ।
न चेदं स्वमनीषिका इत्याह, श्रूयन्ते इत्यादि,
श्रूयन्ते चाऽनन्ताः इति च शब्दः समुच्चये,
बीजलाभात् तदविनाशात् उत्तरोत्तरवृद्धि -
सम्भवोऽवसीयते । श्रूयन्ते चेत्यभिप्रायावधारणे,
एवं श्रूयन्ते प्रवचने - 'करोमि भदन्त !'
सामायिकमित्येतावतैव पदेन भावतः सुगृहीतेनाऽनन्त
कालेन 'अनन्ताः सिद्धा' इत्युक्तं प्रवचने,
उदाहरणमात्रं तुषमाषैः स्वाध्याय इति ।

- सिद्धसेनीया टीका

स्याद्बुद्धिर्जिनवचनैकदेशसंग्रहत्वात् शिष्यहितप्रतिसा
वितथा स्यात्, सर्वजगत्स्वभावनिर्णयात्
हिताहितप्राप्तिपरिहारार्थिनामनुग्रहः स्यात्,
सकलजगत् तत्त्वं च समस्त-श्रुतौघ-प्रतिपाद्यम् इति।
उच्यते, नाऽयं नियमः श्रुतार्णवस्य
पारंगतवत एव श्रेयः प्राप्तिरिति,
किन्त्वेतदपि दृष्टं प्रवचने धर्मस्यैकस्यापि
पदस्योपयोगः संसारनिर्वाहकः किन्तु,
पुनरेवं विधार्थविस्तारविषयस्येति,
तस्मात् संक्षेपात् विस्ताराच्च जिनवचनं श्रेयस्करमिति।
तदाहएकमपि तु जिनवचनाद् इत्यादि
यावत् धर्म्यं च वाच्यं च (२७-२८) इति।
ग्राह्यं अध्ययनश्रवणाभ्यां, धार्यमनुप्रेक्षणादिभिः, वाच्यमर्थ
विचारणादिभिः। ग्रहणधारणे तावदात्मोपकारिणी।
ब्रुवतोऽनुग्रहबुद्ध्या... वक्ता हि यदा स्तुतिमानलाभादि
निरीहः कथमपि श्रोतारोऽनुगृहीताः प्रतिबुध्येरन्नित्येवाभि
-बुद्धिर्हितमुपदिशति, तदाऽस्यैकान्ततो भवति धर्मः।
एवं च कृत्वा स्वपरशिवाभो नः प्रवचनेषु
शुभाशुभोपचयं प्रति परं प्रमाणमिति दर्शितम् ॥२९॥

(२०५) हितोपदेश - कर्त्तव्य

हितोपदेशो च कर्त्तव्यो निःश्रेयसः
वाप्त्युपायोपदेशात् नाऽन्यः कश्चिद्धितोपदेश इत्युक्तात्।
सूत्रम् - सम्यग् - दर्शन - ज्ञान - चारित्राणि मोक्षमार्गः।
टीका - इदमादिमनवद्यं मुक्तिपथोपदेशसूत्रं
सकलतत्त्वार्थ शास्त्रस्याऽभिधेयपुरस्सरीकृत्य प्रावृतत्,
द्वादशांग - प्रवचनार्थ - संग्राहि - सामायिक - सूत्रवत्।
येन इह शास्त्रे प्रसंगानुप्रसंगतस्त्रय एव पदार्थाः
सम्यग्दर्शनादयो विमुक्तेः कारणत्वेन निरूप्यन्ते।

(२०६) नमस्कार - श्रुतस्कंध

- प्रतिमाशतक, मोटी टीका, श्लो० ३, पृ० १३

पंचपदनमस्कारस्य सर्वश्रुतस्कन्धाऽभ्यन्तरभूतो,
नवपदस्य सचूलत्वात् पृथक् - श्रुतस्कंध
इति प्रसिद्धाम्नायोऽस्य हि
निर्युक्ति - चूर्ण्यादयः पृथगेव प्रभूता आसीरन्।
कालेन तद्व्यवच्छेदे मूलसूत्र मध्ये
लिखनं कृतं पदानुसारिणा वज्रस्वामिनेति
महानिशीथपंचमाध्ययने व्यवस्थितं,
तथा च तद्ग्रन्थः -

ૐ

(૨૦૭) નામાદિ ત્રણ નિક્ષેપ - અરિહંત

પૃ૦ ૪, શ્લો૦ ૨: 'નામાદિ ત્રયમેવ ભાવભગવત્ xxx'

'તેન ભાવનિક્ષેપાઽધ્યાત્મર્પનાયકત્વેન
નામાદિનિક્ષેપત્રયસ્ય,
અર્હત્પ્રતિમાં સ્થાપનાનિક્ષેપ-સ્વરૂપત્વેનાઽનાદૃતવતાં,
ભાવં ભાવનિક્ષેપં પુરસ્કુર્વતાં - વાઙ્માત્રેણ પ્રમાણયતાં,
દર્પણે નિજમુખાલોકાર્થિનાં અન્ધાનામિવ કા મતિઃ ?
ન કાચિદિત્યર્થઃ ।
નિક્ષેપત્રયસ્યાઽનાદરે ભાવોલ્લાસસ્યૈવ કર્તુમશક્યત્વાત્ ।
'શાસ્ત્રે ઇવ નામાદિત્રયે હૃદયસ્થિતે સતિ
ભગવાન્ પુર ઇવ સ્ફુરતિ, હૃદયમિવાનુપ્રવિશતિ,
મધુરાલાપમિવાઽનુવદતિ, સર્વાઙ્ગીણમિવાઽનુભવતિ,
તન્મયીભાવમિવાપદ્યતે, તેન ચ સર્વકલ્યાણસિદ્ધિઃ ।'
તદાહ - 'અસ્મિન્ હૃદયસ્થે સતિ
હૃદયસ્થસ્તત્ત્વતો મુનીન્દ્ર ઇતિ ।
હૃદયસ્થિતે ચ તસ્મિન્ નિયમાત્ સર્વાર્થસંસિદ્ધિઃ ॥ ૧ ॥'
'ચિન્તામણિઃ પરોઽસૌ,
તેનેયં ભવતિ સમરસાપત્તિઃ ।
સૈવેહ યોગિમાતા નિર્વાણફલપ્રદા પ્રોક્તા ॥ ૨ ॥'

इति तत् कथं निक्षेपत्रयादरं विना भावनिक्षेपादरः ?
भावोल्लासस्य तदधीनत्वात् ।
न च नैसर्गिक एव भावोल्लास इत्येकान्तोऽस्मिन् जैनमते,
तथा सति सर्वव्यवहारोच्छेदप्रसंगादिति स्मर्तव्यम् ।
पृ० ८ : इति प्रशस्तभावसंबंधिनां सर्वेषां
निक्षेपाणां प्रशस्तत्वमेवेति निर्व्यूढम् ।

(२०८) नामादि चार निक्षेप

पृ० १० : एतेन सिद्धचक्रादेराराध्यत्वमपि व्याख्यातं,
ज्ञानदर्शनचारित्ररूप - भावतीर्थत्वेनाऽस्य
द्रव्यतीर्थत्वादनन्तकोटिसिद्धस्थानत्वस्याऽन्य-
त्राऽविशेषेऽपि स्फुटप्रतीयमानतद्भावेन
तीर्थस्थापनयैवाऽत्र विशेषात्,
अनुभवादिना तथासिद्धेः श्रुतपरिभाषा
भावस्वातंत्र्यादन्यथा चतुर्वर्णश्रमणसंघे तीर्थत्वं
तीर्थकरे तु तद्बाह्यत्वमित्यपि विचारकोटिं नाटीकेत,
व्यवहारविशेषात् तथा परिभाषणामपरिभाषणां
च न व्यामोहात् विपश्चितामिति स्थितं ।
भावनिक्षेपे तु न विप्रतिपत्तिरिति
चतुर्णामपि सिद्धमाराध्यत्वम् ।

ૐ

(૨૦૯) સામાયિક : શ્રી ભગવતીજીનો પાઠ, પ્રશ્નોત્તર નં. ૨૮૭

સામાઇઅંતિ સમભાવરૂપમ્ ।
સામાઇયસ્સ અટ્ઠંતિ પ્રયોજનમ્ – નિર્જરણરૂપમ્ ।
આત્માનોઽસ્માકં મતે સામાયિકમિતિ – યદાહ –
'જીવોગુણપડિવન્નો નયસ્સ દવ્વટ્ઠિયસ્સ સામાઇયં ।
સો ચેવ પજ્જવનયટ્ઠિયસ્સ જીવસ્સ એસ ગુણો ॥૧॥'
સામાયિકાઽર્થોઽપિ જીવ એવ, કર્માનુપાદાનાદીનાં
જીવગુણત્વાત્, જીવાઽવ્યતિરિક્તત્વાચ્ચ ગુણાનામિતિ ।

(૨૧૦) નમસ્કાર – વિશેષાવશ્યક ભાષ્ય, પૃ. ૧૧૧૧, ગા. ૨૮૦૪

તર્હિ ભવન્ત એવ કથયન્તુ – કિમિહ નમસ્કાર
વ્યાખ્યાને કારણમ્ ? ઇત્યુપસન્નો પ્રેરકે સૂરિરાહ –
'તમ્હા સો સુત્તં ચિય, તદાઇભાવાદઓ તયં ચેવ ।
પુવ્વં વક્ખાણેઉં પચ્છા વોચ્છામિ સામઇયં ॥૨૮૦૪॥'
ટીકા – તસ્માદ્ નમસ્કારસ્તત્ત્વતઃ સામાયિકસૂત્રમેવ,
તદાદિભાવાત્ – સામાયિકાદાવુપન્યાસસદ્ભાવાત્,
'કરેમિ ભંતે । સામાઇયં' ઇત્યાદિ સામાયિક –
સૂત્રાઽવયવવદિતિ । અતઃ પરમાર્થેન સામાયિકસૂત્રત્વાત્
ન પુનર્મંગલાર્થત્વાત્ તમેવ નમસ્કારં પૂર્વમાદૌ
વ્યાખ્યાય પશ્ચાત્ સામાયિકાર્થં વક્ષ્યામિ ।
ઇતિ ગાથા પંચકાર્થઃ ॥૨૮૦૪॥

(२११) सामायिक - पृ० १३/१४

अथवा, अन्यथा निरुक्तविधिरुच्यते इत्याह -

'अहवा निरुत्तविहिणा, सामं सम्मं समं च जं तस्स।

इक्कमप्पए पवेसणमेयं सामइयं नेयं ॥३४८३॥'

टीका - xxx आत्मोपमया परेषां दुःखस्याकरणं सामेह गृह्यते,

xxx तथा, सम्यग्दर्शनज्ञानचारित्रत्रयस्य

परस्परं योजनं सम्यगिहोच्यते,

निर्वाणसाधकत्वेन तद्योगस्यैव परमार्थतः सम्यग्रूपत्वात्।

xxx तथा, रागद्वेषमध्यस्थस्यात्मनः

सर्वत्रतुल्यरूपेण वर्तनं सममुच्यते xxx ॥३४८३॥

(२१२) सामायिक - आवश्यक हारिभद्रीय, पृ० ४९०, उपसंहार

सामायिकस्य विवृतिं कृत्वा यदवाप्तमिह मया कुशलम्।

तेन खलु सर्वलोको लभतां सामायिकं परमम् ॥

० यस्माज्जगाद भगवान् सामायिकमेव निरुपमोपायम्।

शारीरमानसानेक - दुःखनाशस्य मोक्षस्य ॥२॥

(२१३) सम्यग्दर्शन - शास्त्रवार्ता, मोटी टीका, पृ० 330

दर्शनाऽवाप्तौ यत्स्यात् तदाह -

'सति चाऽस्मिन्नसौ धन्यः सम्यग्दर्शनसंयुतः।

तत्त्वश्रद्धानपूतात्मा रमते न भवोदधौ ॥८॥'

० सति चाऽस्मिन् दर्शने, असौ - तथाभव्यत्वभाजनं जनः, धन्यैः, लब्धचिन्तामणिदरिद्रवत् निश्चितार्थत्वात्, सम्यग्दर्शनसंयुतः - फलपर्यन्त - हेयोपादेयविवेकवान्, प्रतिज्ञातप्रवृत्तेर्निर्वहणे हि न सम्यक्त्वमिति समयविदः,

तत्त्वश्रद्धानेन xxx 'इदमित्थमेव'

इति निश्चयरूपेण तत्त्वाभिनिवेशेन,

समारोप - विघातकृतचित्तकालुष्यापनादिना मिथ्यात्व - मोहनीयादिक्षयोपशम - जनितेन चेतः प्रसादेन वा ।

पूतात्मा पवित्राशयः, भवोदधौ xxx

संसारसमुद्रे न रमते तत्त्वदर्शित्वेन भवाऽबहुमानित्वात्, प्रागर्जितकर्मोपनीते सुखदुःखे भुंजानस्यापि विषयद्वन्द्वस्वरूपस्य भावेन परमार्थतस्तदभोजित्वात् ।

उक्तं च समयसारकृताऽपि -

'सेवंतो विण सेवइ, असेवमाणो वि सेवए कोइ' इति ।

लौकिकैरपि उक्तम् - 'आहता हि विषयैकतानता ध्यानधौत मानसं न लिम्पति ।'

xxx तत्त्वश्रद्धानेन - श्रवणेच्छारूपशुश्रूषोत्तर - श्रोत्रोपादानरूप - ग्रहणोत्तराऽविस्मरणरूप - धारणोत्तर मोह - संदेह - विपर्ययव्युदास - प्रधानज्ञानरूप -

ॐ

विशेषोत्तर - विशेषतार्थावलम्बन -
तद्विधिवितर्करूपोहोत्तर - प्रत्यवाद - संभावना
निमित्तोक्तयुक्तिविरुद्धार्थ - आवर्तनात्मकापोहोत्तरेण
विशेषापोहानुगम - विज्ञुप्तेन xxx।

(૨૧૪) સમ્યગ્જ્ઞાનવાદમાં સમ્યગ્જ્ઞાનવાદ

સન્મતિ પ્રકરણ, તૃતીય કાંડ, ગા૦ ૨૮, પૃ૦ ૨૮૫
ગુજરાતી અનુવાદ પ્રકાશક: ગુજરાત વિદ્યાપીઠ,
- આવૃત્તિ ૨જી, ઈ. ૧૯૫૨

णियमेण सद्दहंतो छक्काए भावओ न सद्दहइ।
हंदी अपज्जवेसु वि सद्दहणा होइ अविभत्ता ॥२८॥

અર્થ: છ કાયોને નિયમથી શ્રદ્ધતો પુરુષ ભાવથી શ્રદ્ધા નથી જ કરતો, કારણકે વિભાગો - પર્યાયોમાં પણ અવિભક્ત શ્રદ્ધા થાય છે. જૈનશાસનમાં સંસારી જીવના છ નિકાયો (જાતિઓ) બતાવેલ છે અને આચારની બાબતમાં કહ્યું છે કે: હિંસા અર્થાત્ જીવઘાત અને તે અધર્મનું કારણ છે. આ બંને વિચારોને એકાંતરૂપે ગ્રહણ કરવામાં યથાર્થતાનો લોપ થતો હોવાથી અનેકાંતદૃષ્ટિ રહેતી જ નથી. જીવની છ જ જાતિઓ છે અથવા છ જાતિઓ જ છે,

અહીં એકાંત માનતાં ચૈતન્યરૂપે જીવતત્ત્વનું અસ્તિત્વ ભૂલાઈ જવાય છે અને માત્ર દેહ જ દૃષ્ટિમાં આવે છે,

તેથી પૃથ્વીકાય આદિ છ વિભાગોને એકાંતરૂપે ગ્રહણ ન કરતાં તેમાં ચૈતન્યરૂપે જીવતત્ત્વનું એકપણું ગ્રહણ કરવું, એજ યથાર્થ છે અને એજ રીતે આત્મા એક છે કે અનેક છે, એવા શાસ્ત્રના ભિન્ન-ભિન્ન વાક્યોનો સમન્વય થાય છે.

તે જ પ્રમાણે જીવનો ઘાત એકાંત હિંસારૂપે સમજવામાં પણ યથાર્થતાનો લોપ થાય છે, કારણકે પ્રસંગવિશેષમાં જીવનો ઘાત હિંસારૂપ નથી પણ ગણાતો. કોઈ અપ્રમત્ત મુનિ સંપૂર્ણ જાગ્રત રહ્યા છતાં અને સંપૂર્ણ યતના રાખવા છતાં જ્યારે જીવને બચાવી નથી શકતો, ત્યારે તેના દ્વારા થયેલો એ ઘાત હિંસાની કોટિમાં નથી આવતો.

તેથી ક્યારેક જીવઘાત એ અહિંસા પણ છે.

માટે જીવઘાતને એકાંત હિંસારૂપે કે એકાંત અહિંસારૂપે ગ્રહણ ન કરતાં યોગ્ય રીતે ઉભયસ્વરૂપ સમજવામાં જ અનેકાંતદૃષ્ટિ છે અને તે જ સમ્યગ્દૃષ્ટિ છે.

ॐ

(२१५) पंचपरमेष्ठि ध्यान

- श्री तत्त्वानुशासन, पृ० ३२, श्लो० ११७ - ८ - ९

'पुरुषः पुद्गलः कालो, धर्माधर्मौ तथाऽम्बरम् ।
षड्विधं द्रव्यमाम्नातं, तत्र ध्येयतमः पुमान् ॥ ११७ ॥
सति हि ज्ञातरि ज्ञेयं ध्येयतां प्रतिपद्यते ।
ततो ज्ञानस्वरूपोऽयमात्मा ध्येयतमः स्मृतः ॥ ११८ ॥
तत्रापि तत्त्वतः पञ्च ध्यातव्याः परमेष्ठिनः ।
चत्वारः सकलास्तेषु सिद्धः स्वामीति निष्कलः ॥ ११९ ॥'

(२१६) मैत्र्यादि : - पातंजल योगदर्शन, व्यास भाष्य

'प्रसन्नमेकाग्रं स्थितिपदं लभते ।'

टीका - प्रसन्नं च बहिर्भाणोभ्य उपायेभ्यः एकाग्रं स्थितिपदं लभते । असत्यां पुन मैत्र्यादिभावनायां न ते उपायाः स्थित्यै कल्पन्त इति ॥

(२१७) मैत्र्यादि - पातंजल योगदर्शन, व्यास भाष्य समेतम्

'मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्य - विषयाणां भावनातश्चित्तप्रसादनम् ॥ १ - ३३ ॥'

भाष्य : तत्र सर्वप्राणिषु सुखसंभोगापन्नेषु मैत्रीं भावयेत् । दुःखितेषु करुणाम् । पुण्यात्मकेषु मुदिताम् । अपुण्यशीलेषूपेक्षाम् ।

ॐ

एवमस्य भावयतः शुक्लो धर्म उपजायते । ततश्च चित्तं प्रसीदति । प्रसन्नमेकाग्रं स्थितिपदं लभते ॥ ३३ ॥

वाचस्पति टीका: - अपरिकर्मितमनसोऽस्थ्यादिमतः समाधितदुपाय - संपत्त्यनुत्पादाच्चित्त - प्रसादनोपायानसूयादिविरोधिनः प्रतिपादयितुमुपक्रमते - यस्य चित्तस्यावस्थितस्य शास्त्रेण परिकर्म - निर्दिश्यते - सुखितेषु मैत्रीं सौहार्दं भावयत ईर्ष्याकालुष्यं निवर्तते चित्तस्य ।

दुःखितेषु च करुणामात्मनीव परस्मिन् दुःखप्रहाणेच्छां भावयतः परापकारचिकीर्षाकालुष्यं चेतसो निवर्तते । पुण्यशीलेषु प्राणिषु मुदितां हर्षं भावयतोऽसूयाकालुष्यं चेतसो निवर्तते । अपुण्यशीलेषु चोपेक्षां माध्यस्थ्यं भावयतोऽमर्षकालुष्यं चेतसो निवर्तते ।

ततश्चाऽस्य राजसतामसधर्मनिवृत्तौ सात्त्विकः शुक्लो धर्म उपजायते । सत्त्वोत्कर्षसंपन्नः संभवति । वृत्तिनिरोधिपक्षे तस्य प्रसादस्वाभाव्याच्चित्तं प्रसीदति । प्रसन्नं च वक्ष्यमाणेष्व उपायेष्व एकाग्रं स्थितपदं लभते । असत्यां पुनर्मैत्र्यादिभावनायां न ते उपायाः स्थित्यै कल्पन्त इति ॥ ३३ ॥

ૐ

(૨૧૮) જ્ઞાનાર્ણવ, પૃ. ૨૭૧, પ્રકરણ ૨૭, શ્લોક ૧ થી ૧૯

મૈત્ર્યાદિ ભાવોનું વર્ણન.

ધર્મધ્યાનની સિદ્ધિ માટે તેની ઉપયોગીતા.

(૨૧૯) આત્મૌપમ્ય - સ્થિરત્વોપાય મૈત્ર્યાદિ

યોગસૂત્ર (ચાલુ) : તાનિદાનીં સ્થિરત્વોપાયાનાહ -

प्रच्छर्दन - विधारणाभ्यां वा प्राणस्य ॥ ३४ ॥

वा शब्दो वक्ष्यमाणोपायान्तरापेक्षो विकल्पार्थः, न मैत्र्यादिभावनाऽपेक्षया तया सह समुच्चयात् ।

આ સૂત્રના સમર્થનમાં ટીકાકારોએ નીચેના ચાર શ્લોકો મૂક્યા છે:

० प्राणा यथाऽऽत्मनोऽभीष्टाः भूतानामपि ते तथा ।
आत्मौपम्येन(भूतानां) सर्वत्र, दयां कुर्वन्ति साधवः ॥ १ ॥
(दयां कुर्वीत मानवः ॥)

० सर्वेऽत्र सन्तु सुखिनः, सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु, मा कश्चिद्दुःखमाप्नुयात् ॥ २ ॥

० रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥ ३ ॥

० प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥ ४ ॥

ॐ

ભાષાંતરકાર લખે છે કે:

મૈત્ર્યાદિભાવનાના અભ્યાસમાં પ્રયાસ કરવામાં આવનારા
ઉપાયો ચિત્તની પ્રસન્નતા કરવા સમર્થ થતાં નથી.
આ મૈત્ર્યાદિ ભાવના અમાનિત્વ, અદંભિત્વ આદિ
જ્ઞાનનાં વીશ સાધનોની ઉપલક્ષક છે.
તે મૈત્ર્યાદિ ભાવનાથી નિર્મળ થએલાં ચિત્તને
સ્થિર - પ્રસન્ન કરવાના જે ઉપાયો છે,
તેમાંના પહેલાં ઉપાયને સૂત્રકાર હવે કહે છે:

'પ્રચ્છર્દન - વિધારણાભ્યાં વા પ્રાણસ્ય ।' ॥ ૩૪ ॥

(૨૨૦) જ્ઞાનનાં વીશ સાધનોનાં નામ

(૧) અમાનિત્વ (૨) અદંભિત્વ (૩) અહિંસા (૪) ક્ષમા
(૫) સરલતા (૬) આચાર્યની સેવા (૭) પવિત્રતા
(૮) સ્થિરતા (૯) ઈંદ્રિયનિગ્રહ (૧૦) નિરહંકારિતા
(૧૧) વિષયવૈરાગ્ય (૧૨) પુત્રાદિમાં તન્મયતાનો અભાવ
(૧૩) જન્મજરાદિનાં દુઃખો અને દોષોને વારંવાર જોવાં
(૧૪) સ્ત્રી - પુત્ર - ગૃહાદિમાં અનાસક્તિ
(૧૫) ઇષ્ટાનિષ્ટની પ્રાપ્તિમાં સમચિત્તતા
(૧૬) પરમાત્મામાં અનન્ય યોગ વડે અવ્યભિચારિણી ભક્તિ
(૧૭) એકાંત સ્થાનનું સેવન (નિરુપાધિક અને પવિત્ર)

(૧૮) વિષયીજનોની સભામાં અપ્રીતિ હોવી

(૧૯) અધ્યાત્મશાસ્ત્રમાં અત્યંત નિષ્ઠા હોવી તથા

(૨૦) આત્મસાક્ષાત્કારનું મોક્ષરૂપી ફળ,

તેને પુનઃ પુનઃ વિચારીને જોવું તે.

(૨૨૧) દેવતાનો પ્રભાવ - પાક્ષિકસૂત્ર વૃત્તિ, પૃ૦ ૭૧

'सव्वं च लक्खणोवेयं समहिट्ठन्ति देवता ।
सुत्तं च लक्खणोवेयं जेण सव्वण्णु भासियं ति ॥१॥'

કલ્પલાભમાંથી શ્રી યશોદેવસૂરિએ 'પક્ખી સૂત્ર'ની ટીકામાં કરેલું અવતરણ, પાક્ષિકસૂત્ર વૃત્તિ, પૃ૦ ૭૨

ननु श्रुतरूपदेवताया उक्तरूप विज्ञापना युक्ता,
श्रुतभक्तेः कर्मक्षयकारणत्वेन सुप्रतीतत्वात्,
श्रुताधिष्ठातृदेवतायास्तु व्यन्तरादि प्रकाराया न युक्ता,
तस्याः परकर्मक्षयेऽसमर्थत्वादिति ।
तन्न, श्रुताधिष्ठातृदेवतागोचर शुभप्रणिधानस्याऽपि
समतुः कर्मक्षयहेतुत्वेनाभिहितत्वात् । यदुक्तं -
'सुयदेवयाए जीए संभरणं कम्मखयकरं भणियं ।
नत्थित्ति अकज्जकारी य एयमासायणा तीए त्ति ॥१॥'
(श्रीमद्वीरगणि शिष्याणु श्री चन्द्रसूरिशिष्य
सूरि श्री यशोदेवप्रणीत - विवरण - समेतम्)

ॐ

(२२२) चित्तस्थिरता એ જ ધર્મ - શુક્લધ્યાન છે.

शुभं धर्मशुक्लध्यानरूपं करत् चेतसः स्थैर्यं तेन, शुभस्थैर्येण चेतसः। विजयेत् आर्तरौद्रं च।

ચિત્તની શુભ સ્થિરતા વડે આર્તરૌદ્રનો વિજય કરે. ધર્મશુક્લધ્યાન રૂપ સ્થિરતા તે શુભ સ્થિરતા છે. આર્તરૌદ્ર રૂપ સ્થિરતા તે અશુભ સ્થિરતા છે.

- યોગશાસ્ત્ર, પ્ર૦ ૪, સંવર ભાવના

(२२३) स्तोतव्य - उपयोग संपदा

- श्री ललितविस्तरा, पृ०७०

इह चाऽऽदौ प्रेक्षापूर्वकारिणां प्रवृत्त्यंगत्वात् अन्यथा तेषां प्रवृत्त्यसिद्धेः प्रेक्षापूर्वकारित्व विरोधात् स्तोतव्यसंपदुपन्यासः, तदुपलब्धावस्या एव प्रधाना - साधारणा साधारणरूपां हेतु सम्पदं प्रति भवति विदुषां जिज्ञासा तदाजनकेते इति तदुपन्यासः, तदवगमेऽप्यस्या एवासाधारणरूपां हेतु सम्पदं प्रति परम्परया मूलशुद्धिरन्वेषणपरा एते इति तदुपन्यासः, तत्परिज्ञानेऽपि तस्या एव सामान्येनोपयोगसंपदं प्रति परम्परया फलप्रधानारंभप्रवृत्तिशीला एते इति तदुपन्यासः,

ॐ

एतद्धेतोऽपि स्तोतव्य सम्पद एव विशेषेणोपयोग संपदं
प्रतीति सामान्यविशेषरूप फलदर्शिन एत इति तदुपन्यासः,
एतत् विज्ञानेऽपि स्तोतव्यसम्पद एव सकारणां स्वरूप
सम्पदं प्रति विशेष निश्चय प्रिया एते इति तदुपन्यासः;
एतत् संवेदनेऽपि आत्मतुल्यपरफल - कर्तृत्व - सम्पदं
प्रतीति अतिगम्भीरोदारा एते इति तदुपन्यासः;
एतत्प्रतीतावपि प्रधानगुणा परिक्षयप्रधानफलाऽप्त्यभय
-संपदं प्रति भवति विदुषां जिज्ञासा दीर्घदर्शिन एत
इति तदुपन्यासः, अनेनैव क्रमेण प्रेक्षापूर्वकारिणां
जिज्ञासा प्रवृत्तिरित्येवं सम्पदामुपन्यासः,
एतावत्सम्पत्समन्विताश्च निःश्रेयस - निबन्धनमेते
एतद्गुणबहुमानसारं विशेषप्रणिधानमिति ततस्तद्बीजा -
क्षेपसौविहित्येन सम्यगनुष्ठानमिति च ज्ञापनार्थं —
एवम् 'अनुप्रेक्षया' न प्रवृत्तिमात्रतया,
अनुप्रेक्षा नाम तत्त्वार्थानुचिन्ता,
इयमत्र ज्ञानावरणीय - कर्मक्षयोपशम -
समुद्भवोऽनुभूतार्थाऽभ्यासभेदः परमसंवेगहेतु
स्तद्दार्ढ्यविधायी उत्तरोत्तर - विशेष - सम्प्रत्ययाकारः
केवलालोकोन्मुखश्चित्तधर्मः;

यथा रत्नशोधकोऽनलः रत्नमभिसम्प्राप्तः रत्नमलं दग्ध्वा शुद्धिमापादयति तथा अनुप्रेक्षाऽनलोऽप्यात्म-रत्नमुपसंप्राप्तः कर्ममलं दग्ध्वा कैवल्यमापादयति, तथा तत्स्वभावत्वादिति ।

(૨૨૪) તીર્થંકર, ગણધર, મુણ્ડકેવલી (જંઘ ઉ૩)

- શ્રી યોગબિન્દુ, શ્લો. ૨૯૪, પૃ. ૫૨

आदिमुक्त्याशयस्थैर्य - विशेषवदिहापरैः ।
इष्यते सदनुष्ठानं, हेतुरत्रैव वस्तुनि ॥ २९४ ॥

टीका - आदिमुक्त्याशयस्याप्तस्यापूर्वश्रद्धा - रूपस्य मनसो यत्स्थैर्यमुद्वेगविषादादिभिर्दोषैरक्षोभ्यत्वं, तस्य विशेषोऽतिशयः तारतम्य लक्षणः सोऽस्याऽस्ति इति आदिमुक्त्याशय स्थैर्य विशेषवत् । xxx इदमुक्तं भवति — 'अत्यन्ताप्तगोचर श्रद्धास्थैर्यवतोऽनुष्ठानात् तीर्थकृत्त्वं, मध्यमश्रद्धा - स्थैर्यवतोऽनुष्ठानाद्गणधरत्वं, जघन्य - श्रद्धासहितान्मुण्डकेवलित्वमवाप्यते इति परे जगुः ।'

(૨૨૫) દ્રવ્ય - ભાવ આવશ્યક - શ્રી અનુયોગદ્વાર સૂત્ર

सिक्खियं ठियं जियं मियं जाव गुरुवायणोवगयं,
वायणाए पुच्छणाए परियट्टणाए धम्मकहाए,
नो अणुप्पेहाए ता दव्वसुयं । - જ્ઞાનમંજરી ટીકા

से किं तं आगमओ दव्वावस्सयं ?
जस्सणं आवस्सए त्ति पदं सिक्खितं ठितं जितं मितं
परिजितं नामसमं घोससमं अहीणक्खरं अणच्चक्खरं
अव्वाइद्धक्खरं अक्खलिअं अमिलिअं अवच्चामेलिअं
पडिपुण्णं पडिपुण्णघोसं कंठोट्ठविप्पमुक्कं गुरुवायणोवगयं,
से णं तत्थ वायणाए पुच्छणाए परियट्टणाए
धम्मकहाए नो अणुप्पेहाए कम्हा ?
अणुवओगो दव्वमिति कट्टु - सू० १४/५, सू० १३

टीका - ननु यथा वाचनादिभिस्तत्र वर्त्तमानोऽपि द्रव्या-
वश्यकं भवति तथाऽनुप्रेक्षयाऽपि तत्र वर्तमानस्तद्भवति?
नेत्याह - नो अणुप्पेहाए त्ति अनुप्रेक्षया
- ग्रन्थार्थानुचिन्तनरूपया,
तत्र वर्तमानो न द्रव्यावश्यकमित्यर्थः,
अनुप्रेक्षाया उपयोगमन्तरेणाऽभावाद्,
उपयुक्तस्य च द्रव्यावश्यकत्वाऽयोगादिति भावः। xxx
'अणुवओगो दव्वमिति कट्टु' त्ति अनुपयोगो द्रव्यमिति कृत्वा,
उपयोजनमुपयोगो - जीवस्य बोधरूपो व्यापारः,
स चेह विवक्षितार्थे चित्तस्य विनिवेशस्वरूपो गृह्यते,
न विद्यतेऽसौ यत्र सोऽनुपयोगः - पदार्थः,

स विवक्षितोपयोगस्य कारणमात्रत्वात् द्रव्यमेव भवति
'इति कृत्वा' अस्मात् कारणात्
अनन्तरोक्तमुपपद्यत इति शेषः । - पृ० १६/७

(२२६) प्राणभूत - जीव - सत्त्वना अर्थो

'सव्व पाण - भूअ - जीअ - सत्ताणं आसायणाए ।' अर्थः
'तत्र प्राणिनो द्वीन्द्रियादयो व्यक्तोच्छ्वास-निःश्वासाः,
अभूवन् भवन्ति भविष्यन्ति चेति भूतानि पृथिव्यादयः,
जीवन्तीति जीवाः आयुःकर्मणो भवयुक्ताः सर्व एवेत्यर्थः,
सत्त्वाः सांसारिक-संसारातीत भेदाः, एकार्थिका वा ध्वनयो
नानादेशजविनेयानुग्रहार्थमुपात्ता इति ।
आशातना तु वितथप्ररूपणादिना एव, तद्यथांगुष्ठमात्रो
द्वीन्द्रियाद्यात्मेति, पृथिव्यादयस्तु जीवा एव स्पन्दनादि
- चैतन्यकार्यानुपलब्धेः, जीवाः क्षणिका इति,
सत्त्वाः संसारिणोऽङ्गुष्ठ पर्व मात्रा एव वा,
संसारातीता न सन्त्येवाऽपि तु प्रध्मातदीपकल्पो
मोक्ष इत्यादि केषांचिन्मतानि ।'
उप्पन्नेइ वा इत्यादि, इह प्रवचने दृष्टिवादे
समस्त - नयवादबीजभूतानि - मातृकापदानि भवन्ति,
तद्यथा उप्पन्नेइ वा विगमेइ वा धुवेइ वा ।

अमूनि वा मातृकापदानि 'अआइई' इत्येवमादीनि,
सकलशब्द - व्यवहारव्यापकत्वान्मातृका पदानि ।

- श्री दशवैकालिक, पृ० ९

- सामाचारी शतक, कर्ता : समयसुंदरगणि, पृ० १८८

श्लाघ्यश्च जिनप्रवचनस्थः स्वल्पगुणोऽपि,
सम्यग्दृष्टिप्रशंसायाः कार्यैककारणत्वात् । उक्तं च -
'गुणपगरिसबहुमाणो, कम्मक्खयेककारणं जेण त्ति' ।
नैवं चेत्तदा उत्तरोत्तर - संयमस्थानवर्तिभिः साधुभिः
जघन्यजघन्यतरादि - संयमस्थानवर्तिनः साधवोऽप्य-
नुपबृंहणीयाः स्युः, तैश्च नियमादिषु दृढाः श्रावकाः ।
न च एतदागमे दृष्टं इष्टं वा, यत् गुणिनां गुणा
न प्रशस्या दर्शनमालिन्याद्यवाप्तेः । आह च -
'नो खलु अप्परिवडिए निच्छयओऽमइलि एव सम्मते ।
होइ तओ पडिवाओ जत्तो अणुववूहणाइय त्ति ॥ १ ॥'
देशविरतानां वा अविरतानां वाऽविरतसम्यग्दृष्टयः
श्राद्धाः सत्काराद्यर्हा नस्युः, तथा च सति -
'तम्हा सव्वपयत्तेणं, जो नमुक्कार धारओ ।
सावओ सोऽविदिट्ठव्वो, जहा परम बांधवो ॥ १ ॥'
इत्यादि अपार्थकं स्यात्,

एवं च सकलागमव्यवहारलोपात्
विमर्शनीयं इदं सूक्ष्मधिया इति ।
xxx चतुर्थी स्तुतिः पुनर्वैयावृत्यकराणां - यक्षाम्बा -
प्रभृतीनां सम्यग्दृष्टिदेवतानां, किमर्थमित्याह - उपयोगार्थं
स्वकृत्येषु तेषां सावधानता निमित्तं भवति
च गुणोपबृंहणात् तत्सद्भावबुद्धिः ।
ततश्च स्वकार्यकारित्वोपयुक्तत्वाज्जगत् प्रसिद्धं एतद्
यत् प्रशंसातः सोत्साहं सर्वकार्यकरणादर इति ।
xxx कायोत्सर्ग - विषयेऽपि बहु विमर्शनीयं यतो
दैवसिकावश्यक - मध्ये केवलश्रुत देवतादेः, पाक्षिकादौ तु
भवनदेव्याः, दीक्षादौ तु शासनदेव्यादीनामपि । पृ०१८९

(૨૨૭) જીવમાં સાત નયનો સમાવતાર

હવે જીવમાં સાત નય કરે છે:

પ્રથમ નૈગમનયને મતે —

'જે ગુણ અને પર્યાયવંત શરીર સહિત, તે જીવ.'
એટલે શરીરમાં જે બીજા પુદ્ગલ તથા ધર્માસ્તિકાયાદિક
દ્રવ્ય છે, તે સર્વ જીવમાં જ ગણ્યા; તે વારે સંગ્રહનય બોલ્યો:
'જે અસંખ્યાતપ્રદેશ, તે જીવ' એટલે એક
આકાશના પ્રદેશ ટળ્યા, બીજા સર્વ દ્રવ્ય એમાં ગણાણા.

તે વારે વ્યવહારનય બોલ્યો:
'જે વિષય લઈ કામ વાત સંભારે, તે જીવ.'
ઈહાં ધર્માસ્તિકાય, અધર્માસ્તિકાય, આકાશ નથી લીધા
પુદ્ગલ સર્વ રહ્યા પણ પાંચે ઈન્દ્રિય નથી મન અને
લેશ્યા એ પુદ્ગલ છે, તે જીવમાં ગણ્યાહતા, કારણકે
વિષયાદિક તો ઈન્દ્રિયો લે છે, તે જીવથી ન્યારા છે,
પરન્તુ ઈહાં વ્યવહારનય મતે જીવ ભેળાં લીધા છે.
તે વારે ઋજુસૂત્રનય બોલ્યો: 'જે ઉપયોગવંત, તે જીવ'.
ઈહાં ઈન્દ્રિયાદિક સર્વ રહ્યાં, કિન્તુ
અજ્ઞાન તથા જ્ઞાનના ભેદ રહ્યા નહિ. હવે શબ્દનય
બોલ્યો: 'જે નામજીવ, સ્થાપનાજીવ, દ્રવ્યજીવ અને
ભાવજીવ, ઈહાં જીવમાં ગુણ-નિર્ગુણનો ભેદ ન પડ્યો.'
તે વારે સમભિરૂઢનય બોલ્યો: 'જે જ્ઞાનાદિગુણવંત, તે જીવ.'
તે વારે મતિજ્ઞાન - શ્રુતજ્ઞાન ઈત્યાદિક
સાધક અવસ્થાના ગુણ તે સર્વ જીવસ્વરૂપમાં આવ્યા.
હવે એવંભૂતનય બોલ્યો: 'જે અનંતજ્ઞાન,
અનંતદર્શન, અનંતચારિત્ર, શુદ્ધ સત્તાવંત, તે જીવ.'
એ નયે જે સિદ્ધ અવસ્થામાં ગુણ હતાં, તે જ ગ્રહ્યા.
એ સાત નયે જીવદ્રવ્ય કહ્યો.

(૨૨૮) હવે સાત નયે ધર્મ કહે છેઃ નૈગમનય બોલ્યોઃ
'જે સર્વ ધર્મ છે, કેમકે સર્વ પ્રાણી ધર્મને ચાહે છે.
એ નયસ્વરૂપ ધર્મ - નામધર્મને કહે છે.'
હવે સંગ્રહનય બોલ્યોઃ 'જે વડેરાએ આદર્યો, તે ધર્મ.'
એણે અનાચાર છોડ્યો પણ કુળાચારને ધર્મ કહ્યો.
વ્યવહારનય બોલ્યોઃ 'જે સુખનું કારણ, તે ધર્મ.' એણે
પુણ્યકરણીને ધર્મ કરી માન્યા. ઋજુસૂત્રનય મતેઃ 'જે
ઉપયોગસહિત વૈરાગ્યરૂપ પરિણામ, તે ધર્મ કહીએ.'
એ નયમાં યથાપ્રવૃત્તિકરણના પરિણામ પ્રમુખ સર્વ ધર્મમાં
ગણ્યા, તે મિથ્યાત્વીને પણ હોય. હવે શબ્દનય બોલ્યોઃ
'જે ધર્મનું મૂળ સમકિત છે, માટે સમકિત તે જ ધર્મ.'
તે વારે સમભિરૂઢનય બોલ્યોઃ 'જે જીવ, અજીવ, નવતત્ત્વ
તથા છ દ્રવ્યને ઓળખીને જીવસત્તા ધ્યાવે, અજીવનો
ત્યાગ કરે, એટલે જ્ઞાન - દર્શન - ચારિત્રનો શુદ્ધ
નિશ્ચયપરિણામ, તે ધર્મ.' એ નયે સાધકસિદ્ધ પરિણામ
તે ધર્મપણે લીધા. એવંભૂતનય બોલ્યોઃ 'જે શુક્લધ્યાન
રૂપાતીતપરિણામ ક્ષપકશ્રેણિ કર્મક્ષયના કારણ તે સાધન
ધર્મ, જે જીવનો મૂળ સ્વભાવ તે વસ્તુધર્મ, જે મોક્ષરૂપ
કાર્ય નીપજે સિદ્ધમાં રહે, તે ધર્મ.' એ સાત નયે ધર્મ કહ્યો.

ૐ

(૨૨૭) **સિદ્ધમાં સાત નયો**

હવે સાત નયે સિદ્ધપણું કહે છે.

નૈગમનયને મતે: 'સર્વ જીવ સિદ્ધ છે, કેમકે સર્વ જીવના આઠ રૂચકપ્રદેશ સિદ્ધ સમાન નિર્મળ છે માટે.'

સંગ્રહનય કહે: 'જે સર્વ જીવની સત્તા સિદ્ધ સમાન છે. એણે પર્યાયાર્થિકનયે કરી કર્મ સહિત અવસ્થાને ટાળીને દ્રવ્યાર્થિકનયે કરી અવસ્થા અંગીકાર કરી.'

તે વારે વ્યવહારનય બોલ્યો: 'જે વિદ્યા - લબ્ધિપ્રમુખ ગુણે કરી સિદ્ધ થયો, તે સિદ્ધ.' એ નયે બાહ્ય તપપ્રમુખ અંગીકાર કર્યાં.

હવે ઋજુસૂત્રનય બોલ્યો: 'જેણે પોતાના આત્માની સિદ્ધપણાંની સત્તા ઓળખી અને ધ્યાનનો ઉપયોગ પણ તે જ વર્તે છે, તે સમયે તે જીવ સિદ્ધ જાણવો. એ નયે સમકીતિ જીવ સિદ્ધ સમાન છે' એમ કહ્યું.

હવે શબ્દનય બોલ્યો: 'જે શુદ્ધ શુક્લધ્યાન પરિણામ નામાદિક નિક્ષેપે, તે સિદ્ધ.' તે વારે સમભિરૂઢનય બોલ્યો: 'જે કેવળજ્ઞાન, કેવળદર્શન, યથાખ્યાતચારિત્ર એ ગુણે સહિત, તે સિદ્ધ જાણવા.'

એ નયે તેરમા-ચૌદમા ગુણઠાણાના કેવળીને સિદ્ધ કહ્યા.
એવંભૂતનય કહે છે કે: જેના સકળ કર્મ ક્ષય થયાં, લોકને અંતે બિરાજમાન અષ્ટગુણસંપન્ન તે સિદ્ધ જાણવા. એ રીતે સિદ્ધપદે ૭ નય કહ્યા. એમ ૭ નય મિલ્યા.

સમકીતિ છે અને જે એક નયને ગ્રહણ કરે,
તે મિથ્યાત્વી છે.

એ સાતે નય સિદ્ધ તે વચન પ્રમાણ છે અને એ સાત નયમાં કોઈપણ નયને ઉત્થાપે, તેનું વચન અપ્રમાણ છે.
(શ્રીમદ્ દેવચંદ્ર, ભાગ ૨, પૃ૦ ૪૨-૪૩-૪૪) (આગમસાર)

(૨૩૦) શ્રુતદેવતાનો પ્રભાવ

- શ્રી યશોદેવસૂરિ કૃત શ્રી પાક્ષિકસૂત્ર વૃત્તિ, પૃ૦ ૫૨

'श्रुतदेवताया आशातना,
न विद्यते श्रुतदेवता अकिंचित्करी वा,
अत्रोत्तरं - अस्त्येव श्रुतदेवता यतो नाऽनधिष्ठितो मौनीन्द्रः खल्वागमो, न चाऽकिंचित्करी तामालम्ब्य
प्रशस्त मनसः सत्त्वस्य कर्मक्षयदर्शनात् ।'

पृ० ९१: सुयदेवया भगवई नाणावरणीय कम्मसंघायं ।
तेसिं खवेउ सययं, जेसिं सुयसायरे भत्ती ।
श्रुतमर्हत्प्रवचनं, श्रुताधिष्ठात्री देवता श्रुतदेवता,

संभवति च श्रुताधिष्ठात्र्देवता, यदुक्तं कल्पभाष्ये –
सव्वं च लक्खणोवेयं, समहिट्ठन्ति देवता ।
सुत्तं च लक्खणोवेयं, जेण सव्वण्णुभासियं ।
ति भगवती पूज्या, ज्ञानावरणीय कर्मसंघातं
ज्ञानाशातनाया कृतं (ज्ञानघ्नं) कर्मनिवहं,
तेषां प्राणिनां क्षपयतु क्षयं नयतु सततमनवरतं,
येषां किमित्याह – श्रुतमेवाऽति गम्भीरतया अतिशयिरत्न
– प्रचुरतया च सागरः समुद्रः श्रुतसागरः तस्मिन्
भक्तिर्बहुमानो विनयश्च समस्तीति गम्यते,
ननु श्रुतरूपदेवताया उक्त रूपविज्ञापना युक्ता,
श्रुतभक्तेः कर्मक्षयकारणत्वेन सुप्रतीतत्वात् ।
श्रुताधिष्ठात्र्देवतागोचर शुभ प्रणिधानस्याऽपि समर्थः
कर्मक्षयहेतुत्वेनाऽभिहितत्वात्, यदुक्त –
'सुय देवयाए जीए संभरणं कम्मक्खयकरं भणियं ।
नत्थित्ति अकज्जाकरीव एवमासायणा तीएत्ति ॥ १ ॥'
(२३१) पातञ्जलयोग दर्शन, ३ - २३ ॥
'मैत्र्यादिषु बलानि । ३ - २३ ॥'
भाष्य : मैत्रीकरुणामुदिते तिस्रोभावनास्तत्र
भूतेषु सुखितेषु मैत्रीं भावयित्वा मैत्रीबलं लभते ।

दुःखितेषु करुणां भावयित्वा करुणाबलं लभते।
पुण्यशीलेषु मुदितां भावयित्वा मुदिताबलं लभते।
भावनातः समाधिर्यः स संयमस्ततो बलान्यवन्ध्य
वीर्याणि जायन्ते। पापशीलेषूपेक्षा न तु भावना।
ततश्च तस्यां नाऽस्ति समाधिरित्यतस्तत्र संयमाऽभावात्।

वाचस्पति टीका

मैत्र्यादिषु संयमान्मैत्र्यादि बलान्यस्य भवन्ति।
तत्र मैत्रीभावनातो बलं येन जीवलोकं
सुखाकरोति - ततः सर्व हितो (हितकारको) भवति।
एवं करुणाबलात् जीवलोकस्य माद्यस्थ्यमाधित्ते।
वक्ष्यमाणौपयिकं भावनाकारणत्वं समाधेराह -
भावनातः समाधिर्यः स संयमः।
यद्यपि धारणा ध्यान समाधित्रयमेव संयमो न समाधिमात्रं
तथापि समाधेरनन्तरं कार्योत्पादात्समाधेः
प्राधान्यात्तत्र संयम उपचरितः। क्वचिद् भावना
समाधिरिति पाठः। तत्र भावनासमाधि समूहस्य
संयमस्यावयवौ हेतू भवतः। वीर्यं प्रयत्नः, तेन
मैत्र्यादिबलवतः पुंसः सुखितादिषु परेषां कर्तव्येषु
प्रयत्नोऽवन्ध्यो भवति। उपेक्षौदासीन्यं, न तत्र भावना,
नाऽपि सुखादिवद्भाव्यं किंचिदस्तीति ॥२३॥

(२३२) क्षामणायां मैत्र्यादि

इत्थमभिवन्द्य साधून् पुनरप्यत:
सकलसत्त्वक्षामणा मैत्री प्रदर्शनायाह —
खामेमि सव्व जीवे —
निगदसिद्धा चेयं, सव्वे जीवा खमंतु मेत्ति, मा तेषामपि
- क्षान्ति प्रत्यय: कर्मबन्धो भवत्विति करुणयेदमाह ।
- हारिभद्रीय टीका, पृ० १६३, धर्मसंग्रह, पृ० २२४

साम्प्रतमनादि संसारसागरावर्त्तान्तर्गतानां
सत्त्वानामन्योऽन्यं वैर सम्भवात् तत्क्षमणायाह -
खामेमि सव्व जीवे —
क्षमयामि सर्वजीवान् अनन्त भवेष्वज्ञानमोहावृतेन
मे तेषां कृता पीडा तदोरपगमान्मर्षयामि,
सर्वे जीवा: क्षाम्यन्तु मे दुश्चेष्टितं, अत्र हेतुमाह -
'मैत्री मे सर्वभूतेषु', 'वैरं मम न केनचित्'
कोऽर्थ: ? मोक्षलाभहेतुभिस्तान् सर्वान्
स्वशक्त्या मोक्षं लम्भयामि,
न च केषां चिद्विघ्नकृतामपि विघाते वर्तेऽहमिति ।
वैरं हि भूरिभवपरम्पराऽनुयायि
कमठ - मरुभूत्यादीनामिवेति ||४९||

(२३३) श्रावकनी निद्रा

प्र० २२६ : 'गत्वा गृहेऽथ कालेऽर्हद्गुरुस्मृति पुरःसरम् ।
अल्पनिद्रोपासनं च, प्रायेणाऽब्रह्मवर्जनम् ॥ ६७॥

कथं निद्रां कुर्यादित्याह - अर्हन्तस्तीर्थंकरा, गुरवोधर्माचार्यास्तेषां स्मृतिः - नमस्कारोपणं पूर्वं देस्यतत्तथा, उपलक्षणं चैतत् चतुःशरणगमन, दुष्कृतगर्हा, सुकृतानुमोदना, सर्वजीवक्षमणा, प्रत्याख्यानकरणाष्टादशपापस्थानवर्जन, पञ्चनमस्कारस्मरण प्रभृतीनां, नह्येतद्विना श्रावकस्य शयनं युक्तं ——

तत्र देव स्मृतिः नमो वीतरागाणं-------

(२३४) संसारभ्रमणना हेतु - गा० २, सटीक
- श्री उपदेशमाला, गा० ३०५

'हीला निरोवयारित्तणं निरवणाणया अविणओ अ ।
परगुणपच्छायणया जीवं पाडंति संसारे ॥ ३०५ ॥'

व्याख्या: हीला - निरुपकारित्वं - निरवनामता - अविनयश्च - परगुण प्रच्छादनता,
एतान्येपि मानध्वनिनाऽभिधीयन्ते पूर्वोक्तयुक्तेः,
एतानि च क्रियमाणानि जीवं पातयंति संसारे इति
(श्री सिद्धर्षि टीका)

'माणो मयऽहंकारो परपरिवाओ य अत्त ओक्करिसो ।
परपरिभवो वि य तहा परस्स निंदा असूया य ॥३०४॥'

व्याख्या : मानोमदोऽहंकारः परपरिवादश्चात्मोत्कर्षः
परपरिभवोऽपि च तथा परस्य निन्दा असूया च ॥

(२२५) भावग्राम : भावग्रामस्तु नोआगमतः 'ज्ञानादित्रिकं'
ज्ञानादिज्ञान - दर्शन - चारित्र समवायरूपम्,
यतो वा तेषां ज्ञानादीनामुत्पत्तिर्भवति
ते भावग्रामतया ज्ञातव्याः ॥ १११३ ॥

के पुनस्ते ? उच्यते — 'तित्थयरा जिण चउदस,
दस भिन्ने संविग्ग तह असंविग्गे ।
सारूविय वय दंसण, पडिमाओ भावगामो उ ॥१११४॥'
××× एष सर्वोऽपि भावग्रामः,
एतेषां दर्शनादिना ज्ञानादिप्रसूतिसद्भावात् ।
अत्र परः प्राह — ननु उक्तं तीर्थकरादीनां
ज्ञानादिरत्नत्रय - सम्पत्समन्वितानां भावग्रामत्वम्,
ये पुनरसंविग्नादयस्तेषां कथमिव भावग्रामत्वमुपपद्यते ?
नैषदोषः, तेषामपि यथावस्थित प्ररूपणाकारिणां पार्श्वतो
यथोक्तं धर्माकर्ण्य सम्यग्दर्शनादि लाभ उदयते,
अतस्तेषामपि भावग्रामत्वमुपपद्यत
एवेति कृतं प्रसंगेन ॥१११४॥

ॐ

(२३६) ક્ષમાપના રહસ્ય

- બૃહત્કલ્પ સૂત્ર, ભાગ ૨, પૃ. ૨૪૧

आवश्यक चूर्णि, प्रतिक्रमणाध्ययनं, पृ. २४५

'खामेमि सव्व जीवे - मेत्तीभावमस्सियं उपशम इत्यर्थः ।'

અર્થદીપિકા, પૃ. ૪૨૩, રત્નશેખરસૂરિ વિરચિત

खामेमि सव्व जीवे सव्वे जीवा खमंतु मे ।
मित्ती मे सव्व भूएसु वेरं मज्झ न केणइ ॥४१॥

અનંત ભવોમાં, અજ્ઞાન અને મોહથી મેં
જે જે જીવોને ત્રાસ આપેલ છે, તે સર્વને હું ખમાવું છું.
સર્વ જીવો મને માફી આપશો.

પોતે અન્યને ખમાવે તે બરોબર છે,
પરંતુ અન્ય સર્વ જીવો પ્રતિ ખમાવવાનું જે કરે છે,
તેમાં મુખ્ય હેતુ એ છે કે:
'મારા તરફના વેર-વિરોધ નિમિત્તે તેઓને કર્મનો બંધ
ન થાઓ' એમ કારુણ્યભાવના જાહેર કરવાની છે,
કારણ કે મને સર્વ પ્રાણીઓમાં મૈત્રીભાવ છે.
કોઈની સાથે મારે વેર-વિરોધ નથી.

આ પ્રસંગે બોલવામાં આશય એ છે કે: હું પોતે તો
વેરવિરોધનો ત્યાગ કરીને મુક્તિસુખ પ્રાપ્ત કરું, પરન્તુ

અન્ય સર્વ જીવોને પણ મોક્ષસાધક રત્નત્રયીમાં જોડી મોક્ષનો લાભ અપાવું. મારા મોક્ષમાર્ગમાં કોઈ વિઘાત કરે, તો પણ હું તેને વિઘાત ન કરું, કોઈ નિંદા કરે, તો પણ હું દ્વેષ નહિ કરું. આ ઉત્તમ આત્માઓને આવા સદ્વિચારો આવે છે, તેમાં તત્ત્વોનું જાણપણું તે જ કારણ છે.

- શ્રાદ્ધ પ્રતિક્રમણસૂત્ર, પૃ૦ ૪૨૪

(૨૨૭) સામાયિકમાં નય તથા ગુણઠાણા

ચતુર નર! સામાયિક નય ધારો...
લોકપ્રવાહ છાંડકર અપની પરિણતિ શુદ્ધ વિચારો. ચતુર-૧
દ્રવ્યત અક્ષય અભંગ આતમા,
સામાયિક નિજ જાતિં શુદ્ધ રૂપ સમતામય કહીએ,
સંગ્રહ નયકી ખ્યાતિં. ...ચતુર-૨
અબ વ્યવહાર કહે હું સબ જન સામાયિક હુઈ જાસી,
તાતેં આચરણા સો માને ઐસા નૈગમ ગાસે. ...ચતુર-૩
આચરણા ઋજુસૂત્ર શિથિલ કી બિનુ ઉપયોગ ન માને
આચારી ઉપયોગી આતમ સો સામાયિક જાને. ...ચતુર-૪
શબ્દ કહે સંજત જો ઐસો, સો સામાયિક કહિયે,
ચોથે ગુણઠાણે આચરણા ઉપયોગો ભિન્ન લહિયે. ચતુરનર-૫
અપ્રમત્ત ગુણઠાણે ઈર્ચા કી સમભિરૂઢ નય સાખી
કેવલજ્ઞાન દશાસ્થિતિ ઉન કી એવંભૂતે ભાખી....ચતુર-૬

ॐ

સાધારણ નર જે ન કુ જાને, લોક કહે સો માને,
જ્ઞાનવંત કી સંગતિ નાહી, રહિયો પ્રથમ ગુણઠાણે. ચતુર-૭
સાધારણ નર અંતર - દૃષ્ટે, જે દિન દિન અભ્યાસે
જગ જસ વાદ લહે સો જૈસો, જ્ઞાનવંત કે પાસે. ...ચતુર-૮

- પૂ. ઉપા. શ્રી યશોવિજયજી મ.
-યશો. ગૂર્જર સા. સંગ્રહ, પૃ. ૨૬૮/૯

(૨૩૮) ચત્તારિ મંગલ

आवश्यक चूर्णि - प्रतिक्रमणाध्ययनम् - पृ. ६८

चत्तारि मंगलं - दंसणविसुद्धिनिमित्तं च तिन्नि सुत्ताणि,
साहुग्रहणेन आयरिया उवज्झाया य भणिता,
धम्मग्रहणेण सुत्तधम्मो य गहितो,
मं पापेसु अरहंतादयो गालयंतीति पिंडार्थोऽयं सूत्रस्य।
जतो एते संसारनित्थरण कज्जे मंगलं भवंति
तत एव लोगुत्तमत्ति। अरहंता लोगुत्तमा०।
तत्थ अरिहंता ताव भावलोगस्स उत्तमा, कहं उत्तमा?
पसत्थाणं वेदणिज्जाउयनामगोत्ताणं अणुभावं
पडुच्च उदइयभावस्स उत्तमा, एतेणेव विसेसिज्जति -
उत्तरपगडीहिं सातं मणुस्साउयं तासिं दोण्हं,
इमासिं च नामस्स एकत्तीसाए पसत्थुत्तरपगडीणं,

तं जहा - मणुस्सगति पंचिंदिय जाति,
ओरालियतेयगं बंधणं, समचतुरस्ससंठाणं, ओरालियंगोवंगं,
वइरोसभणारायसंघयणं, वण्णरसगंध फासा, अगुरुलघुं,
उवघातं, पराघातं, उस्सासं, पसत्थविहगगती, तसं, बादरं,
पज्जत्तयं, पत्तेयं, थिराथिराणि, सुभासुभाणि, सुभगं,
सूसरं, आदेज्जं, जसकित्ती, निम्माणगं, तित्थगरमिति,
एगत्तीसं पसत्थाणं, वेदणिज्जं, मणुस्साऊ, उच्चागोयं वा,
एतेसिं चोत्तीसाए उदइयभावे हिं उत्तमा,
पधाणत्ति भणितं होति ।
उवसमियभावो अरहंताणं णत्थि,
खाइय भावस्स पुण णाणावरण दंसणा -
वरणमोहंतराइयाण णिरवसेसक्खयं पडुच्च
खइय भावलोगस्स उत्तमा सरण्णा वा,
ते पुण अरिहंताणं पुव्ववण्णितस्स ओदइयभावस्स
य समायोगे सण्णिवादभावो निप्फज्जति,
तेण उत्तमा लोगुत्तमा ।
सिद्ध खेत्त लोगस्स निरवसेसाणं च कम्मपगडीणं
जो खाइय भाव लोगो तस्स उत्तमा,
खीणं सव्वं कम्मत्ति भणितं होति ।

ॐ

साहू णाणदंसणचरित्ताणि पडुच्च भावलोगुत्तमा। धम्मो दुविधो - सुतधम्मो चरित्तधम्मो य, एते दोण्णि वि खाइयं खाओवसमियं च भावलोगं पडुच्च उत्तमा।

जतो य उत्तमा तत एव सरणं

पवज्जितव्वत्ति - चत्तारि सरणं पवज्जामि। संसारभयभीतो मोक्खसुहत्थी अरहंतादीणं भत्तिमंतो होमित्ति भणितं होति, एवं तिहिं सुत्तेहिं मंगलं दंसणसुद्धिं च काउं पडिक्कमणसुत्तं भणाति — (पृ० ६१)

- आवश्यक चूर्णि, पृ० ४३१

(२३१) सामायिक

आय, आयादिति आयो लाभस्सलाभमित्यर्थ,

किमुक्तं ?

लब्भा जे सामाइओ तेसिं लाभं पडुच्च,

समस्स परपीडापरिवज्जणा

आयो तंमि जम्मे अत्थि सो सामाइकं भण्णातित्ति १

समस्स वा रागदोसमज्झत्थस्स रागदोसपरिवज्जणा

आयो तंमि अत्थित्ति सो सामाइकं भण्णति २

समस्स वा णाणादि - तिगस्स

आयो तम्मि अत्थित्ति सो सामाइकं भण्णति ३

यावत् तं पुण सावज्जजोगपरिण्णालक्खणं पच्चक्खाणं
'आवाए सव्वदव्वाणं' आवातो - विसयो प्राप्तिः
गोचरा एगट्ठा, कहं ? जेण संमत्तं सव्वदव्वेसुवि,
जदि एगंमवि ण सद्दहति तो मिच्छत्तं,
सुत्तचरित्ताइं सव्वदव्वेसु, नो सव्वपज्जवेसु सुत्तं,
जदि सव्व पज्जवेसु तो सव्वण्णू होज्जा,
चरित्ते पुण एवं सव्वदव्वेसु,
न सव्वपज्जवेसु, जेण ——

(२४०) धर्मनी व्याख्या

'दुर्गतिप्रसृतान् जीवान् यस्माद्धारयते ततः ।
धत्ते चैतान् शुभे स्थाने, तस्माद् धर्म इति स्मृतः ॥ १॥'
मंग्यते हितमनेनेति मंगलमित्यादि पूर्ववत्, उत्कृष्टं प्रधानं, न हिंसा अहिंसा प्राणातिपातविरतिरित्यर्थः, संयमः आस्रवद्वारो परमः, तापयत्यनेकभवोपात्तमष्ट प्रकारं कर्मेति तपः - अनशनादि । x श्रुतं द्वादशांगं तस्य धर्मः श्रुतधर्मः, स हि वाचनादिभेदाद्भिन्न इति,
आह च - श्रुतधर्मः स्वाध्यायः - वाचनादि रूपः,
तत्त्वचिन्तायां धर्महेतुत्वाद्धर्मः इति ।
x चरत्यनिन्दितमनेनेति चरित्रं क्रियोपशमरूपं तस्य भावश्चारित्रम्, अशेष कर्मक्षयाय चेष्टेत्यर्थः ।

ॐ

तत्श्चारित्रमेव धर्मः चारित्र धर्मः ।
x उत्कृष्टं प्रधानं मंगलं, एकान्तिकत्वादात्यन्तिकत्वाच्च,
न पूर्णकलशादि,
तस्य नैकान्तिकत्वादनात्यन्तिकत्वाच्च । x
अप्रमत्ततया शुभयोगपूर्वकं
प्राणाऽव्यपरोपणमित्यर्थः भवत्यहिंसेति ।
(द्रव्य-भावथी हिंसा (१) पारधीने, द्रव्यथी पण भावथी नहि
(२) ईर्यायुक्त अप्रमत्त मुनिने, भावथी पण द्रव्यथी नहि
(३) सर्पबुद्धिए रज्जुनी थती हिंसा, चोथो भांगो शून्य.)
अजीवातिपातः, तथा च तद्वृतः स्वकर्मातिपातोभवत्येव,
अजीवश्च कर्मेति भावनीयमिति । - दश० पृ०२५
आह - अहिंसैव तत्त्वतः संयम इति कृत्वा
तद्भेदेनास्याभिधानमयुक्तम् । न, संयमस्याहिंसाया एव
उपग्रहकारित्वात्, संयमिन एव भावतः खल्वहिंसक
-त्वात् । x तत्र श्रोत्रादिभिरिन्द्रियैः शब्दादिषु सुन्दरेतरेषु
रागद्वेषाऽकरणमिन्द्रियसंलीनतेति । कषायसंलीनता
- सा च तदुदयनिरोधोदीर्ण - विफलीकरण - लक्षणेति ।
योगसंलीनता सा पुनर्मनोयोगादीनामकुशलानां
निरोधः कुशलानामुदीरणमित्येवंभूतेति ।
दशवै० टीका, पृ०२८

## (૨૪૧) મૈત્ર્યાદિ ભાવો

– પાતંજલ યોગદર્શન પાદ ૪, સૂ૰ ૧૦, વ્યાસ ભાષ્ય

वृत्तिरेवाऽस्य विभुनश्चित्तस्य संकोचविकासिनीत्याचार्यः। तच्च धर्मादिनिमित्तापेक्षम्। निमित्तं च द्विविधं बाह्यमाध्यात्मिकं च। शरीरादि (इन्द्रियधनादि) साधनापेक्षं बाह्यं, स्तुतिदानाभिवादनादि चित्तमात्राधीनं श्रद्धा (वीर्यस्मृत्यादि) आध्यात्मिकं। तथा चोक्तम् – मैत्र्यादयो ध्यायिनां विहाराः (व्यापाराः) ते बाह्यसाधननिरनुग्रहात्मानः प्रकृष्टं (शुक्लं) धर्ममभिनिर्वर्तयन्ति। तयोर्मानसं बलीयः। कथं, ज्ञानवैराग्ये केनातिशय्येते, दण्डकारण्यं च चित्तबलव्यतिरेकेण शारीरेण कर्मणा शून्यं कः कर्तुमुत्सहेत? समुद्रमगस्त्यवद्वा पिबेत्? (१०)

(યોગદર્શન મુજબ મૈત્ર્યાદિ ભાવો વિના ચિત્તની નિર્મળતા, પ્રસન્નતા સંભવત નથી. આ પ્રસન્નતા વિના ગમે તેટલી શક્તિઓ પ્રાપ્ત થાય, તે આધ્યાત્મિક દૃષ્ટિએ લાભ કરી શકતી નથી. ચિત્તવૃત્તિઓનો વિસ્તાર કે ઉર્ધ્વીકરણ મૈત્ર્યાદિ ભાવનાઓ સિવાય કોઈપણ ધર્મથી થઈ શકે નહિ. એ માટે આ ભાવનાઓને જૈનદર્શનમાં શુક્લધ્યાનમાં જોડાવા માટે રસાયણ રૂપે કહી છે.)

ૐ

(૨૪૨) નમસ્કારનાં પ્રયોજન - ફળ

આહ - કિં પઓઅણં ણમોક્કારં કીરતિ ?

પઓઅણ ણામ પ્રયુજ્યતે યેન તત્પ્રયોજનં,

અનન્તરકાર્યમિત્યર્થઃ ।

ઉચ્યતે - ણાણાવરણાદિ કમ્મવક્ખય નિમિત્તં,

એક્કેકાક્ખરોચ્ચારણે અનંતપુદ્ગલરસ ફડ્ડકઘાત સદ્ભાવાત્,

મંગલં ચ હોહિતિ મહારિસીણં પણામેણંતિ,

એસ એવ અમ્હં સવ્વ સત્થાણં પુવ્વિં ઉચ્ચારિજ્જતિ,

જહા મરુયાણં ઓંકારો જહા લોગે તહા લોઉત્તરેવિત્તિ ।

ઇદાણિં ફલેત્તિદારં - 'ફલ નિષ્પત્તૌ'

કિં નિષ્પાદયતિ એષા નમસ્કૃતિઃ ?

ઉચ્યતે, ઇહલોઇયં પરલોઇયં ચ ફલં,

ઇહ લોઇયં તાવ અત્થાવહો કામાવહે આરોગ્ગાવહો હોતિ,

અથ કામારોગ્યાઃ કિં નિષ્પાદયન્તિ ?

ઉચ્યતે - અભિરતિઃ,

પરલોઇઓ સિદ્ધિગમણં વા,

દેવલોગગમણં વા,

સોભણે વા કુલે આયાતિ, પુણ બોહિલાભો

વા એવમાદિ — ઇહ લોગંમિ તિદંડી. ॥ ૧૦૨૪ ॥

(૨૪૩) સામાયિકમાં નવકાર

'કૃત પંચનમોક્કારો કરેતિ સામાઇયંતિ સોઽભિહિતો ।
સામાઇયંગમેવ ય જં સો સેસં તઓ વુચ્છં ॥ ૧૦૨૬ ॥'

કરેમિ ભંતે ! સામાઇયમિત્યાદિ........

કરોમિ અભ્યુપગચ્છામિ ઇતિ અર્થઃ, ભંતેત્તિ ભદંત
ભદાન્ત ભવાન્ત ઇતિ ગુરુરામંત્રણં, હે ભદંત ઇત્યાદિ,
સામાયિકમિતિ ણાણદંસણચરણાણિ ભાવસમં તસ્સ
આયઃ સમાય ઇત્યે તસ્ય ઇકણ્ પ્રત્યયે તસ્ય નૈરુક્ત-
વિધાનેન સામાયિકમિતિ ભવતિ, તત્કિમુક્તં ? હે ગુરો !
જ્ઞાનદર્શનચારિત્રલાભં અભ્યુપગચ્છામિ,
અનેન મોક્ષસાધન - જ્ઞાનદર્શનચારિત્રલાભ -
વિષયં પ્રવૃત્ત્યભ્યુપગમં દર્શયતિ । પૃ૦૫૬૨
સર્વ શબ્દોઽત્રાપરિશેષવાચી,
સાવજ્જમિતિ અવદ્યંગર્હિતં મિચ્છત્તં અણ્ણાણં અવિરતી,
સહ અવદ્યેન સાવદ્યસ્તં, કોઽસૌ ?
યોગઃ વ્યાપારઃ ઇત્યર્થઃ તં, કિમિતિ પચ્ચક્ખાણં કરોમિ,
પ્રતીપમાખ્યાનં પ્રત્યાખ્યાનં, જ્ઞપરિજ્ઞયા પરિજ્ઞાનં
પ્રત્યાખ્યાન - પરિજ્ઞયા પરિહરણમિત્યર્થઃ । તત્કિમુક્તં ?
અપરિશેષં મિથ્યાત્વાજ્ઞાનાવિરતિ - સહચરિતં વ્યાપારં,
જ્ઞાત્વા નિવર્તયામીતિ ।

अनेन तु संसारकारण - मिथ्यात्वाज्ञानाविरति -
सहगतव्यापार - विषयं निवृत्त्युपगमं दर्शयति ।
x 'निंदा आत्मसंतापे' 'गर्हा प्रकाशने'
आत्मसाक्षिकी निंदा, परसाक्षिकी गर्हा - x
अपराधपद - विशुद्ध्यर्थं चात्मानं वोसिरामित्ति । पृ० ५६४
अण्णे पुण एत्थ केरा अवरेवा अण्णधा संपवदंति
वण्णेति च । जधा किर 'करेमि भंते ! सामाइयं'
तिविहं णाणदंसणचरण भेदेणं,
सव्वं सावज्जंजोगं पच्चक्खामि तिविहं, मिच्छत्त -
अन्नाण - अविरति सहगतत्वात्सोऽपि त्रिविधः,
मणवइकाइयवावारभेदेण वा तिविधो,
तिविधेण मणसा करणकारणाणुमतिपक्खेण,
एवं वइसा काएणवि, सामाइयं करेमि सावज्जं जोगं
पच्चक्खामि । सेसं पूर्ववत् । अण्णे पुण - करेमि भंते
सामाइयं जावज्जीवाए, सव्वं सावज्जंजोगं पच्चक्खामि
जावज्जीवाए, कहं ? तिविहं तिविहेणं, मणेणं वायाए काएणं,
वट्टमाण समयादारम्भ, जावज्जीवाए न करेमि जाव न
समणुजाणामि, पुव्वकतस्स पुण पडिक्कमामि जावगरिहामि
एवं संबंधयंति, शेषं पूर्ववत् । पृ० ५६५

ૐ

## (૨૪૪) મૈત્ર્યાદિ નિર્મળ વાસના (નાભિસ્થાને) યોગવાશિષ્ઠ

બન્ધો હિ વાસનાબન્ધો, મોક્ષઃ સ્યાદ્ વાસનાક્ષયઃ ।
વાસનાસ્ત્વં પરિત્યજ્ય, મોક્ષાર્થિત્વમપિ ત્યજ ॥ ૧ ॥
માનસીર્વાસનાઃ પૂર્વં, ત્યક્ત્વા વિષયવાસનાઃ ।
મૈત્ર્યાદિભાવનાનામ્ની - ગૃહાણામલવાસનાઃ ॥ ૨ ॥
તા અપિ અન્તઃ પરિત્યજ્ય, તાભિર્વ્યવહરન્નપિ ।
અન્તઃ શાન્તતમસ્નેહો, ભવ ચિન્માત્રવાસનઃ ॥ ૩ ॥
તામપ્યન્તઃ પરિત્યજ્ય, મનોબુદ્ધિસમન્વિતામ્ ।
શેષે સ્થિરસમાધાનો, યેન ત્યજસિ તં ત્યજ ॥ ૪ ॥

વિષયવાસના - દેહવાસના, લોકવાસના, શાસ્ત્રવાસના અથવા લૌકિકવાસના - દેહવાસના તે વિષયવાસના છે, દંભ - દર્પ વગેરે આસુરી સંપત્તિ તે માનસવાસના છે અથવા શબ્દાદિ વિષયોના ભોગકાળમાં ઉત્પન્ન થતાં સંસ્કાર તે વિષયવાસના છે અને એ વિષયો પ્રતિ કામનાના કાળમાં ઉદ્ભવતા સંસ્કાર તે માનસવાસના છે.
વિષયવાસના સ્થૂલ-બાહ્ય, માનસવાસના સૂક્ષ્મ-આંતરિક છે.
ચિન્માત્રવાસના વિવેક - વિચારરૂપ જ્ઞાનાત્મક વ્યાપાર છે,
તે વડે અમુક કાર્ય ઉચિત છે,
અમુક ઉચિત નહિ, એવી વિવેકદૃષ્ટિ પ્રાપ્ત થાય છે.

અંધપ્રેરણા, અંધ આવેશ (*blind impulses*)
મટી જ્ઞાનસ્વરૂપ (*Rational insight*) બને છે.

આમ સાધનક્રમ નીચે મુજબ થશે:

(૧) બાહ્ય મલિનવાસનાનો ત્યાગ.

(૨) આંતર મલિનવાસનાનો ત્યાગ.

(3) નિર્મળ વાસનારૂપ મૈત્ર્યાદિનું ગ્રહણ.

(૪) સદ્વિચાર - વિવેકરૂપ જ્ઞાનદશામાં તેનો લય.

(૫) વિવેકજ્ઞાનનો પરમાત્મસાક્ષાત્કારમાં અર્થાત્
સમ અને પરબ્રહ્મના વિજ્ઞાનમાં લય - સ્થિર સમાધિ.

મૈત્ર્યાદિ ભાવના એ વચલી ભૂમિકા છે.
જેની એક બાજુ બાહ્ય - આંતર વૈરાગ્ય છે,
બીજી બાજુ અપર - પરવિદ્યા - જ્ઞાન છે.
એ રીતે મૈત્ર્યાદિ ભાવનાનું ગ્રહણ
એ સર્વ આરાધનાનું નાભિસ્થાન છે અને
દેહલી - દીપકન્યાયે બંને તરફ પ્રકાશ પાડે છે.
એક તરફ વૈરાગ્યને રમણીય, રોચક, સાર્થક બનાવી દે,
બીજી તરફ પરમાત્મતત્ત્વના અપરોક્ષ જ્ઞાનને
સુલભ અને સમુચિત કરી આપે છે.

- આર્હતદર્શનદીપિકા, પૃ. ૯૦૮

ॐ

(૨૪૫) મૈત્ર્યાદિ - પાતંજલ યોગદર્શન

'મૈત્રીકરુણામુદિતોપેક્ષાણાં સુખદુઃખ - પુણ્યાપુણ્ય -
વિષયાણાં ભાવનાતશ્ચિત્તપ્રસાદનમ્ ।'

ચિત્તપ્રસાદથી નિર્મળ આનંદ અને
એના કારણરૂપ નિર્મળતા - ઉભય વિવક્ષિત છે.
'પ્રસાદ' શબ્દના બે સુપ્રસિદ્ધ અર્થ: નિર્મળતા + આનંદ.
'સુખીનાં સુખ એ મારાં જ છે' એ ભાવના ઉદ્ભવતાં
રાગ - ઈર્ષ્યા - અસૂયાદિ ઉપક્લેશની નિવૃત્તિ થાય છે,
વર્ષાઋતુ ગયાં પછી શરદઋતુની નદી નિર્મળ થાય,
તેમ ઉપક્લેશની નિવૃત્તિથી ચિત્ત નિર્મળ થાય છે.
ચિત્તમલિન કરનાર ૪ પદાર્થ: રાગ, દ્વેષ, પુણ્ય, પાપ.
તેમાંથી એકની નિવૃત્તિ મૈત્રીભાવનાથી થઈ દુઃખાનુભવ
થતાં દુઃખવિષયક જે વૃત્તિ થાય છે, તે દ્વેષ છે.
દુઃખ અને તેના કારણોનો સર્વથા નાશ અશક્ય છે,
તેથી એ દ્વેષ હૃદયને બાળે છે.
'મારી માફક અન્યને પણ દુઃખ ન થાઓ'
એ પ્રકારે દુઃખી પ્રત્યે કરુણાભાવના રખાય,
તો તેથી તીવ્ર દ્વેષની નિવૃત્તિ થાય છે.
'અન્ય દુઃખી છે અને હું કેવો સુખી છું!'

ॐ

એવા ભાવમાંથી ઉછળતાં અહંકારની પણ કરુણા-ભાવનાથી નિવૃત્તિ થાય છે અને ચિત્ત પ્રસન્ન થાય છે.

એ રીતે રાગ - દ્વેષના સ્થાને મૈત્રી - કરુણાનું સ્થાપન કરવાથી નિર્મળતા અને આનંદ મળે છે.

ગુણવાળા પ્રત્યે મુદિતા-પ્રીતિ રાખે, એમનાં કૃત્યોની અનુમોદના કરે, તો એથી ગુણકાર્યમાં પ્રવૃત્તિ થાય.

પાપી તરફ ઉપેક્ષા - ઉદાસીન ભાવ રહે અને પાપકાર્ય તરફ અરુચિ ઘૃણા કરે, તો પાપથી નિવૃત્તિ રહે.

આમ ગુણમાં બાધા ન આવે, પાપથી નિવૃત્તિ મળે,

તો પશ્ચાત્તાપનું કારણ રહેતું નથી અને

પશ્ચાત્તાપના અભાવે ચિત્ત પ્રસન્ન રહે છે.

બૌદ્ધદર્શનમાં આ ૪ ભાવનાઓને 'બ્રહ્મવિહાર' કહે છે.

'વિસુદ્ધિ મગ્ગ'નું નવમું પરિચ્છેદ 'બ્રહ્મવિહાર - નિર્દેશ' છે.

પ્રથમ મૈત્રી કેળવાય, પછી કરુણા -

એમ ઉત્તરોત્તર ભાવનાઓ માટે સમજવું.

(૨૪૬) <u>સામાયિક સૂત્રમાં સમિતિ - ગુપ્તિ</u>

ઇત્થ ય 'करेमि भंते ! सामाइयं' ति पंच समितीओ गहिताओ,

सव्वं सावज्जं इच्चादिणा तिण्णि गुत्तीओ गहिताओ ।

समितीओ पवत्तणे णिग्गहे गुत्तीओ,

'समिओ नियमा गुत्तो गुत्तो समियत्तणंमि भइयव्वो ।
कुसलवइमुदीरंतो जं वइगुत्तोवि समितोवि ॥ १ ॥'
एताओ अट्ठ पवयणमाताओ,
जहिं सामाइयं चोद्दस य पुव्वाणि माताणि,
मातुगाओ वत्ति मूलंति भणितं होति ॥ xxx
इदाणिं निंदा आत्मसंतापे, निंदा चतुव्विहा, नामनिंदा (४),
दव्वनिंदा जो दव्वनिमित्तं निंदति, न पुण धम्मनिमित्तं,
निंदित्ता वा भुज्जो आसेवति । भावनिंदा —
'हा दुट्ठु कतं हा दुट्ठु कारितं दुट्ठु अणुमतं वत्ति ।
अंतो अंतोऽज्झति पच्छातावेण निन्दन्तो ॥ १ ॥'
गरहा प्रकाशने, परपागडीकरणं, सा च चउव्विहा, दव्वभूता
परपच्चया वा आलोएति गरहति, भावगरिहा —
'गंतूण गुरुसमीवं काऊणय अंजलिं विणयमूलं ।
जह अप्पणा तह परे जाणावणा एस गरहाउ ॥ १ ॥'
'अत सातत्यगमने' अततीति आत्मा, तं वोसिरामित्ति,
दव्वविउस्सग्गो गणउवहि सरीरभत्तपाणाणं विउस्सग्गो,
जो वा धम्माणुट्ठाणपवत्तो काउस्सग्गादिट्ठितो
अट्टवसट्टो तस्सवि दव्व विउस्सग्गो, अणुवउत्तो वा ।
भाव विउस्सग्गो मिच्छत्त अण्णाण अविरतीणं,

ॐ

अहवा कस्स संसार कम्माण वा विउस्सग्गो ।
x किमिति सामाइक करणाब्भुपगमं पूर्वं दर्शयति,
पच्छा सावज्जजोगवेरमणं ?
भण्णति - यतः सामायिकात्मैव
सन् सावज्जजोगविरतो
तिविहं तिविहेण वोसिरिय निपावो भवति,
न पुण सामाइय रहितो । पृ० ६१६

(२४७) संवेग - वैराग्य लक्षण

संसारभीरुत्वादि चिन्तनरूपत्वं संवेगस्य लक्षणम् ।
सांसारिक विषयवैमुख्यलक्षकषायोपरागस्य
बाह्याऽभ्यन्तरोपधिषु अनभिष्वंग रूपत्वं, सांसारिक
भोगविषयक मूर्छारहितत्वं वा वैराग्यस्य लक्षणम् ।

(२४८) मैत्र्यादि - समतादि योगसंग्रह

सर्वेऽपि सांप्रतं लोकाः, प्रायस्तत्त्व पराङ्मुखाः ।
क्लिश्यन्ते स्वाग्रहग्रस्ता, दृष्टिरागेण मोहिताः ॥१॥
दृष्टिरागो महामोहो, दृष्टिरागो महाभवः ।
दृष्टिरागो महामारो, दृष्टिरागो महाज्वरः ॥२॥
पतितव्यं जनैः सर्वैः प्रायः कालानुभावतः ।
पापो मत्सरहेतुस्तद्, निर्मितोऽसौ सतामपि ॥३॥

मोहोपहतचित्तास्ते, मैत्र्यादिभिरसंस्कृताः ।
स्वयं नष्टा जनं मुग्धं, नाशयन्ति च धिग् हहा ॥४॥
मैत्री निखिल-सत्त्वेषु, प्रमोदो गुणशालिषु ।
माध्यस्थ्यमविनेयेषु, करुणा सर्वदेहिषु ॥५॥
धर्मकल्पद्रुमस्यैता, मूलं मैत्र्यादिभावनाः ।
यैर्न ज्ञाता न चाऽभ्यस्ता, स तेषामतिदुर्लभः ॥६॥
अहो विचित्रं मोहान्ध्यं, तदन्धैरिह यज्जनैः ।
दोषा असन्तो वीक्ष्यन्ते, परे सन्तोऽपि नात्मनि ॥७॥
क्षान्त्यादिर्दशधा धर्मः, सर्वधर्मशिरोमणिः ।
सोऽपि सम्भवतामेव, मैत्र्यादिकृतकर्मणाम् ॥८॥

- योगसार, श्लो. २७/२०-४४

નિશ્ચયથી તત્ત્વને જાણનાર અને
સત્ત્વને ધારણ કરનાર મુનિ,
ઇષ્ટ અને અનિષ્ટ પદાર્થોમાં હંમેશા વ્યગ્ર થતાં
મનને સારી રીતે સ્થિર કરે. કહ્યું છે કે:

'इष्टाऽनिष्टेषु भावेषु, सदा व्यग्रंमनो मुनिः ।
सम्यग् निश्चित्य तत्त्वज्ञः, स्थिरी करोति सात्त्विकः ॥३८॥
० पापबुद्ध्या भवेत् पापं, को मुग्धोऽपि न वेत्त्यदः ।
धर्मबुद्ध्या तु यत् पापं, तच्चिन्त्यं निपुणैर्बुधैः ॥४०॥

'યોગસાર'માંથી...

यत्र साम्यं स तत्रैव, किमात्मपरचिन्तया ।
जानीत तद्विना हंहो ! नात्मनो न परस्य च ॥४३॥
क्षान्त्यादि दशधा धर्मः सर्वधर्मशिरोमणिः ।
सोऽपि साम्यवतामेव मैत्र्याद्-कृत-कर्मणाम् ॥४४॥
साम्यं समस्त धर्माणां, सारं ज्ञात्वा ततो बुधाः ।
बाह्यं दृष्टिग्रहं मुक्त्वा चित्तं कुरुत निर्मलं ॥४५॥
सहजानन्दसाम्यस्य विमुखा मूढबुद्धयः ।
इच्छन्ति दुःखदं दुःखोत्पाद्यं वैषयिकं सुखम् ॥४६॥
कषाया विषया दुःखमिति वेत्ति जनः स्फुटम् ।
तथापि तन्मुखः कस्माद् धावतीति न बुध्यते ॥४७॥
सर्वसंगपरित्यागः सुखमित्यपि वेत्ति सः ।
संमुखोऽपि भवेत् किं न तस्येत्यपि न बुध्यते ॥४८॥
सूक्ष्मासूक्ष्मतरा भावा भिद्यन्ते सूक्ष्मबुद्धिभिः ।
एतद् दूरं तु दुर्भेदं तेषामपि, हि का गतिः ॥४९॥
श्रुतश्रामण्ययोगानां प्रपंचः साम्यहेतवे ।
तथापि तत्त्वतस्तस्माज्जनोऽयं प्लवते बहिः ॥५०॥
नाऽज्ञानाद् बालको वेत्ति शत्रुमित्रादिकं यथा ।
तथाऽत्र चेष्टते ज्ञानी तदेवेह परं सुखम् ॥५१॥

## 'યોગસાર'માંથી ચાલુ...

असदाचारिणः प्रायो लोकाः कालानुभावतः ।
द्वेषस्तेषु न कर्त्तव्यः संविभाव्य भवस्थितिम् ॥५२॥

त्यक्त्वा रजस्तमोभावौ सत्त्वे चित्तं स्थिरीकुरु ।
न हि धर्माधिकारोऽस्ति हीनसत्त्वस्य देहिनः ॥५३॥

हीनसत्त्वो यतो जन्तु-र्बाधितो विषयादिभिः ।
बाढं पतति संसारे, स्वप्रतिज्ञाविलोपनात् ॥५४॥

सावद्यं सकलं योगं प्रत्याख्यायाऽन्यसाक्षिकम् ।
विस्मृतात्मा पुनः क्लीबः सेवते धैर्यवर्जितः ॥५५॥

तावद् गुरुवचः शास्त्रं, तावत् तावच्च भावनाः ।
कषायविषयैर्यावद् न मनस्तरलीभवेत् ॥५६॥

दूरे दूरतरे वाऽस्तु, खड्गधारोपमं व्रतम् ।
हीनचित्तस्य ही चिन्ता स्वोदरस्याऽपि पूरणे ॥५७॥

ये सिद्धा ये च सेत्स्यन्ति
सर्वे सत्त्वे प्रतिष्ठिताः ।
सत्त्वं विना हि सिद्धिर्न
प्रोक्ता कुत्राऽपि शासने ॥६०॥

एवमेव सुखेनैव सिद्धिर्यदि च मन्यते ।
तत्प्राप्तौ सर्वजन्तूनां तदा रिक्तो भवेद् भवः ॥६१॥

ॐ

'યોગસાર'માંથી ચાલુ...

लोकोत्तरान्तरंगस्य मोहसैन्यस्य तं विना ।
संमुखं नाऽपरैः स्थातुं शक्यते नाऽत्र कौतुकम् ॥६२॥
द्वित्राश्चतुरा वाऽपि यदि सर्वजगत्यपि ।
प्राप्यन्ते धैर्यगांभीर्यौदार्यादि - गुणशालिनः ॥६३॥
बाहुल्येन तदाभासमात्रा अपि कलौ कुतः ।
बुसप्रायैस्तु लोकोऽयं पूरितो भवपूरकैः ॥६४॥
मानुष्यं दुर्लभं लब्ध्वा ये न लोकोत्तरं फलं ।
गृह्णन्ति सुखमायत्यां पशवस्ते नरा अपि ॥६५॥
तत्पुनर्मोक्षदो धर्मः शीलांगवहनात्मकः ।
प्रतिश्रोतः प्लवात् साध्यः सत्त्वसारैकमानसैः ॥६६॥
ततः सत्त्ववष्टंभ्य त्यक्त्वा कुग्राहिणां ग्रहम् ।
क्रियतां भो सुधर्मस्य करणायोद्यमः सदा ॥६७॥
उपदेशादिना किंचित् कथंचित् कार्यते परः ।
स्वात्मा तु स्वहिते योक्तुं मुनीन्द्रैरपि दुष्करः ॥७६॥
दुःखितानखिलान् जन्तून् पश्यतीह यथा यथा ।
तथा तथा भवस्याऽस्य विशुद्धात्मा विरज्यति ॥७८॥
० दिनातिवाहिकां कष्टां दृष्ट्वा बन्ध्यादिदुःखिनाम् ।
सद्धर्मैकान्तमौनाभ्यां तपश्चित्तं स्थिरी कुरु ॥६९॥

(૨૪૯) સમ્યગ્દર્શનસ્વરૂપ - શ્રી ઉપમિતિ ભવપ્રપંચા કથા

સમ્યગ્દર્શનસ્વરૂપમ્ - પૃ૦ ૪૫૬/૧

યાનિ તે કથિતાન્યત્ર સોપાનસ્થાનિ સત્પુરે ।
દૃઢં નિશ્ચયમેતેષુ ભવચક્રપરાઙ્મુખમ્ ॥૨૦૪॥
શમસંવેગનિર્વેદકૃપાઽઽસ્તિક્ય - વિરાજિતમ્ ।
મૈત્રી - પ્રમોદ - કારુણ્ય - માધ્યસ્થ્યૈર્ભાવિતાત્મકમ્ ॥
સદા પ્રમાણકારુઢં નિવૃત્તૌ ગમનેચ્છયા ।
કરોત્યેષ જનં વત્સ ! સમ્યગ્દર્શનનામકઃ ॥

- ૨૦૫/૬ ત્રિભિર્વિશેષકં ।

(૨૫૦) મૈત્ર્યાદિ વિમલસ્ય સમ્યક્ત્વોત્પાદઃ । પૃ૦ ૪૮૬

સાત્મીભૂતા મે સમસ્તભૂતેષુ મૈત્રી,
ગતોઽઙ્ગાઙ્ગીભાવં ગુણાધિકેષુ પ્રમોદઃ,
ધારિતં બહુશશ્ચિત્તે ક્લિશ્યમાનેષુ કારુણ્યં,
દૃઢીભૂતા દુર્વિનીતેષૂપેક્ષા,
નિશ્ચલીકૃતં વૈષયિક સુખદુઃખયોરૌદાસીન્યં,
તથા પરિણતઃ પ્રશમઃ, પરિચિતઃ સંવેગઃ,
ચિરસંસ્તુતો ભવનિર્વેદઃ, પ્રગુણીકૃતા કરુણા,
અનુગુણિતમાસ્તિક્યં, પ્રગુણીકૃતા ગુરુભક્તિઃ,
ક્રોડીભૂતૌ તપઃસંયમાવિતિ ॥

- પૃ૦ ૧૯૦, મનીષિણોઽવસ્થા ।

(૨૫૧) મૈત્ર્યાદિ (મનીષીકથન)

મનીષિણાઽભિહિતં —

ભ્રાતઃ સમાકર્ણય, મમ તાવદુપેક્ષા નિર્ગુણેષુ સત્ત્વેષ્વિતિ
ભાવનયા સંજાતં બાલં પ્રતિ માધ્યસ્થ્યં ।
તથા ક્લિશ્યમાનેષુ દયાવન્તઃ સન્તઃ
ઇતિ પર્યાલોચનયા પ્રાદુર્ભૂતા તવોપરિ મહતી કરુણા,
તથા મુક્તોઽહં પાપમિત્રાઽભિષ્વંગજનિતાનામેવંવિધાનામ
-પાયાનામિત્યાકલનયા સંજાતા આત્મન્યાઽઽસ્થા બુદ્ધિઃ,
ગુણાધિકેષુ પ્રમોદવન્તો મહાત્મા ન ઇતિ વિમર્શેન ધન્યૈઃ
પુણ્યભાગસૈ ભવજન્તુઃ યેનાહં સમસ્તાનર્થહેતુઃ
સ્પર્શનઃ પાપવયસ્યઃ સર્વથા નિરાકૃતઃ
ઇત્યાલોચયતઃ સમુલ્લસિતસ્ત્વાં પ્રતિ હર્ષઃ ।

(૨૫૨) પરોપકારના લાભો : પરોપકારે ગુણાઃ । પૃ૦ ૧૦૨

ન મૌનમાલંબમાનૈઃ પરેષાં જ્ઞાનાદ્યાધાનં વિધાતું પાર્યતે,
ન ચ જ્ઞાનાદિ સંપાદનં વિહાયાન્યૈઃ
પરમાર્થતઃ પરોપકારઃ સંભવતિ,
અવાપ્તસન્માર્ગેણ ચ પુરુષેણ જન્માંતરેઽપિ તસ્યાઽ-
વિચ્છેદનમભિલષતા પરોપકારકરણપરેણ ભવિતવ્યમ્,
તસ્યૈવ પુરુષગુણોત્કર્ષાવિર્ભાવકત્વાત્ ।

अतः परोपकारः सम्यक् क्रियमाणो धीरतामभिवर्धयति,
दीनतामपकर्षति, उदारचित्ततां विधत्ते,
आत्मंभरितां मोचयति, चेतोवैमल्यं वितनुते,
प्रभुत्वमाविर्भावयति, ततोऽसौ प्रादुर्भूत वीर्योल्लासः,
प्रणष्ट रजोमोहः, परोपकारकरणपरः पुरुषो जन्मांतरे-
ष्वप्युत्तरोत्तरक्रमेण चारुतरं सन्मार्गविशेषमासादयति,
न पुनस्ततः प्रतिपततीति ।
तदिदमवेत्य स्वयमुपेत्याऽपि
ज्ञानादिस्वरूपप्रकाशने यथाशक्तिः प्रवर्तितव्यम्,
न परसामर्थ्यमपेक्षणीयमिति ।

(२५३) मैत्र्यादीनां लक्षणो : बुद्धिसूरि देशना । पृ० ५१७
अनुकूलचारिणी मैत्री, अकारणवत्सला करुणा,
सदाऽऽनन्ददायिनी मुदिता, सर्वोद्वेगविघातिनी उपेक्षेति ।

(२५४) अभ्यास - वैराग्य महिमा । पृ० ५१७
निरोद्धव्यो महामोहादि सैन्यस्य यत्नतो बहिः प्रचारः,
निहन्तव्या यथा दर्शबलान्निर्गच्छन्तस्तत्सैनिकाः
संधारणीयं चारित्रधर्मसैन्यं,
स्थिरीकर्त्तव्या चित्तवृत्तिराज्यभूमिः, प्रवर्तितव्या
मैत्रीमुदिताकरुणोपेक्षाविधानाश्चतस्रो महादेव्यः ।

ૐ

(૨૫૫) મૈત્ર્યાદિ (ક્ષાન્ત્યાદિ દશ ધર્મોપ્રાપ્તિના ઉપાયો)

क्षान्त्यादिदशक परिणमनोपायः । પૃ૦ ૭૧૭

आर्य ! क्षान्तिमभिवाञ्छता तावदनेन
भावनीया समस्तजन्तुषु मैत्री,
सहनीयः परविहितः परिभवः अनुमोदनीयस्तद्द्वारेण
परप्रीतियोगः, चिन्तनीयस्तत्सम्पादनेनाऽऽत्मानुग्रहः,
निन्दनीयाः परिभावकदुर्गतिहेतुतयाऽऽत्मा, श्लाघनीयाः
परकोपकारणभावरहिता धन्यतया भगवन्तो मुक्तात्मानः,
गृहीतव्याः कर्मनिर्जरणहेतुतया न्यक्कारकर्त्तारो, हितबुद्ध्या,
प्रतिपत्तव्याः संसाराऽसारत्वदर्शितया त एव गुरुभावेन,
सर्वथा विधेयं निष्प्रकम्पमन्तःकरणमिति ।
दया पुनः परिणिनीषताऽनेन सर्वथा वर्जनीयः
स्तोकोऽपि परोपतापः, दर्शनीयः सर्वदेहिनां बन्धुभावः,
प्रवर्तितव्यं परोपकारकरणे, नोदासितव्यं परव्यसनेषु,
सर्वथा भवितव्यं समस्तजगदाह्लादकरामृतरसधारिणेति ।

(૨૫૬) શુદ્ધ દેવ-ગુરુ-ધર્મમાં મૈત્ર્યાદિનું સ્થાન

सम्यग्दर्शनस्वरूपं । પૃ૦ ૭૩

ततः संक्षेपेण प्रस्तावस्योचितमस्य
पुरतो धर्मगुरवः सम्यग्दर्शनस्वरूपं वर्णयेयुः,

यथा भद्र! यो रागद्वेषमोहादिरहितोऽनन्त-
ज्ञानदर्शनवीर्यानन्दात्मकः समस्तजगदनुग्रहप्रवणः
सकलनिष्कलरूपः परमात्मा, स एव परमार्थतो देव
इति बुद्ध्या तस्यैव परिच्छित्तिकरणं,
तथा तेनैव भाषिता ये जीवाजीव-
पुण्यपापास्रवसंवरनिर्जराबन्धमोक्षाख्या नव पदार्थाः
ते अवितथा एवेति या प्रतिपत्तिः, तथा तदुपदिष्टे
ज्ञानदर्शनचारित्रात्मके मोक्षमार्गे ये प्रवर्तन्ते साधवः,
त एव गुरवो वन्दनीया इति या बुद्धिः तत्सम्यग्दर्शनं,
तत्पुनर्जीवे वर्तमानं प्रशमसंवेगनिर्वेदानुकम्पाऽऽस्तिक्य-
-क्याभिव्यक्तिलक्षणैर्बाह्य लिंगैर्लक्ष्यते, तथा तदंगीकृत्य
जीवेन सत्त्वगुणाधिकक्लिश्यमानाऽविनेयेषु मैत्रीप्रमोद-
कारुण्यमाध्यस्थ्यानि समाचरणीयानि भवन्ति,
तथा स्थिरता भगवदायतनसेवा, आगमकुशलता,
भक्तिः प्रवचनप्रभावना इत्येते पंचभावाः
सम्यग्दर्शनं दीपयन्ति । तथा शंकाकांक्षाविचिकित्सा
परपाषण्डप्रशंसासंस्तवाश्चैते तु दूषयन्ति,
तदेष सकलकल्याणावहो दर्शनमोहनीय-
कर्मक्षयोपशमादिनाऽऽविर्भूतः खल्वात्मपरिणाम
एव विशुद्धसम्यग्दर्शनमभिधीयते ।

ॐ

(૨૫૭) સંસારીનું સ્વરૂપ - પરોપકાર પૃ. ૫૦૬

बुधसूरिकथितं संसारिस्वरूपं ।

विमलेन चिन्तितं - अहो ।

समागतः स एष भगवान् बुधसूरिः,
अहो भगवतो वैक्रियरूपकरणातिशयः,
अहो ममोपरि करुणा, अहो परोपकारकरणैकरसत्वं,
अहो स्वसुखकार्यनिरपेक्षता,
अहो निर्व्याजसौजन्यातिरेक इति ।

तथाहि — स्वकार्यमवधीर्यैव, परकार्ये कृतोद्यमाः ।
भवन्ति सततं सन्तः, प्रकृत्यैव न संशयः ॥
स्वकार्यमिदमेतेषां यत्परार्थे प्रवर्त्तनम् ।
भानोः किं किंचिदस्त्यन्यल्लोकोद्योतादृते फलं ॥
निजे सत्यपि साधूनां कार्ये नैवादरः क्वचित् ।
सलांछनो जगद्धीती, दृष्टान्तातोऽत्र निशाकरः ॥
नाऽभ्यर्थिताः प्रवर्तन्ते परकार्ये महाधियः ।
केन हि प्रार्थिता लोके वृष्टये धीर! नीरदाः ॥
स्वप्नेऽपि न स्वदेहस्य सुखं वांछन्ति साधवः ।
क्लिश्यन्ते यत्परार्थे ते सैव तेषां सुखासिका ॥
यथाग्निर्दाहपाकाय जीवनाय यथाऽमृतं ।
स्वभावेन तथा लोके परार्थो साधुसंहतिः ॥

कथं ते नाऽमृतं सन्तो ये परार्थपरायणाः ।
तृणायाऽपि न मन्यन्ते स्वसुखे धनजीविते ॥
इत्येवं ते महात्मानः परार्थे कृतनिश्चयाः ।
आत्मनाऽपि भवन्त्येव, नूनं सिद्धप्रयोजनाः ॥१३॥

(२५८) मैत्र्यादि चतुर्भावनास्वरूप

अथ कषायचतुष्टयपरिहारादिकमाह —

मुयह निहयसोहं सव्वहा कोहलोहं,
निहणह मयमायं दिन्नसंसारपायं ।
सरह सरहसंभो ! सव्वसत्तेसु मित्तिं,
कुणह जिणगुरूणं पायपूयापसत्तिं ॥४॥

व्याख्या - 'मुञ्चत' त्यजत 'सव्वहा' करणकारणादिभिः सर्वैः प्रकारैः, क्रोधश्च लोभश्चेति समाहारद्वन्द्वस्तत्, कीदृशं ? 'निहतशोभं' विध्वस्तशिष्टतीच्छायं, तथा 'निहत' निष्कसत 'मदमायम्' अहंकारपरवञ्चने, कीदृशं ? 'दत्तसंसारपातं' वितीर्णभवार्णवमज्जनं । हेयमभिधाय उपादेयमाह - 'स्मरत' अनुगच्छत भोः श्राद्धाः ? 'सरभसं' सोत्कण्ठं, हंभो इति तु पाठे, स्मरत स्मरतेति द्विरुच्चारणमत्यादरख्यापनार्थं, हंभो !

ॐ

इति तु संबोधने, किमित्याह — 'सर्वसत्त्वेषु'
समस्तप्राणिषु 'मैत्रीं' सौहार्दं,
न क्वापि वैरानुबन्धमित्यर्थः, तथा 'कुरुत' विधत्त
किमित्याह - 'पादपूजाप्रसक्तिं' चरणाराधनानुबन्धं,
केषामित्याह 'जिनगुरूणां' तीर्थकृदाचार्याणां, तत्पूजाया
एव सकलकल्याणनिबन्धनत्वादिति वृत्तार्थः ॥ ४ ॥

मैत्रीमभिधाय गुणवत्प्रमोदकरुणे प्राह -

पयडह बहुदुक्खत्तेसु सत्तेसु दूरं,
परमकरुणाभावं दव्वओ भावओ य ।
अह गुणिसु रागं सव्वकल्लाणवल्ली-
पसरसरसनीरासारमच्चंतसारं ॥ ५ ॥

व्याख्या - 'प्रकटयत' विधानेन प्रकाशयत 'बहुदुःखार्तेषु' प्रभूतबाधापीडितेषु प्राणिष्विति गम्यते, 'दूरम्' अतिशयेन, किमित्याह - 'परमकरुणाभावं' प्रकृष्टदयासद्भावं, कथमित्याह - 'द्रव्यतो' बाह्यवृत्त्या, यथा क्वाचित् प्राणिनि प्राणधनाद्यपहारे विधीयमाने सर्वथा तद्भयनिवारणं, 'भावतश्च' अन्तर्वृत्त्या, यथा कथमेते प्राणिनः सर्वथा दुःखाद् मोचनीया इत्यध्यवसायः तथा चोच्यते,

"सम्मद्दिट्ठी जीवो अणुकंपपरो सयावि जीवाणं ।
भाविदुहविप्पओगं ताण गणिंतो विचिंतेइ त्ति ॥ १ ॥"

तदेवमुत्सूत्रभाषिणोऽपि करुणां करोतीति तथा 'भजत' आश्रयत किमित्याह -'गुणिषु' ज्ञानादिमत्सु आचार्यादिषु 'रागं' गुणप्रतिबन्धम्, अनुमोदनमित्यर्थः, कीदृशं ? सर्वकल्याणान्येव वर्द्धनसाधर्म्याद् वल्ली तस्याः समस्तैहिकादिश्रेयोलतायाः 'प्रसरः' प्रवर्धनं तत्र 'सरसनीरासारम्' अत्यन्तमधुरजलवेगवद्वर्षं, पुनः कीदृशम् ? 'अत्यन्तम्' अतिशयेन शेषगुणापेक्षया 'सारं' प्रधानं, नहि तथा एकगुणवदनुरागेणापि समस्त - गुणवद्गतगुणानुरागः कृतो भवति, तथान्येन केनापि विनयादिना इत्येवमत्यन्त सारत्वमस्येति वृत्तार्थः ॥५॥

(२५१) प्रशस्त राग - द्वेष

द्वादशकुलकम् । एकादशं कुलकम् ॥ पृष्ठ ९७

रागस्स य दोसस्स य उदिस्स सुहासुहे सुहासुहया । जइ पुण विसयापेक्खा कह होज्जातो विभागो सिं ॥१६॥

— अपि च सम्यग्दृशोऽपि चक्रवर्त्यादयः संसारकर्मणि बलवदनिष्टानुबन्धित्वं प्रतिसन्दधाना रागादिपारवश्यं विना कथं प्रवर्त्तिष्यन्ते तस्मादनन्तानुबन्धिविलयोदितसम्यग्दर्शनादिनाभाविप्रशस्तविषय-रागद्वेषाभ्यां मोक्षोपादान(दित्सा)संसारजिहासे प्रगल्भमाने अपि चारित्रमोहप्रतिबन्धक सत्त्वान्न तदुपादानहानोपायेषु

प्रवृत्तिं जनयितुमप्रभवत् एवानुत्तरोत्तरप्रतिबन्धक
विलयेन तु क्रमेण लब्धं सरागं चारित्रमप्यन्ततः
सुकृतानुमोदनदुष्कृतगर्हादिपरिणामोपकारि
प्रशस्तरागद्वेषकणसंकीर्णमेव । तथाविध-
कारणवशाच्च सुमङ्गलसाध्वादेस्तादृशापवादसेवने
तथाविधद्वेषोऽपि न मूलतो दोषाय, प्रशस्तरागस्येव
प्रशस्तद्वेषस्य तथाविधचारित्रपरिणामाप्रतिबन्धकत्वात् ।
अथ स्फटिकस्य जपाकुसुमोपरागस्थानीयं सरागचारित्रं
तापिच्छकुसुमसंसर्गस्थानीयो द्वेषः
कथमुपकुर्यादिति चेद्रागोऽपि कथं ?
प्रशस्तोद्देशेन तद्रूपपरिहारादिचेत्तुल्यमिदमन्यत्र,
- 'अध्यात्ममतपरीक्षा वृत्ति', पृष्ठ ७ ।

(२६०) પરોપકાર - મૈત્ર્યાદિ

अन्योपकारकरणं धर्माय महीयसे च भवतीति ।
अधिगतपरमार्थो नामविवादो वादिनामत्र ॥ - अ ३, सू ९१
कुशलभावनायां प्रबन्धः । - अ० ३, सू० ९४
सर्वेऽपि सन्तु सुखिनः, सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु, मा कश्चित्पापमाचरेत् ॥
सत्त्वादिषु मैत्र्यादियोग इति । - धर्मबिन्दु, अ० ३, सू० ९२

(૨૬૧) સુસ્થિત મહારાજ જ સુખ-દુઃખના દાતા છે.

પૃ. ૭૧૨, सुस्थितकृते सुखदुःखे - શ્લો ૨૭૩ થી ૨૯૫

अस्त्यसौ निर्वृतिर्नाम नगरी सुमनोहरा ।
निरन्तानन्दसन्दोहपरिपूर्णा निरामया ॥
तस्यामनन्तवीर्याढ्यः सर्वज्ञः सर्वदर्शनः ।
अनन्तानन्द संपूर्णः, सुस्थितः परमेश्वरः ॥
एष विद्यते महाराज ! सर्वस्य जगतः प्रभुः ।
सुन्दरेतरकार्याणां, स ते परम कारणम् ॥
अनेकोऽप्येकरूपोऽसौ गीयते वरसूरिभिः ।
अचिन्त्यवीर्ययुक्तात्मा परमात्मा स गद्यते ॥
स बुद्धः स विरिञ्चाख्यः स विष्णुः स महेश्वरः ।
निष्कलः स जिनः प्रोक्तो दृष्टतत्त्वैर्महात्मभिः ॥
न चेच्छया करोत्येष तव कार्यपरम्पराम् ।
वीतरागो गतद्वेषो निरिच्छोऽयं यतो मतः ॥
यथा तु कुरुते तात ! तवाऽयं सुन्दरेतरम् ।
कार्यजातं तथाऽऽवच्मि साम्प्रतं विशदाक्षरैः ॥
स्थिता भगवतस्तस्य निश्चला सुप्रतिष्ठिता ।
अस्त्याज्ञा सर्वलोकानामाकालं करणोचिता ॥
निरन्धकारा कर्तव्या चित्तवृत्तिः प्रभास्वरा ।
गोक्षीरहारनीहारकुन्देन्दुविशदा सदा ॥

गृहीत्वा रिपुबुद्ध्या च महामोहादिकं बलं ।
अनुरूपं निहन्तव्यं घोरसंसारकारणम् ॥
बन्धुबुद्ध्याऽथवाद्येदं पोषणीयं च सर्वदा ।
चारित्रधर्मराजाद्यं सैन्यं कल्याणकारणम् ॥
इयमेतावती तस्य सर्वलोकसमाश्रया ।
वर्तते नृपतेराज्ञाविधातुर्हितकारिणी ॥
संपूजनेन ध्यानेन स्तवेन व्रतचर्यया ।
इयमेव विधातव्या तदाज्ञा तस्य सेवकैः ॥
निषिद्धाचरणैः सर्वैरियमेव विराध्यते ।
तदुक्तद्वादशांगार्थः सर्वोऽप्यस्यां व्यवस्थितः ॥
तां च यो यावतीं लोके विदधाति नरः सदा ।
अजानन्नपि तद्रूपं तस्य तावद्भवेत्सुखम् ॥
यस्तु तां लंघयन्नाज्ञां विपरीतं विचेष्टते ।
जानन्नपि च तद्रूपं स भवेद्दुःखभाजनम् ॥
यो यावत्कुरुते मोहात्तदाज्ञालंघनं जनः ।
तस्य तावद्भवेद्दुःखं यथा तत्करणे सुखम् ॥
एवं च स्थिते —
तदाज्ञालंघनाद्दुःखं तदाज्ञाकरणात्सुखम् ।
अतः संपद्यते सर्वं सर्वेषामपि देहिनाम् ॥

अणुमात्रमपि तस्माऽस्मिन् भुवनेऽत्र शुभाऽशुभम् ।
तदाज्ञानिरपेक्षं हि ह्युज्जायेत् कदाचन ॥
तेनेच्छा - रागविद्वेषविरहितोऽपि स भूपतिः ।
निर्वृत्तिस्थोऽपि कार्याणां लोकैः परम कारणम् ॥
स एव परमो हेतुरतस्ते गुणधारणा! ।
सुन्दरेतरकार्याणां सर्वेषां नाऽत्र संशयः ॥
तदाज्ञालंघनात्पूर्वं जाता ते दुःखमालिका ।
अधुना तत्करत्वेन सुखलेशोऽयमीदृशः ॥
यदा तु तस्य संपूर्णामाज्ञां त्वं करिष्यसि ।
तदा यः सुखसन्दोहस्तमस्य विलास्यसे रसम् ॥

(२६२) आत्मौपम्यलक्ष्य - सामायिक

- श्री तत्त्वार्थ सू०, अ० ७, सू० १६ (भाष्य)

सामायिकं नामाभिगृह्य कालं सर्वसावद्ययोगनिक्षेपः ।
टीका - सामायिकमिति समो रागद्वेषविमुक्तो
यः सर्वभूतान्यात्मवत् पश्यति, आयो लाभः प्राप्तिः ।
समस्यायः समायः प्रतिक्षणमपूर्वापूर्वज्ञानदर्शनचरण -
पर्यायैर्युज्यते स एवं समायः प्रयोजनमस्य
क्रियानुष्ठानस्येति सामायिकम् ।
समाय एव वा सामायिकम् ।

ॐ

(२६३) પ્રમોદ ભાવ - અ૦ ७, સૂ૦ ६

ભાષ્ય: 'प्रमोदं गुणाधिकेषु । प्रमोदो नाम विनयप्रयोगः । वन्दनस्तुतिवर्णवाद वैयावृत्त्यकरणादिभिः सम्यक्त्व ज्ञानचारित्रतपोऽधिकेषु साधुषु परात्मोभयकृत पूजाजनितः सर्वेन्द्रियाभिव्यक्तो मनः प्रहर्ष इति ।'

(२६४) મૈત્ર્યાદિનો સમવતાર

ભાવના : મૈત્રી - પ્રમોદ - કરુણા - માધ્યસ્થ્ય.

પૂર્વસેવા : सुदाक्षिण्य, वर्णवादश्च साधुषु,
दीनाभ्युद्धरणादरः, सर्वत्र निंदा संत्यागः ।

३५ ગુણ : परोपकृतिकर्मठः, पक्षपाती गुणेषु च,
सदयः, अवर्णवादी न क्वापि ।

२२ ગુણ: परहितार्थकारी, गुणरागी, दयालु, मध्यस्थसोमदृष्टी ।

*दाक्षिण्यं = गंभीरचेतसो निर्मत्सरस्य प्रकृत्यैव परकृत्याभियोगपरता (योगबिन्दु, श्लो १२६-७).

(२६५) પરોપકારમૂલક આત્મોપકાર

ભવભાવના, કર્તા: મલ્લધારી શ્રી હેમચન્દ્રસૂરીશ્વરજી

પ્રારંભિક મંગલાચરણ પૃ૦ २

इह भवसायरमज्झम्मि निवडिओ जाणवत्तपरितुल्लं ।
पावइ जीवो जिणधम्मसंजुयं कहवि मणुयत्तं ॥२॥

पत्ते य तम्मि नियमा अत्तुवगारो बुहेहिं कायव्वो ।
जिणधम्मविहाणेणं इहरा परिवंचिओ अप्पा ॥४॥
जो परउवयारं पि हु करेइ पुण कहवि पुण्णजोएणं ।
पत्ता सोहग्गुवरिंपि मंजरी तेण पुरिसेण ॥५॥
अत्तुवगार मई वि हु जायइ जम्हा जयम्मि विरलाणं ।
ते उण विरलयरच्चिय परोवयारे मई जाणं ॥६॥
परउवयारमईए संताए अविय अहव सामत्थं ।
थोवाण तत्थ केसिंपि पुण्णपब्भार कलियाणं ॥७॥
तम्हा अत्तुवगारम्मि साहिए परोवयारमूलम्मि ।
धीरपुरिसाणुचिण्णे परोवयारम्मि जइयव्वं ॥८॥
सिद्धसकज्जा जं जिणवरावि धम्मोवएसमाईहिं ।
अन्नेसिं उवयारं कुणंति कारुण्णजलनिवहा ॥९॥
दुविहो परोवयारो निद्दिट्ठो दव्वभावभेएणं ।
पढमो कामत्थेहिं बीओ उण धम्मदाणेण ॥१०॥
तत्थ य अत्थमईणं भवाभिनंदीण बालपगइओ ।
पढमो जणेइ तोसं तव्विवरीयाण पुण बीओ ॥११॥
पाएण अत्थकामा मूलं चिय जेण भव महातरुणो ।
ता तदुवएसदाणं अहियमपत्थं व रोगीणं ॥१२॥
पत्ता य अत्थकामा अणंतसो नरवराइ भावेसु ।
भुत्तो य तन्निबंधणमणेगसो दुह समुग्घाओ ॥१३॥

पज्जलइ तह सव्वंगिए कामहुआसो जणस्स हिअएसु ।
दविण पिवासाए पुणोऽतिसव्वं च समेइ भुवणयलं ॥१४॥
तो जइ गुरुव्वि कुज्जा कामत्थुवएसदाण साहिज्जं ।
ता हुज्ज इंधोऽवि फुडं जलिअवरे आहुइक्खेवे ॥१५॥
ओमाहिआए सिहिलविआमिव तिसिअस्स तत्ततउपाणं ।
खारक्खेवाव खए उल्लंबिअ-चरणगहणं वा ॥१६॥
मज्जंतस्स गले उवलबंधणं धारिअस्स अहिडसणं ।
मालाओ निवडिअस्स व सिरम्मि घणघायतुल्लं च ॥१७॥
तम्हा उव(ए)सिअव्वो दायव्वो वावि सव्वजंतूणं ।
परउवयारत्थाहिं जिणधम्मोच्चिअ जओ भणिअं ॥१८॥
सुरनरसुहाइं सव्वाहिं तेण दिन्नाइं निव्वुइसुहं च ।
परमत्थबंधवेणं दिन्नो जेणेस जिणधम्मो ॥१९॥
ते सुहिणो ते सयणा हिएसिणो बंधुणो अ ते चेव ।
अइसयजहत्थ सुहकारणं च जे दिंति जिणधम्मं ॥२०॥
धम्मो चउविअप्पो जइवि हु दाणाइएहिं भेएहिं ।
तहविहु भावणधम्मो विवक्खिओ एत्थ सत्थंमि ॥२१॥
जं भावणाइरहिआ दाणाईआ उदेंति अ ईह फलं ।
सा उण तन्निरविक्खावि जायए सग्गमोक्खफल ॥२२॥
० 'एहिक फलमित्यर्थः ।'

ॐ

(२६६) सम्यक्त्वना उपशमादि ५ लिंगो, पृ० २०१-३-५

पञ्चलिङ्गीप्रकरणम् - श्रीमदर्हत्सिद्धांतपारंगत
श्रीमज्जिनपतिसूरि विरचित टीकासमेतम् ।
उपाध्यायश्री जिनपालगणिसंकुलित टिप्पण्या समलंकृतम्

उवसम संवेगो विय निव्वेओ तह य होइ अणुकंपा ।
अत्थिक्कं चिय पंचवि हवंति सम्मत्तलिंगाइं ॥१॥

— अत्र च एषाम् एवं क्रमोपन्यासः किमर्थम् ?
इति चेत्, उच्यते, मिथ्याभिनिवेशोपशमस्य
सम्यक्त्व प्रधानकार्यत्वेन प्रधानत्वाद् आदौ उपन्यासः ।
न च मिथ्याभिनिवेशवतः संवेगः,
तस्य कुतीर्थ्यधिगमभावितान्तः
करणतया तात्त्विकमोक्षस्वरूपानभिज्ञत्वेन तत्वतस्त
-दभिलाषाभावात् इति, तद् उपशमानन्तरं संवेगस्य ।
न चाऽसंविग्नस्य निर्वेदः, तस्य नरकादि दुःखैः आत्मनः
तन्मयत्वभावनाऽयोगादिति, तदनन्तरं निर्वेदस्य ।
न च अनिर्विण्णस्य अनुकम्पा,
आत्मौपम्येन सर्वं पश्यतो हि सा स्यात्,
तस्य च ऐहिकसुखाभिलाषुकतया तदभावात्,
इति तदनन्तरम् अनुकम्पायाः ॥

न च निरनुकम्पस्य वास्तवम् आस्तिक्यं,
वस्तुतोऽनुकम्पावत एव तात्त्विकास्तिक्यनिश्चयात्,
इति तदनन्तरम् आस्तिक्यस्य, इति ।
सम्यक्त्व कार्यत्वेऽपि एषाम् एवम् आनन्तर्यक्रमेण
उत्पादात् इत्थम् उपन्यासः ॥ यद्वा आस्तिक्यस्य
सर्वगतत्वेन बहुविषयतया पश्चादभिधानम्,
अथवा पश्चानुपूर्व्या आस्तिक्यादिक्रमेण एषाम् उत्पादात्
प्रथमं तथा पाठप्रसक्तौ अपि यथा प्रधानन्यायम् आश्रित्य
उपशमादिक्रमेण पाठक्रमो दर्शित इति गाथार्थः ॥ १ ॥
इत्तोच्चिय संलत्तं अप्पडिविरओ सुदिट्ठीजं दुक्खं ।
वेयइ तं न अन्नो संसारी माणसं भयइ ॥४६॥
व्याख्या – यत एव सम्यग्दृष्टेर्नास्ति
सर्वगतिदुःखानि विचरन्ति,
अत एव हेतोः 'संलपितं' भणितमागमे 'अप्रतिविरतः'
अविरतः 'सुदृष्टिः' सम्यग्दृष्टिर्यदनाख्येयस्वभावं
'दुःखं' खेदं 'वेदयते' स्वानुभवेन चेतयते,
तत् 'नान्यः' सम्यग्दृष्टेर्नापरः 'संसारी' भवस्थो जीवः
'मानसं' चेतः प्रभवं 'भजते' अनुभवति इह च वेदयत
इति क्रियानुवृत्तावपि यत्पुनर्भजतीति तदेकार्थ-

क्रियान्तरोपादानं तत्तस्य दुःखातिशयं सूचयति,
स ह्येवं मन्यते प्रवर्त्तन्तां नामैते पापकर्मसु
जिनवचनश्रुत्याऽविद्धकर्णा-हलधरगोपालादयः पशुदेशीयाः,
अहं तु नित्यं सिद्धान्ताकर्णनावगतसंसाररहस्योऽपि
यदेवं निःशङ्कतया तेषु व्याप्रिये तत् ध्रुवं मे संसारान्मोक्ष
इत्याशयवान् भाविनीं दुःखश्रेणीमात्मनः कलयन्
कथञ्चित्कायिकादि - सुखसम्भवेऽपि
यदसौ मानसं कष्टं संवेदयते, तत्कोऽन्योऽनुभवेत् ?
किं चाऽन्येषां प्रायः स्वदुःखेन दुःखितत्वं,
तस्य तु गति - चतुष्टयवर्त्तिनामङ्गिनां दुःखदर्शनात्
तन्मोजनचिन्तया महादौस्थ्यमिति तथा चागमः—
"भयवं के संसारे दुक्खिया ? गोयमा !
सम्मद्दिट्ठी अविरय" त्ति, इति गाथार्थः ॥४६॥
सम्मद्दिट्ठी जीवो अणुकंपपरो सयावि जीवाणं ।
भविदुहविप्पओगं ताण गणंतो विचिंतेइ ॥५२॥
— ततश्चानुकम्पापरो युक्तितो भावकरुणापरायणः
'सदाऽपि' सर्वदैव 'जीवानां' जन्तूनां 'भविदुःखविप्रयोगं'
मिथ्यात्वादिहेतुकभविष्यद्दुःखक्लेशविरहं तेषां जीवानां
'गणयन्' परिभावयन् विचिकीर्षन्नित्यर्थः
'विचिन्तयति' परामृशति, इति गाथार्थः ॥५२॥

ॐ

(२६७) साधादित (द्रव्यार्थिक - पर्यायार्थिक नय)

जीवो गुणपडिवन्नो नयस्स दव्वट्ठियस्स सामाइयं ।
सो चेव पज्जवट्ठियनयस्स जीवस्स एस गुणो ॥२६४३॥
- विशेषावश्यक भाष्य

ब्रह्मघ्ने च सुरापे च, चौरे भग्नव्रते तथा ।
निष्कृतिर्विहिता सद्भिः कृतघ्ने नाऽस्ति निष्कृतिः ॥
- योगशास्त्र, प्र० १, पृ० ५५

(२६८) मित्रादि दृष्टिमां मैत्र्यादि

प्रवृत्तिरप्यमीषां (स्थिरादि दृष्टिमतां) परार्था, सद्‌बोध-
भावेन विनिवृत्ताग्रहतया मैत्र्यादिपारतंत्र्येण गंभीरो-
दाराशयत्वात् चारिचरकसंजीवन्यचरकचारणनीत्या ।
- योगदृष्टि, श्लो० १४, टीका

प्रथम दृष्टिनुं नाम ज मित्रा छे.

स्थिरामां बोध: न अपरपरितापकृत् परितोषहेतुः ।
प्रभामां बोध: परानुग्रहकर्तृता । तत्संनिधौ वैरादिनाशः ।
परादृष्टिमां बोध: परोपकारित्वम् ।

प्रथम दृष्टिमां अद्वेषश्चाऽपरत्र । अपरत्र अदेवकार्यादौ ।
तथा तत्त्वाऽवेदितया मात्सर्यवीर्यबीजभावेऽपि
तद्भावांकुरानुदयात् तथाविधाऽनुष्ठानमधिकृत्य
करुणांशबीजस्यैव इषत्स्फुरणात् । श्लो० २१

ॐ

जिनेषु कुशलं चित्तं, तन्नमस्कार एव च ।
प्रणामादि च संशुद्धं, योगबीजमनुत्तमम् ॥
कुशलचित्तं द्वेषाद्यभावेन प्रीत्यादिमत् ।
કુશલચિત્ત = મનોયોગ, નમસ્કાર = વચનયોગ, પ્રણામાદિ = કાયયોગ, एतत् सामस्त्यप्रत्येकभावाभ्याम् योगबीजं मोक्षयोजकाऽनुष्ठानकारणात् । - યોગદૃષ્ટિ શ્લોક ૨૨/23
तथाभव्यत्वपरिपाकतः मिथ्यात्व कटुकत्व-निवृत्त्या मनाक् माधुर्यसिद्धेः । - શ્લોક ૨૪, ટીકા
0 આવ - હારિ, ટીકા ૫૮૯
परवसणं अहिनंदइ, निद्दओ रौद्दज्झाणोवगयचित्तो -
परस्य आपत् अभिनन्दति, निर्दयः परानुकम्पाशून्यः ।
तत्र धारणायां सुस्थितः
मैत्र्यादिचित्त - परिकर्मवासितान्तः करणतया ।
- સદ્દૃષ્ટિ દ્વાત્રિંશિકા ૨૪, શ્લોક ૯, ટીકા
आभ्यन्तरं (शौचं) मैत्र्यादिभिश्चित्तप्रक्षालनम् ।
- તારાદૃષ્ટિ, દ્વાત્રિંશિકા, શ્લોક ૨
(૨૬૧) શ્રાવકધર્મમાં મૈત્ર્યાદિ - ધર્મસંગ્રહ, પૃ. ૨૫૯, શ્લો. ૭૧
प्ररूपितो जिनैरेवं गृहिधर्मो विशेषतः ।
सतामनुष्ठेयतया चारित्रगिरि - पद्धिका ॥ ७१ ॥

ॐ

एवं उक्तनीत्या जिनैः अर्हद्भिः विशेषतः
सामान्यगृहस्थधर्मवैलक्षण्येन
गृहिणो - गृहस्थस्य धर्मः परमात्मप्रणीतवचनानुसारी
श्राद्धभावभावितोऽनुष्ठानविशेषः प्ररूपितः उपदिष्टः।
स च पृथ्वीधरसरित्समुद्रद्वीपादि - सदावस्थित-
भाववत्केवलं सेव्यतया मिथ्यात्वाद्याश्रववद्धेयतया
वोपदिष्टो भविष्यतीत्याशंकायामाह -
सतामित्यादि सतां उत्तमानां मार्गानुसार्यादि-
भावापन्नानामित्यर्थः, अनुष्ठेयतया विधेयतया,
सद्भिरयं विधेय इत्युपदिष्ट इति भावः।
कीदृशोऽसावित्याह - चारित्रगिरिपद्यिकेति, चारित्रं
सर्वसावद्ययोग - परिहार - निरवद्य - योगसमाचाररूपं
तदेव गिरिः पर्वतः तस्य पद्यिकेव पद्यिका,
पद्यारोहेण पुमान् यथा सुखेन महाशैलमारोहति,
तथा निष्कलंकानुपालितः श्रमणोपासकाचारः
सर्वविरतिं सुखेनावगाहत इति भावः।
तदुक्तं धर्मबिन्दौ - पदं पदेन मेधावी, यथाऽऽरोहति पर्वतम्।
सम्यक् तथैव नियमाद्धीरश्चारित्रपर्वतम् ॥ १ ॥
एवं च स्तोकगुणाराधनानुपुर्व्या बहुगुणाराधनस्य
न्याय्यत्वात् प्रथमं गृहस्थ धर्मः प्रतिपादितः।

ॐ

तदुक्तं तत्रैव धर्मबिन्दौ -

'स्तोकान् गुणान् समाराध्य, बहूनामपि जायते ।
यस्मादाराधनायोग्यस्तस्मादादावयं मतः ॥१॥'

इति, अयं च पुरुषविशेषापेक्षो न्यायः, अन्यथा
तथाविधाऽध्यवसाय - सामर्थ्याद्विरलीभूत - चारित्र -
मोहानां स्थूलभद्रादीनामेतत्क्रममन्तरेणाऽपि परिशुद्ध -
सर्वविरतिलाभः स्वशास्त्रेषु श्रूयमाणत्वात् ।
कालविशेषापेक्षोऽप्ययमेव न्यायोऽनुसरणीयः ।
यतः पञ्चमारके प्रतिमापरिपालन - पर्यन्त -
श्राद्धधर्मानुगृहीत - चित्तस्यैव यतिधर्मप्रतिपत्तिः
पञ्चाशकेऽभिहिता, तथा च तद्वचः —

'जुत्तो पुण एस कमो, ओहेण संपयं विसेसेणं ।
जम्हा विसमो कालो, दुरणुचरो संजमो एत्थं ॥१॥'

(२७०) सामायिक व्याख्या

जस्स सामाणिओ अप्पा, संजमे नियमे तवे ।
तस्स सामाइयं होइ, इइ केवलिभासिअं ॥१२७॥

० जो समो सव्वभूएसु, तसेसु थावरेसु अ ।
तस्स सामाइयं होइ, इइ केवलि भासिअं ॥१२८॥

'यः समः सर्वत्र मैत्र्यभावात् तुल्यः ।'

जह मम ण पिअं दुक्खं, जाणिअ एमेव सव्वजीवाणं ।
न हणइ न हणावेइ अ सममणुमइ तेणसो समणो ॥१२९॥
णत्थि य सि कोइ वेसो पिओ अ सव्वेसु चेव जीवेसु ।
एएण होइ समणो एसो अन्नोवि पज्जाओ ॥१३०॥
'समं मनो यस्येति समना ।'
उरगगिरिजलणसागरनहतलतरुगणसमो अ जो होइ ।
भमरमियधरणि जलरुह रविपवणसमो अ सो समणो ॥१३१॥
तो समणो जइ सुमणो, भावेण य जइ ण होइ पावमणो ।
सयणे अ जणे अ समो, समो अ माणावमाणेसु ॥१३२॥

(२७१) परोपकार

कज्जो परोवयारो परिहरियव्वा परेसिं पीडा य ।
हेया विसयपवित्ती भावेयव्वं भवसरूवं ॥१९५॥

टीका - परेषां स्वव्यतिरिक्तानां उपकारः आयतिहितानुकूलो व्यापारः, तस्य स्वोपकारानुबन्धप्रधानत्वात् । तथा परिहर्तव्या परेषां पीडा, परपीडापरिहार - परिणामस्यैव स्वपीडापरिहार - फलत्वात् ।

- उपदेशरहस्य, श्लो० १९५

(२७२) परपीडेह सूक्ष्माऽपि वर्जनीया प्रयत्नतः ।
तद्वत् तदुपकारेऽपि यतितव्यं सदैव हि ॥

- योगदृष्टि, श्लोक १५०

(२७३) परोपकार - परोपकारः सततं विधेयः
स्वशक्तितो यत्सुजनीतिरेषा ।
न स्वोपकाराक्ष्य स विद्यते तत् -
तं कुर्वतोऽत्र द्वितयं कृतं स्यात् ॥१॥
- ઉપદેશ રત્નાકર પીઠિકા, શ્લોક ૨૩

(२७४) परदुःख प्रतीकारमेवं ध्यायंति ये हृदि ।
लभन्ते निर्विकारं ते सुखमायति सुंदरम् ॥
- શાંત સુધારસ, કરુણા ભાવના, શ્લોક ૭

अन्योपकारकरणं धर्माय महीयसे च भवतीति ।
अधिगतपरमार्थानामविवादो वादिनामत्र ॥
- ધર્મબિન્દુ, અ० ૨, સૂ० ૭૨, ટીકા

(२७५) જિનાજ્ઞા બહુમાનમાં મૈત્ર્યાદિ પૃ० ૨૧૧ - ૨૨
आणा बहुमाणाओ सुद्धाओ इह फलं विसिट्ठं ति ।
ण तु किरियामेत्ताओ पुव्वायरिया तहा चाहु ॥२३८॥
'इह मैत्र्यादि कृत्येषु, विशिष्टं पुण्यानुबन्धिपुण्यरूपं,
निरनुबन्ध्यशुभकर्मरूपं च संपद्यते इति ।
क्रियामात्रात्, मन्त्रविवर्जित - सर्पदष्टापमार्जन -
क्रियाकल्पात् साधुसमाचारासेवनादेः ।'
आणाए बहुमाणाओ सत्तिओ सुकिरियापवित्तीवि ।
नियमेणं चिय इहरा ण तओ सुद्धेत्ति इट्ठा सा ॥२३९॥

एईए उ विसिट्ठं सुवण्ण-घड-तुल्लमिह फलं नवरं ।
अणुबंधजुयं संपुण्ण हेउओ सम्ममवसेयव्वं ॥२४०॥

एतस्याः क्रियायाः । संपूर्णहेतुतः संपूर्णेभ्यो हेतुभ्यो भावात्,
हेतवश्चाऽस्य प्राणिकरुणादयः ।

यथोक्तम् - दयाभूतेषु संवेगो विधिवद् गुरुपूजनं ।
विशुद्धाशीलवृत्तिश्च पुण्यं पुण्यानुबन्ध्यदः ॥१॥

सम्यग् यथावदवसेयः । न हि पूर्णकारणारब्धा भावाः कदाचिद् निरनुबन्धा भवितुमर्हन्ति, अन्यथा तत्त्वाऽनुपपत्तेः । ननु क्रियामात्रमपि आशाबहुमान-शून्यानां कथं साध्यते?
इत्याशंक्याह —

किरियामेत्तं तु इहं जायति लद्धादवेक्खयाऽवि ।
गुरुलाघवादि-सन्नाणवज्जियं पायमियरेसिं ॥२४१॥
एत्तो उ निरणुबंधं मिम्मय घडसरिसमो फलं णेयं ।
कुलडादियदाणाइसु जहाजहा हंत एयंपि ॥२४२॥

इतस्तु क्रियामात्रात् । नन्वविसातसुवचनविनियोगा-नामपि केषांचित् शास्त्रे चारित्ररूपः परिणामः श्रूयते,
स कथं तेषां जातः ? इत्याशंक्याह —

मासतुसादीयाण उ मग्गाणुसारित्तओ सुही चेव ।
परिणामो विन्नेओ सुहोहसण्णाणजोगाओ ॥१९३॥

माषतुषादीनां त्वागमप्रसिद्धजडसाधूनां पुनर्जीवाजीवादि-तत्त्वगोचर-व्यक्त-श्रुतोपयोगाऽभावेऽपि मार्गानुसारित्वतस्तीव्र - मिथ्यात्वमोहनीयक्षयोपशमभावात्, इह च मार्गश्चेतसोऽवक्रगमनं भुजंगमनलिकायामतुल्यो विशिष्ट - गुणस्थानाऽवाप्ति - प्रगुणः स्वरसवाही जीव-परिणतिविशेषस्तमनुसरति तच्छीलश्च यः स तथा तद्भावस्तत्त्वं तस्मात्, शुभश्चैव परिशुद्ध एव, व्यावृत्तविपर्यास दुःख एव परिणामो विशेषः ।

ननु मार्गानुसारित्वेऽपि बठरतया कथं तत्परिणाम-विशुद्धिरित्याशंक्याह - शुभौघसंज्ञानयोगात् शुभम-विपर्यस्तमोघेन सामान्येन सुबहुविशेषावधारणाक्षमं यत् संज्ञानं वस्तुतत्त्व-संवेदनरूपं तस्य योगात् । ते हि बहुश्रुतमपठन्तोऽपि अतिसूक्ष्मप्रज्ञतया बहु-पाठकस्थूलप्रज्ञपुरुषानुपलक्ष्यं तत्त्वमवबुध्यन्त इति ।

तदुक्तं -

'स्पृशन्ति शरवत्तीक्ष्णाः स्वल्पमन्तर्विशन्ति च ।
बहुस्पृशाऽपि स्थूलेन, स्थीयते बहिरश्मवत् ॥ १ ॥'
'एवं सामायिकाद्यर्थैर्विशक्तो गुरुभक्तितः ।
ज्ञानकार्यमसौ लेभे कालतः केवलश्रियम् ॥ १ ॥'

अथाऽमुमेव शुभौघसंतानयोगमेषां भावयन्नाह -
'रुद्दी खलु संसारो धम्मो तु ओसहमिमस्स ।
गुरुकुलसंवासे सो निच्छयओ णायमेतेणं ॥ १९९ ॥'
क्षुद्रो धर्म एव पंचनमस्कार - स्मरणादिरूप - औषधं
निर्वृत्तिहेतुरस्य संसारस्य । यथोक्तम् -
'पंचनमोक्कारो खलु, विहिदाणं सत्तिओ अ अहिंसा य।
इंदियकसायविजओ, एसो धम्मो सुहपओगो ॥ १ ॥'
इति ज्ञातमेतेन माषतुषादिना साधुजनेनाऽपि सता ।
- उपदेश पद

(२७६) आत्मसमदर्शित्व - दशवैकालिक चूर्णि, पृ०
यः समः सर्वभूतेषु त्रसेषु स्थावरेषु च ।
तपश्चरति शुद्धात्मा, श्रमणोऽसौ प्रकीर्तितः ॥
पृ०१५६: सव्वभूयप्पभूअस्स सम्मं भूयाइं पासओ ।
पिहिआसवस्स दंतस्स पावं कम्मं न बंधइ ॥ अ०४, गा०९
सर्वभूतेष्वात्मभूतः सर्वभूतात्मभूतो यः
आत्मवत् सर्वभूतानि पश्यति इत्यर्थः ।
तस्यैवं सम्यग् वीतरागोक्तविधिना
भूतानि पृथिव्यादीनि पश्यतः सतः -
'पिहितास्रवस्य', स्थगितप्राणातिपाताद्यास्रवस्य
'दान्तस्य' इन्द्रियनोइन्द्रियदमेन पापं कर्म न बध्यते ।

ॐ

(૨૭૭) <u>સાધુની ઉપમાઓ</u>

ઉરગ ગિરિ જલણ સાગર....

(१) उरगः सर्पः तत्समः परकृतालयनिवासादिति।
(२) गिरिसमः परीषहोपसर्ग - निष्प्रकम्पत्वात्।
(३) ज्वलनसमः तपस्तेजोमयत्वात्,
तृणादिष्विव सूत्रार्थेष्वतृप्तेः।
(४) सागरसमो ज्ञानादिरत्नाकरात् स्वमर्यादाऽनतिक्रमाच्च।
गुणरत्नपरिपूर्णत्वाद्ज्ञानादि गुणैरगाधत्वाद्वा।
(५) नभस्तलसमः सर्वत्र निरालम्बनत्वात्।
(६) तरुगणसमः सुखदुःखयोरदर्शित - विकारत्वात्।
(७) भ्रमरसमोऽनियत - वृत्तित्वात्।
(८) मृगसमो संसारभयोद्विग्नत्वात्,
संसारं प्रति नित्योद्विग्नत्वात्।
(९) धरणिसमः सर्वखेदसहिष्णुत्वात्, सर्वंसहत्वात्।
(१०) जलरुहसमः कामभोगोद्भवत्वेऽपि
पंकजलाभ्यामिव तदूर्ध्वं वृत्तेः। जलरुहसमः -
निष्पंकत्वात् पंकजलस्थानीयकामभोगोपरिवृत्तेरित्यर्थः।
(११) रविसमः धर्मास्तिकायादि लोकमधिकृत्या -
विशेषेण प्रकाशकत्वात्, तमोविघातकत्वात्।

ॐ

(१२) पवनसमश्च सर्वत्राऽप्रतिबद्धत्वात् ।
स एवंभूतः श्रमणो भवतीति गाथार्थः ।
उक्तोऽत्र - गुणविशिष्टश्च श्रमणस्तदा भवति यदा
शोभनं मनो भवेदिति दर्शयति - 'तो समणो' गाहा ।

(२७८) लाभशुद्धि - आवश्यक, मलयगिरि, पृ० ५८९
सामायिकस्य विधृतिं कृत्वा यदवाप्तमिह मया कुशलम् ।
तेन खलु सर्वलोको लभतां सामायिकं परमम् ॥

(२७९) मैत्र्यादि - धर्मसंग्रह, श्लो० ३, पृ० १
वचनादविरुद्धाद्यदनुष्ठानं यथोदितम् ।
मैत्र्यादिभावसंमिश्रं तद्धर्म इति कीर्त्यते ॥ ३ ॥
पुष्टिशुद्धिमच्चित्तं भावधर्मस्य लक्षणम् । पृ० १
तदनुगता क्रिया च व्यवहारधर्मस्य ।
शुद्धयनुष्ठानजन्या कर्ममलाऽपगमलक्षणा सम्यग्दर्शनादि
- निर्वाणबीजलाभफला जीवशुद्धिरेव धर्मः ।
यद्येहाविरुद्धवचनानुष्ठानादनुष्ठानं धर्म इति उच्यते,
तत्तूपचारात् । भावलक्षणस्य द्रव्ये उपचारेणैव संभवात् ।
अन्योन्यानुगतत्वं च तयोः तत्र तत्र प्रसिद्धमिति ।
तदयं परमार्थः -

निश्चयेनाऽनुपचरितं धर्मानुष्ठानं अप्रमत्तसंयतानामेव,
प्रमत्तसंयतादीनां त्वपेक्षया निश्चयव्यवहाराभ्यां,
अपुनर्बन्धकस्य तु व्यवहारेणैव, तेन सामान्यतो गृहिधर्मो
व्यवहारेणाऽपुनर्बन्धकापेक्षयैवेति स्थितं । पृ० १४, टिप्पणी

(२८०) करुणा - भावनाज्ञान

- धर्मबिन्दु, अ० ४, सू० ३०, टीका

करुणा च मार्गप्रभावना बीजम् ।

इत्युचितानुष्ठानमेव सर्वत्र श्रेय इति । ४ - २६

भावनासारत्वात् तस्येति । ४ - २७

टीका - भावना निरुपाधिको जीववासकः परिणामः तस्य
उचिताऽनुष्ठानस्य । इदमेव प्रधानं निःश्रेयसाङ्गं । ४ - २८

एतत्स्थैर्याद्धि कुशलस्थैर्योपपत्तेः । ४ - २९

भावनायाः स्थैर्यात्, हि स्फुटं,
कुशलानां सकलकल्याणाचरणानां उपपत्तेः घटनात् ।
भावनानुगतस्य ज्ञानस्य तत्त्वतो ज्ञानत्वात् । ४ - ३०

उपरागमात्रत्वात् । ४ - ३२

यादृशं भावनाज्ञानेन वस्तु दृश्यते
ज्ञायते च न तथा श्रुतज्ञानेनेति । ४ - ३१, टीका
एवं श्रुतमय्यां प्रज्ञायां आत्मनो बोधमात्रमेव बहिरङ्गं,
न त्वन्तः परिणतिः ।

श्रुतमय-प्रज्ञाप्रवृत्तावपि अपायेभ्यो अनिवृत्तेः ।
एतन्मूले हि हिताहितयोः प्रवृत्तिनिवृत्ती । ४-३४
एतन्मूले भावनाज्ञानपूर्विके एव,
चकारस्य एवकारार्थत्वात्, न अन्ये ज्ञानमूले इति ।
भावनामूलत्वादेव हिताहित-प्रवृत्तिनिवृत्त्योः,
भावनया दृष्टं ज्ञातं च वस्तु प्राप्य विपर्ययाऽयोगः-
विपर्यासाऽप्रवृत्तिलक्षणो जायते, यतो न मतिविपर्यास-
मन्तरेण पुंसो हितेषु अप्रवृत्तिः, अहितेषु च प्रवृत्तिः स्यात्,
न चाऽसौ भावनाज्ञाने समस्तीति ।

(२८१) जिनाज्ञानुं स्वरूप - ध्यानशतक, हारि० भा० पृ० ५९५
भूतहिता, भूताः प्राणिनः तेषां हितापथ्यम् ।
हितत्वं पुनः तदनुपरोधिनीत्वात्तथा हितकारिणीत्वाच्च
उक्तं च — 'सर्वे जीवा न हन्तव्या' इत्यादि,
एतत्प्रभावाच्च भूयांसः सिद्धा इति ।
तद्वन्तो हि दृष्टाऽपाययोगेऽपि अदृष्टापायेभ्यो
निवर्तमाना दृश्यन्ते एव अन्धरक्षादौ । ४-३६
इति मुमुक्षोः सर्वत्र भावनायामेव यत्नः श्रेयान् । ४-३७
तद्भावे निसर्गत एव सर्वथा दोषोपरतिसिद्धेरिति । ४-३८
वचनोपयोगपूर्वाविहित-प्रवृत्तिर्योनिरस्या इति ।
भावनायाः भावनाज्ञानस्य । ४-३९

(२८२) मैत्र्यादिनुं फल

ध्यायन्ति मैत्रीं सुखिनि दुःखिनि चाऽनुकम्पां
पुण्यक्रियेषु मुदितां कृपतानुपेक्षां ।
एवं प्रसादमुपयाति हि रागलोभद्वेषादि-
दोषकलुषोऽप्ययमन्तरात्मा ॥१॥

टीका माटे जुओ : २८४/३५२

कृष्णमिश्र यति कृत (प्रबोधचन्द्रोदय - नाटक)

सर्वे जीवा उपादेयाः शक्तिरूप-शिवात्मकाः ।
व्यक्तिरूपशिवस्तन्मोक्षाः पश्चादपि परमेष्ठिनः ॥२॥

- जिनमंडनगणि कृत धर्मपरीक्षा

(२८३) भावपरिणति (मुक्तिमां) - षोडशक १३, श्लो० ८

'एतासां भावपरिणतिः, विशिष्टस्वरूपलाभः, तस्यां सत्यां अन्ते - पर्यवसाने प्रकर्षप्राप्तौ मुक्तिः निर्वृत्तिः ।
तस्यां मुक्तौ नैताः सम्भवन्ति,
सांसारिकभावोत्तीर्णरूपत्वान्मुक्तेः ।'

(२८४) - विशेषावश्यक भाष्य, पृ० ७४, गा० १२३

यतः सर्वोऽपि पूर्वं विचिन्त्य वक्तव्यमर्थं चित्ते विकल्प्य पश्चात् शब्दं भाषते, यच्च तत् चिन्तासमानं तत् श्रुतानुसारित्वात् भावश्रुतम्,

ઇતિ ભાવશ્રુતપ્રભવતા દ્રવ્યશ્રુતસ્ય વિસ્તારતે।
શ્રુતાનુસારી વિચારણા - અનુપ્રેક્ષા એ ભાવશ્રુત છે.

(૨૮૫) ભાવસાધુ

એવં વિધો ભાવશ્રાવકઃ ક્રમેણ ચ ભાવસાધુત્વં પ્રાપ્નોતિ।
ભાવસાધુઃ —

નિર્વાણ-સાધકાન્ યોગાન્ યસ્માત્ સાધયતેઽનિશં।
સમશ્ચ સર્વભૂતેષુ, તસ્માત્ સાધુરુદાહૃતઃ ॥ ૧ ॥
ક્ષાન્ત્યાદિગુણસંપન્નઃ મૈત્ર્યાદિગુણભૂષિતઃ।
अप्रमादी सदाचारी भावसाधुः प्रकीर्तितः ॥ २ ॥

- શ્રી ધર્મરત્ન પ્રકરણ

(૨૮૬) મૈત્ર્યાદિ - તત્ત્વાર્થ ભાસ્કરાનન્દિ વૃત્તિ, अ० ७, सू० ११

'સ્વકાયવાઙ્મનોભિઃ કૃતાનુમતિકારિત-
વિશેષૈઃ પરેષાં દુઃખાનુત્પત્તૌ અભિલાષઃ
મિત્રસ્ય ભાવઃ કર્મ વા મૈત્રીતિ કથ્યતે।'

(૨૮૭) સમ્યક્ત્વ વ્યાખ્યા - ધર્મસંગ્રહ, પૃ० ३१, ગા० २२

જિનોક્તેષુ તત્ત્વેષુ જીવાજીવાદિપદાર્થેષુ યા
શુદ્ધા - અજ્ઞાનસંશયવિપર્યાસનિરાકરણેન નિર્મલ-
રુચિઃ - શ્રદ્ધાનં સા સમ્યક્ત્વમુચ્યતે જિનૈઃ।
નનુ ઇત્થં તત્ત્વાર્થશ્રદ્ધાનં સમ્યક્ત્વમિતિ પર્યવસન્નં,
તત્ર શ્રદ્ધાનં ચ તથેતિ પ્રત્યયઃ, સ ચ મનસોઽભિલાષઃ,

न चाऽयं अपर्याप्तकाद्यवस्थायामिष्यते, सम्यक्त्वं तु
मिथ्यात्वक्षयोपशमादिजन्यः शुभ आत्मपरिणामविशेषः।
आह च - 'से अ संमत्ते पसत्थसंमत्तमोहणीय-
कम्माणुवेअणोवसमखयसमुत्थेपसमसंवेगाइलिंगे
सुहे आयपरिणामे पन्नत्ते ।'
इदं च लक्षणं अमनस्केषु सिद्धादिषु अपि व्यापकम्।
इत्थं च सम्यक्त्वे सत्येव उक्तं श्रद्धानं भवति ।
दुःखसाधनं नरकाद्यनुबंधि ।
उक्तश्रद्धाने च सति सम्यक्त्वं भवत्येवेति ।
श्रद्धानवतां सम्यक्त्वस्यावश्यं भावित्वोपदर्शनाय कार्ये
कारणोपचारं कृत्वा तत्त्वेषु रुचिरित्यस्य तत्त्वार्थ
श्रद्धानमित्यर्थपर्यवसानं न दोषाय । तथा चोक्तं -
'जीवाइ नवपयत्थे जो जाणइ तस्स होइ सम्मत्तं ।
भावेण सद्दहंतो, अयाणमाणेवि सम्मत्तं ॥१॥'
नन्वेवमपि शास्त्रान्तरे तत्त्वत्रयाऽध्यवसायः सम्यक्त्वमुक्तं,
यतः 'अरिहं देवो गुरुणो सुसाहुणो जिणमयं पमाणं य।
इच्चाइ सुहो भावो सम्मत्तं बिंति जगगुरुणो ॥१॥
इति कथं न शास्त्रान्तरविरोधः, इति चेन्न-
अत्र प्रकरणे जिनोक्ततत्त्वेषु रुचिरिति

ॐ

इतिश्रावकाणां साधारणं सम्यक्त्वलक्षणं उक्तं,
शास्त्रान्तरेषु गृहस्थानां देवगुरुधर्मेषु पूज्यत्वोपास्य-
-त्वानुष्ठेयत्वलक्षणोपयोगवशात् देवगुरुधर्मतत्त्व
प्रतिपत्तिलक्षणं सम्यक्त्वं प्रतिपादितं, तत्राऽपि देवा
गुरवश्च जीवतत्त्वे, धर्मः शुभास्रवे संवरेचाऽन्तर्भवति
इति न शास्त्रान्तरविरोधः ।

(२८८) परोपकारिता: - धर्मबिन्दु, अ० ६, सू० ३९, टीका
परहितविधातस्य, सर्वजगज्जीवजातहिताधानस्य ।
प्रधानपरिणतेः, सर्वोत्तमात्मपरिणामस्य ।
परमसत्त्वार्थकर्तुः - निर्वाणाऽवन्ध्यबीज-सम्यक्त्वादि-
सत्त्वप्रयोजनविधातुः ।
सामायिक व्रतः - माध्यस्थ्यगुणतुलारोपणवश-
समतोपनीतस्वजनपरजनादिभावस्य ।

(२८९) भावणाजुं लहिऊण - पासनाहचरियं, पृ० ४६०
भाविज्जइ वासिज्जइ जीए जीवो विसुद्धचेट्ठाए
सा भावणत्ति वुच्चइ नाणाइगोयरा बहु(वि)हा ।

योगशास्त्र सम्यक्त्वाधिकार

शमः प्रकृत्या, कषायपरिणतेः कटुकफलावलोकनात् ।

चैत्यवंदन कुलक वृत्ति —

उपशमः मिथ्याभिनिवेशव्यावृत्तिरूपः ।

(૨૯૦) ભૂતાનુકંપા - તત્ત્વાર્થ, અ૦ ૬, પૃ૦ ૨૫

भूतानुकम्पा सद्वेद्यास्रवः ।

अध्वाऽनुग्रहबुद्ध्या आर्द्रीकृतचेतसः

परपीडाऽऽत्मसंस्थामिव कुर्वतो अनुकम्पनं ।

(૨૯૧) દયાળુ : - ધર્મરત્ન, પૃ૦ ૧૪

दयावत एव दयालुः स सुखेन ईर्यासमिति-

प्रत्युपेक्षणादौ प्रवर्तते अतो धर्मयोग्यो भवति ।

दयालुकः कृपावान् समस्तप्राणिषु ।

(૨૯૨) ભાવનાનું બહુમાન એ સાવધાન કરાવે.

बीआहाणं इह भावणाए उ होइ बहुमाणो ।

टीका - 'बहुमानः उपादेयत्वसमानश्रद्धाजनितः

प्रमोदोऽनुमोदनाख्यः ।' - ઉપદેશ રહસ્ય, ગા૦ ૨૮

(૨૯૩) અધ્યાત્મ - ઉપદેશ પદ, ગા૦ ૨૦૨, ટીકા પૃ૦ ૩૫૯

'शुद्धाशयोगाद् अध्यात्मं उक्तरूपं (औचित्यादिवृत्तियुक्तस्य)

सदा सर्वकालं संजायते, न पुनरन्यथाऽपि,

तस्य तदेककारणत्वात् ।'

विशुद्धात्मा = નિરાગ્રહી, स्थिराशयः = નિઃશંક.

विशुद्धो धर्मः - निरतिचारः ।

धर्मभिन्नं सर्वं स्रक्चन्दनाऽङ्गनालिंगनादिकम् ।

ૐ

(૨૯૪) ક્ષયોપશમ ભાવ

- કર્મપ્રકૃતિબન્ધનકરણ, પૃ.૨૪ (મલયગિરિ)

જ્ઞાનાવરણદર્શનાવરણાન્તરાયાણામુદયેऽપિ
ક્ષયોપશમોऽવિરુદ્ધ ઇતિ સ્થિતમ્ ।

દેશઘાતી અથવા સર્વઘાતી પ્રકૃતિઓના જે ૪ ઠાણિયા અને
૩ ઠાણિયા રસવાળા સ્પર્ધકો તે નિયમા સર્વઘાતી હોય છે.
૨ ઠાણિયા રસવાળા સર્વઘાતી પ્રકૃતિઓના સર્વઘાતી હોય છે.
દેશઘાતી પ્રકૃતિના દ્વિસ્થાનક રસવાળા સ્પર્ધકો
કેટલાક સર્વઘાતી તો કેટલાક દેશઘાતી હોય છે.
એકસ્થાનક રસવાળા સ્પર્ધકો દેશઘાતી
પ્રકૃતિઓના જ હોય છે અને તે દેશઘાતી હોય છે.
દેશઘાતી એવા અવધિજ્ઞાનાવરણાદિના સર્વઘાતી રસસ્પર્ધકો
જ્યારે વિશુદ્ધ અધ્યવસાય વડે દેશઘાતી કરવામાં આવે,
અતિ સ્નિગ્ધ દેશઘાતીરસ સ્પર્ધકો જ્યારે
અલ્પરસવાળા કરાય અને તેમાંથી કેટલોક રસ
સ્પર્ધક ભાગ ઉદયાવલિકામાં પ્રવેશીને ક્ષય થાય
અને શેષનો વિપાકોદય વિષ્કંભરૂપ ઉપશમ થાય,
ત્યારે જીવને અવધિ, મનઃપર્યવ અને
ચક્ષુદર્શનાદિ ક્ષાયોપશમિક ગુણો પ્રાપ્ત થાય છે,

તે વખતે અવધિજ્ઞાનાવરણાદિના કેટલાક દેશઘાતી રસ સ્પર્ધકોના ક્ષયોપશમથી અને કેટલાક દેશઘાતી રસ સ્પર્ધકોના ઉદયથી ક્ષયોપશમાનુવિદ્ધ ઔદયિક ભાવ પ્રાપ્ત થાય છે.

મતિશ્રુતાવરણચક્ષુર્દર્શનાવરણ અંતરાય પ્રકૃતિઓના
દેશઘાતી રસ સ્પર્ધકોનો જ ઉદય હોય,
સર્વઘાતી રસ સ્પર્ધકોનો ઉદય ન હોય,
તેથી તેમનો સદા ઉદયાનુવિદ્ધ ક્ષયોપશમ હોય.

मोहनीयस्य तु अनन्तानुबन्ध्यादि प्रकृतीनां प्रदेशोदये
क्षायोपशमिको भावोऽविरुद्धो न विपाकोदये,
यतोऽनन्तानुबन्ध्यादिप्रकृतयः सर्वघातिन्यः,
सर्वघातिनीनां च रसस्पर्द्धकानि सर्वाण्यपि
सर्वघातिन्येवेति तेषां विपाकोदये न क्षयोपशमसंभवः,
किन्तु प्रदेशोदये । मिथ्यात्वाद्यद्वादशकषायरहितानां
शेष - मोहनीयप्रकृतीनां तु प्रदेशोदये विपाकोदये वा
क्षयोपशमोऽविरुद्धस्तासां देशघातित्वात्,
परं ताः प्रकृतयोऽध्रुवोदया इति तद्विपाकोदयाभावे
क्षायोपशमिकभावे विजृम्भमाणे प्रदेशोदयवत्योऽपि ता
न मनागपि देशविघातिन्यः । विपाकोदये तु प्रवर्तमाने
क्षायोपशमिकभावसंभवे मनाग् मालिन्यकारित्वात्
देशघातिन्यो भवन्तीति कृतं प्रसंगेन ।

(૨૯૫) બાહ્યાત્મ - અંતરાત્મ - પરમાત્મલક્ષણ

- શ્રી જિનમંડનગણિ કૃત ધર્મપરીક્ષા, પૃ.૧૩

भव्ये मिथ्यादृशि क्षाप !

बाह्यात्मा व्यक्तिरूपतः ।

अन्तरात्मद्वितयं शक्तिरूपेणान्तर्व्यवस्थितम् ॥ ५४ ॥

अभव्ये व्यक्तिरूपेण पूर्वात्मा तद्द्वयं पुनः ।

केवलं वर्तते शक्तिरूपेण व्यक्तितो न तु ॥ ५५ ॥

બપ્પભટ્ટસૂરિનું વિંશિકા, પૃ.૧૧

'क्षीरनीरोपमां मैत्रीं भजन्तो भुवनाद्भुताम् ।'

○ बाह्यात्मा सर्वथा हेयः कषायविषयाकुलः ।

सम्यग्दृगन्तरात्मा स्यादुपादेयः सुखप्रदः ॥ ५९ ॥

ध्रुवं साक्षादुपादेयः परमात्मा वीतकश्मलः ।

साम्यामृतार्णवमग्नैर्ध्येयोऽसौ मुक्तिहेतवे ॥ ६० ॥

सर्वे जीवा उपादेयाः शक्तिरूपशिवात्मकाः ।

व्यक्तिरूपोल्लसन्मोक्षाः पञ्चाऽपि परमेष्ठिनः ॥ ६१ ॥

तत्राऽपि सर्ववित् सिद्धद्वयमेव गुणोत्तरम् ।

ततोऽपि निष्प्रकम्पध्यानाद् ध्यातव्यः सिद्ध एव हि ॥ ६२ ॥

परमार्थेन निःशेषभोगकांक्षादिवर्जितैः ।

सिद्धात्मकः स्व आत्मैव विकल्पातीतचेतसा ॥ ६३ ॥

एवं हि देवतातत्त्व-प्रणिधानपुरस्कृत: ।
संन्यास: क्रियमाण: स्यान्महोदय फलप्रद: ॥ ६४ ॥
अवधीरितचैतन्यदेवतोपासनात्मक: ।
राज्यैश्वर्यादिसंन्यास: प्राय: पुंसां विडम्बना ॥ ६५ ॥

(२९६) ध्याता - ध्येय - ध्यान

- वीतरागस्तोत्र, प्रकाश १४, श्लो. ८, टीका

ध्याता क्षपकश्रेण्यारूढ:, ध्येयं षड्जीवनिकायहितं परमात्मतत्त्वं, ध्यानं च ध्येयविषया एकप्रत्ययसन्तति: ।

(२९७) पंचपरमेष्ठि नमस्कार - विशेषावश्यक भाष्य, गा.५

कय पंचनमोक्कारस्स दिन्ति सामाइयाइं विहिणा ।
आयारमाइयाइं कमेण तो सेसयसुयंपि ॥ १ ॥

ચોથી ગાથામાં કહ્યું કે આવશ્યકનું પ્રદાન યોગ્ય જીવને કરવું. ભવ્ય, મોક્ષમાર્ગાભિલાષી, ગચ્છ ઉપદેશમાં સ્થિત તે યોગ્ય છે. આવા યોગ્યને પહેલા પંચપરમેષ્ઠિને નમસ્કાર કર્યા બાદ સામાયિકાદિ સૂત્રનું પ્રદાન કરવું, એમ આ ગાથામાં કહ્યું છે.

(२९८) अभयदान

'दानान्तरायस्य अत्यन्तक्षयात्
अनन्तप्राणिगणानुग्रहकरं क्षायिकं अभयदानं ।'

- सर्वार्थसिद्धि टीका, अ. २, सू. ४

(૨૯૯) ધમ્મદયાણં

- લલિતવિસ્તરા, 'ધમ્મદયાણં।' પદની ટીકા

'સાધુધર્મઃ પુનઃ સામાયિકાદિગતવિશુદ્ધક્રિયાભિવ્યંગ્યઃ સકલસત્ત્વહિતાશયામૃતલક્ષણઃ સ્વપરિણામ એવ, ક્ષાયોપશમિકાદિભાવસ્વરૂપત્વાદ્ધર્મસ્ય।'

(૩૦૦) ઈશ્વરાનુગ્રહ

- લલિતવિસ્તરાધ્યાય, પૃ. ૧૯, પંજિકાપંક્તિ ૮

'ભવ્યજીવ ધર્મપ્રવર્તકત્વેન યોગ્યજીવ ધર્માવતારકત્વેન પરમ્પરાનુગ્રહકરાઃ પરમ્પરયા વ્યવધાનેનાનુગ્રહકરાઃ ઉપકારકરાઃ, કલ્યાણાભિવ્યક્તા લક્ષણો હિ જીવાનાં સ્વપરિણામ એવ ક્ષાયોપશમિકાદિરનન્તરમનુગ્રહહેતુઃ, તદ્ધેતુતયા ચ ભગવન્તો અથવા પરમ્પરયા - અનુબન્ધેન સ્વતીર્થાનુવૃત્તિકાલં યાવત્ સુદેશત્વસુખાનુષક્ત્યાદિ - કલ્યાણલાભલક્ષણયા વાઽનુગ્રહકરા ઇતિ।'

લલિતવિસ્તરાધ્યાય, પૃ. ૨૨, 'પુરિસુત્તમાણં।'ની ટીકા

નાઽશુદ્ધમપિ જાત્યરત્નં સમાનમજાત્યરત્નેન, ન ચેતરદિતરેણ, તથાસંસ્કારયોગે સત્યુત્તરકાલમપિ તદ્ભેદોપપત્તેઃ, ન હિ કાચઃ પદ્મરાગી ભવતિ, જાત્યનુચ્છેદેન ગુણપ્રકર્ષાભાવાત્।

ललितविस्तरायाम्, पृ० २२, 'पुरिससिंहाणं।' ની ટીકા

सम्यक्शुभभावप्रवर्त्तकमितरनिवर्त्तकं च वचनं
सत्यमसत्यं वा निश्चयतः सत्यं..... पुरुषसिंहेभ्यः।

(३०१) કૃતજ્ઞતા અને પરોપકાર : धर्मरत्न प्रकरण

दो पुरिसे धरउ धरा, अहवा दोहिं वि धारिया वसुहा।
उवयारे जस्स मई, उवयरियं जो न पम्हुसइ ॥१॥

(३०२) પ્રમોદભાવનાનું ફળ, મલયગિરિ, આવશ્યક પૃ૦ ૩૮૧

શાલ મહાશાલ પ્રમોદભાવના ભાવતાં કેવળજ્ઞાન પામ્યા.

(३०३) શુદ્ધાશય - विंशतिविंशिका प्रकरणम्।

यद्यपि खलजनस्य पीडारूपदोषोऽत्र
तथापि सज्जनपरितोषात् अत्र प्रवृत्तिः,
शुद्धाशयपूर्वकप्रवृत्तेः निर्दोषत्वात्।

तत्व विशेषणानं - मध्यस्थतया, सुबुद्धियोगात्,
अर्थितया च, गुणगुरुसेवा, सम्यग्विनयः,
तदर्थकरणं शक्त्यनुरूपेण साधूनां अनाथानां च।

(३०४) અનાદિલોક - લોકની સિદ્ધિ

(१) अनादिविंशिका। लोकः पञ्चास्तिकायमयः
अनादिमान्, न परमपुरुषादिकृतः, अत्र प्रमाणं वचनं।
धर्माधर्माकाशा गतिस्थित्यवगाहलक्षणाः,

ॐ

उपयोगहेतो जीवः, पुद्गला मूर्ताः अनादिनिधनाः,
स्वभावत एव तेषां परत्र न कार्यकारणभावः।
न परमपुरुष-प्रभवा, प्रयोजनाभावात्, दत्ताभावात्
तत्स्वाभाव्यात्। न च भगवान् भावाभावकारणस्वभावो
सर्वाभिलषितसिद्ध्या, अन्यथा, भक्तिमात्रं तु,
केवलं एव धर्माधर्मनिमित्तं भवति
अन्यथा, सत्वाक्रोशादि सर्वमत्र विफलं भवेत्।
आशयविशेषादेव गुणदोषभावात्,
धर्मादिरहितोऽपि धर्मादि निमित्तं।
अनादिमान् एव शुद्धिः प्रवाहतः बंधवत्,
भव्यत्वं अकृतं तथापि न नित्यं तथास्वाभाव्यात्।
एवं कृतकोऽपि मोक्षः नित्यः भाववैचित्र्यात्।
दीदृक्षा भवबीजं, वासना, अविद्या,
सहजमलं एतत् पुनः कर्मतरानुबंधयोग्यतारूपं।
एवं लोकः अनादिमान् तथासिद्धत्वात्।
(३०५) सामायिकं गुणानामाधारः खमिव सर्वभावानां।
न हि सामायिकहीनाश्चरणादि-गुणान्विता येन ॥ १ ॥
तस्माज्जगाद भगवान् सामायिकमेव निरुपमोपायम्।
शारीरमानसानेकदुःखनाशस्य मोक्षस्य ॥ २ ॥

(२०६) सम्मत्ती सदा ज्ञानी: अनुयोगद्वार, सू० ५९, पृ० ४०
- विशेषावश्यक भाष्य, पृ० १९०, गा० ३२० टीका

ततश्च यद्यपि सर्वः सम्यग्दृष्टिरित्थं
सर्वं सर्वमयं वस्तु न जानाति,
तथापि यथोक्तागमश्रद्धानद्वारेण भावतो जानात्येवेति।
अतः सर्वदैवाऽयं ज्ञानी भण्यते,
केवलिदृष्टयथावस्थित-स्वरूपस्य प्रमाणताऽभ्युपगमद्वारेण
सर्वदैव तेन ज्ञायमानत्वात्।
एगं जाणं सव्वं जाणइ सव्वं च जाणमेगं ति।
इय सव्वमयं सव्वं सम्मद्दिट्ठिस्स जं वत्थु ॥३२०॥
अक्षरार्थस्तूच्यते-एकं वस्तु जानन् सर्वं वस्तु जानाति,
सर्वं च वस्तु जानन्नेकं जानातीति
'एवंभूतमागमं सम्यग्दृष्टिस्तावत्
सर्वदैव प्रमाणतयाऽभ्युपगच्छति' इति शेषः।
इत्येतः परमाण्वादिकं यत् किमपि वस्त्वस्ति,
तत्सर्वमप्युक्तन्यायेन स्वपरपर्यायैः
सर्वमयं सम्यग्दृष्टिज्ञानगोचरः। अतः सर्वदैवाऽयं
ज्ञानी भण्यते, जाग्रतः, स्वपतः, तिष्ठतः, चलतश्चाऽस्य
परमगुरुप्रणीत-यथोक्तवस्तुस्वरूपाभ्युपगमस्य चेतसि
सर्वदैवाऽविचलनात्। इति गाथार्थः।

ॐ

(૩૦૭) ધર્મનું સ્વરૂપ - શ્રી પાર્શ્વનાથ ચરિત્રં, પત્રાંક ૪

धर्मः - मोक्षपुरपंथः । समग्रकल्याणकुलगृहं ।
दुःखदुर्गतिदुष्कर्मनाशकः ।
मनोवांछितदायकः - दानादि भेदात् चतुर्धा ।
दानं - दान, अभय - धर्मोपष्टंभदानं ।

(૩૦૮) ભવ્યોનું પ્રયોજન - તત્ત્વાર્થ અ૦ ૫, સૂ૦ હારિભદ્રી ટીકા

'तथाभव्यत्वाक्षिप्ता हिताहितनिमित्तता
जीवानां प्रयोजनम् ।' આ પંક્તિ રહસ્યભૂત, માર્મિક અને ગંભીર વિચારણાને યોગ્ય છે.

ઉપદેશપદમાં તથાભવ્યત્વની સંકલના

'भव्यत्वादीनामपि आविर्भावकारणं कल्याणमित्रयोगः, कल्याणमित्रयोगकारणं च अनघ (पुण्यानुबन्धि) कर्म परिणामः, अनघपरिणामकारणं च तथाभव्यत्वं, सिद्धिगमनयोग्यत्वं - भव्यत्वं, तदेव द्रव्यक्षेत्रादि भेदेन विचित्रं, जीवानां बीजाधानहेतुः तथाभव्यत्वं । अनन्तर - परम्परादि - भेदफलहेतुः जीववीर्योल्लासस्वरूपचरम-पुद्गलपरावर्तवश-समुन्मीलित-पुरुषकारः, तेन उक्तम् ।

'कल्याणमित्रयोगः सर्वानुचितनिरोधेन
उचितप्रवृत्ति - असाधारणकारणम् ।'

ૐ

(૩૦૯) ધર્મનું સ્વરૂપ

- ધર્મપરીક્ષા, જિનમંડનગણિ કૃત પ્રારંભ ગાથા

સુહ પરિણામ-નિમિત્તો સામન્ન વિસેસઓ હવઇ ધમ્મો ।
સામન્નેણં ગિહિણો સંપણુટ્ઠાણંમિ પડિવત્તી ॥ ૧ ॥

તથા આત્મવત્ પરમહિતચિન્તનં,
શક્તિતસ્ત્યાગતપસી, ચ કુશલવૃત્તિ ધર્માધિગમોપાયાः,
એતે આમુષ્મિક સમ્યક્ધર્મસ્ય
હેતુતયા ધર્મો અભિધીયન્તે ।

ધમ્મસ્સ કારણાइं જીવદયાદાણપૂયણાइणि ।
સુહભાવજણણહેઉ ઉવયારેણં હવઇ ધમ્મો ॥ ૧ ॥

(૩૧૦) સામાયિકનું બહિરંગ અને અંતરંગ સ્વરૂપ

- શ્રી જિનમંડનગણિ કૃત ધર્મપરીક્ષા, શ્લોક ૨૫, પૃ૦ ૮

સાવદ્યવ્યાપૃતિત્યાગાત્ સામાયિકવ્રતં મતં ।
સર્વાંગિસમતારૂપં વિધેયં સન્ધ્યયોર્દ્વયોઃ ॥

આ શ્લોકમાં સામાયિકનું બહિરંગ અને
અંતરંગ સ્વરૂપ બતાવ્યું છે.

(૧) બહિરંગ સ્વરૂપ - સાવદ્ય વ્યાપારનો ત્યાગ.
(૨) અંતરંગ સ્વરૂપ - સર્વ જીવો પ્રત્યે સમતા.

(મંત્રભાવાત્)

(૩૧૧) પુણ્ય (પ્રશસ્ત મોહ-રાગ) - તત્ત્વાર્થ અ૦ ૮, સૂ૦ ૨૬

'सद्वेद्य - सम्यक्त्व - हास्यरतिपुरुषवेद -
शुभायुर्नामगोत्राणि पुण्यम् ।' - સિદ્ધસેનીય ટીકા

सम्यक्त्ववेदनीयं तत्त्वार्थश्रद्धानाकारेणानुभवनीयम्, तदपि केवलिश्रुतसंघधर्मदेवानां वर्णवादादिहेतुकम् ।
वर्णः कीर्तिः, यशः सद्भूतगुणोद्भावनं,
भक्तिः, पूजा, पर्युपासनम् आदिग्रहणात्,
ते हेतवो यस्य तत् तद्धेतुकम् । xxx

शुभायुर्नामगोत्राणि सद्वेद्यं चेति चेन्मतं ।
सम्यक्त्वादि तद्भेदोऽस्तु प्रसादनमिहात्मनः ॥ ३ ॥
पुण्यं प्रीतिकरं सा च सम्यक्त्वादिषु पुष्कला ।
मोहत्वं तु भवाबन्धकारणादुपदर्शितम् ॥ ४ ॥
मोहीरागः स च स्नेही, मोहीरागः स चाऽहीति ।
रागस्यास्य प्रशस्तत्वात् मोहत्वेन न मोहता ॥ ५ ॥

(૩૧૨) પ્રશસ્ત દાન સદૃષ્ટાંત - દાનવિંશિકા, ગા૦ ૧૮

'ता एयंपि पसत्थं तित्थयरेणावि भयवया गिहिणा ।
सयमाइण्णं दिन्नेव दूसदाणेणऽगिहिणावि ॥

શ્રી પંચસૂત્ર, સૂત્ર ૩ : 'एस धम्मो सयाणं । भगवं इत्थं नायं, परिहरमाणे अकुसलाणुबंधि अम्मापिइसोगंति ।'

(૩૨૩) ધર્મના સર્વ અનુષ્ઠાનો ધ્યાનયોગ માટે જ વિહિત છે.

- શ્રી ઉપમિતિ, પ્રસ્તાવ ૮, પૃ૦ ૭૫૬, શ્લોક ૭૨૪ - ૩૦

भदन्त ! द्वादशांगस्य विस्तीर्णस्यैददेरिव ।
भगवद्भाषितस्यास्य, किं सारमिति कथ्यताम् ॥
समन्तभद्रगुरुभिस्ततः प्रोक्तमिदं वचः ।
"आर्य ! सारोऽत्र विज्ञेयो, ध्यानयोगः सुनिर्मलः ॥
यतः - मूलोत्तरगुणाः सर्वे सर्वा चेयं बहिष्क्रिया ।
मुनीनां श्रावकाणां च, ध्यानयोगार्थमीरिताः ॥
तथाहि - मनःप्रसादः साध्योऽत्र मुक्त्यर्थं ध्यानसिद्धये
अहिंसादिविशुद्धेन, सोऽनुष्ठानेन साध्यते ॥
अतः सर्वमनुष्ठानं, चेतः शुद्ध्यर्थमिष्यते ।
विशुद्धं च यदेकाग्रं, चित्तं तद्ध्यानमुत्तमम् ॥
तस्मात् सर्वस्य सारोऽस्य द्वादशांगस्य सुन्दर !
ध्यानयोगः परं शुद्धिः, स हि साध्यो मुमुक्षुणा ॥
शेषानुष्ठानमप्येव यत्तदंगतया स्थितम् ।
मूलोत्तरगुणाढ्यं तत् सर्वं सारमुदाहृतम् ॥"

(૩૨૪) ધ્યાનના અધિકારી તથા અનુષ્ઠાનો -

शुद्धानुष्ठानविकलं ध्यानं यद्दुष्टशीलिनः ।
ध्यायन्ति तद्वचो मात्र नाऽस्थाकारि विवेकिनाम् ॥

ॐ

यतोऽत्र तण्डुलस्येव जीवस्य तुषसन्निभे ।
शुद्धि मले सदाचार ध्यानाद्बोधिसमेतरः ॥
यः पुनर्मलिनारम्भी बहिर्ध्यानपरो भवेत् ।
नाऽसौ ध्यानाद्भवेच्छुद्धः सतुषस्तण्डुलो यथा ॥
- પૃ૦ ૧૬૨, શ્લોક ૮૦૯ - ૧૧

एवं च स्थिते - यद्रागद्वेषमोहानां प्रतिपक्षतया स्थितम् ।
सत्यं भूतदया ब्रह्म शौचमिन्द्रियनिग्रहः ॥
औदार्य - सुन्दरं वाच्यमाकिंचन्यमलोभता ।
गुरुभक्तिस्तपो दानं ध्यानमन्यच्च तादृशम् ।
आस्तिकेष्वपि तीर्थेषु तत्स्वरूपेण सुन्दरम् ॥
किन्तु नो राजते तेषु यथा याचितभूषणम् ॥
- પૃ૦ ૧૬૧, શ્લોક ૮૦૨ - ૩ - ૪

(૩૩૫) મૈત્ર્યાદિ ભાવના અહિંસાના સ્તંભભૂત છે.

(૧) યોગદૃષ્ટિ સમુચ્ચય પૃ૦ ૬

વર્ષોલક*ની નિષ્પત્તિમાં ઇક્ષુરસાદિ સદૃશ ૮ દૃષ્ટિઓ છે.
ઇક્ષુરસ, કક્કબ તથા ગુડ વગેરેમાં જેમ અનુક્રમે માધુર્ય
વધતું જાય છે, તેમ આ આઠ દૃષ્ટિઓમાં પણ ક્રમશઃ
સંવેગ અને માધુર્ય વધતાં જાય છે.
વળી આઠ દૃષ્ટિઓ ઇત્યાદિ વિષયક છે.

*સાકર

અહીં સંયોગ (મોક્ષાભિલાષ) તે પ્રમોદભાવરૂપ છે અને માધુર્ય તે મૈત્રીભાવરૂપ છે.
અભવ્યને સંયોગ અને માધુર્ય હોતાં નથી, તેથી તેને આઠ પૈકી એક પણ દૃષ્ટિ હોતી નથી.
(૨) પક્ખીસૂત્રમાં કેવલિપ્રરૂપ્ત ધર્મના વિશેષણો કહ્યાં છેઃ 'अहिंसालक्खणस्स, खंतिपहाणस्स, विणयमूलस्स ।' વગેરેમાં મૈત્રી - પ્રમોદ - કરુણાદિ ભાવનાઓ ગર્ભિતપણે રહેલા છે. મૈત્રીભાવશૂન્ય અહિંસા એ દ્રવ્ય અહિંસા બનશે, ભાવથી નહિ.
અહિંસા એ ધર્મનું લક્ષણ છે અને મૈત્રી તેનો પ્રાણ છે.
(3) ઉપમિતિ પ્ર૦ ૭, પૃ૦ ૬૫૬, શ્લોક ૬૪૪
मैत्रीकारुण्यमाध्यस्थ्यप्रमोदोद्दामभावना।
यदा मौलिकतानं तत् तदा ते परमं सुखम् ॥
(૪) પંચસૂત્ર: धम्मो एयस्स ओसहं, एगंत विसुद्धे, महा-पुरिससेविओ, सव्वहिअकारी, निरइयारो, परमाणंदहेऊ। ટીકામાં 'सव्वहिअकारी मैत्र्यादिरूपतया।' એમ કહ્યું છે.
(૫) अत्यद्भुतं इदं अर्हद्दर्शनं, यतोऽत्र तिष्ठन्ति ये लोकास्ते सर्वेऽपि सुहृद इव xxx समस्त जन्तुसंघातहितोद्यत-चेतसश्च सकलकालं दृश्यन्ते। ઉપમિતિ પૃ૦ ૫૬, પંક્તિ ૯થી

(૬) શ્રી ભાવદેવસૂરિ કૃત પાર્શ્વનાથ ચરિત્ર

मैत्री परहिते चिन्ता, परार्तिच्छेदधीः कृपा ।

मुदिता सद्गुणे तुष्टिर्माध्यस्थ्यं पाप्युपेक्षणम् ॥

(૭) મોક્ષ રૂપી કાર્ય થવામાં નીચેની ચતુર્ભંગી છે:

૧ ઉપાદાન સત્ય (ભવ્ય) - નિમિત્ત સત્ય (અરિહંત)

૨ ઉપાદાન સત્ય (ભવ્ય) - નિમિત્ત અસત્ય (સરાગી દેવ)

૩ ઉપાદાન અસત્ય (અભવ્ય) - નિમિત્ત સત્ય (અરિહંત ")

૪ ઉપાદાન અસત્ય (અભવ્ય) - નિમિત્ત અસત્ય.

(૩૩૬) (૮) જિનેન્દ્ર એ જ મોક્ષમાં પુષ્ટહેતુ છે.

पुष्टहेतुर्जिनेन्द्रोऽयं मोक्षस्वभावसाधने । - સિદ્ધસેનસૂરિ

શ્રી દેવચંદ્રજી કૃત સ્તવન - ૨૦ની ગાથા ૩નો ટબો

નિમિત્ત કારણ બે પ્રકારનાં છે: પ્રધાન અને અપ્રધાન.

જેમાં જે વસ્તુ હોય અને કારણ બને,

તે પ્રધાન નિમિત્ત કારણ છે.

જે કારણમાં કાર્ય ન હોય અને તે કાર્ય પ્રત્યે જો કારણ બનતું હોય, તે અપુષ્ટ નિમિત્ત કારણ કહેવાય.

શ્રી દેવચંદ્રજી કૃત સંભવનાથ સ્તવનમાં કહ્યું છે કે:

'ઉપાદાન આતમ સહી રે, પુષ્ટાલંબન દેવ, જિનવર પૂજો

ઉપાદાન કારણપણે રે, પ્રગટ કરે પ્રભુસેવ, જિનવર પૂજો,

ૐ

કાર્ય ગુણ કારણપણે રે, કારણ કાર્ય અનૂપ, જિનવર પૂજો,
સકલ સિદ્ધતા તાહરી રે, માહરે સાધનરૂપ, જિનવર પૂજો.'

આત્મા ઉપાદાન તરીકે તો હતો જ,
પરન્તુ જ્યારે પુષ્ટાલંબનરૂપ પ્રભુ મળે છે અને તેમનું
આલંબન લઈ જાપ, સેવા, આજ્ઞાપાલન આદિ કરે છે,
ત્યારે જ તે ઉપાદાન કારણપણે પરિણમે છે અને
તેમાંથી સિદ્ધત્વરૂપી કાર્યની ઉત્પત્તિ થાય છે.
પ્રભુની સિદ્ધતા એ કાર્ય છે, તે સાધકને
કારણપણે બનીને સાધકમાં સિદ્ધતા પ્રગટ કરે છે.
આમાં ઉપાદાન અને નિમિત્ત બંનેની હાજરી છતાં
પ્રધાનતા નિમિત્તની જ વર્ણવી છે.
કેવળ ભક્તિ જગાડવા જ નિમિત્તની પ્રધાનતા વર્ણવી છે,
એમ નહીં પણ નિમિત્તના અભાવમાં
ઉપાદાન પોતે કારણપણે પરિણમતું નથી.
ઉપાદાનને કારણપણે પરિણમાવવામાં નિમિત્ત સાધનરૂપ
હોવાથી નિમિત્તની મુખ્યતા આપોઆપ થઈ જાય છે
અને તેથી જ ભક્તિ જાગે છે.
નિમિત્ત વિના જ ઉપાદાન પોતે કારણપણે પરિણમતું
હોત તો આ ભક્તિને માત્ર ઔપચારિક કહી શકાત,

પરન્તુ કાર્ય - કારણના નિયમ પ્રમાણે નિમિત્ત એ
સાધ્યના સાધનરૂપ હોવાથી તેનો ઉપકાર/અનુગ્રહ પ્રધાન છે.

એજ સ્તવનની પાંચમી ગાથામાં કહ્યું છે કે:
'એકવાર પ્રભુવંદના રે, આગમ રીતે થાય, જિનવર પૂજો,
કારણ સત્યે કાર્યની રે સિદ્ધિ પ્રતીત કરાય, જિનવર પૂજો.'

(૩૨૭) મોક્ષના ઉપાયો

- ઉપદેશપદ ગા૦ ૭૮૨

दोसा जेण निरुज्झंति, जेण खिज्जंति पुव्वकम्माइं।
सो खलु मोक्खोवाओ रोगावत्थासु समणं वा ॥

(૩૨૮) મોક્ષના ઉપાયો

- आवश्यक हारिभद्रीय, पृ०१४०

धम्मोवाओ पवयणमहवा पुव्वाइं देसगा तस्स।
सव्व जिणाण गणहरा चउदसपुव्वी व जे जस्स ॥२७०॥
सामाइयाइया वा वयजीवणिकाय भावणा पढमं।
एसो धम्मोवाओ जिणेहिं सव्वेहिं उवइट्ठो ॥२७१॥

(૩૨૯) - ઉપમિતિ, પ્ર૦૮, શ્લો. ૨૯૦ થી ૨૯૫, ૨૯૭, પૃ૦ ૭૧૩

સર્વ કાર્યોમાં પ્રધાનહેતુ સિદ્ધ ભગવંત છે.

तदाज्ञालंघनात् दुःखं, तदाज्ञाकरणात्सुखं।
अतः संपद्यते सर्वं, सर्वेषामपि देहिनां ॥२९०॥

अणुमात्रमपि तन्नाऽस्ति भुवनेऽत्र शुभाशुभम् ।
तदाज्ञा-निरपेक्षं हि सञ्जायेत कदाचन ॥२९१॥
तेनेच्छाराग-विद्वेषरहितोऽपि स भूपतिः ।
निर्वृत्तिस्थोऽपि कार्याणां सेव्यः परमकारणात् ॥२९२॥
स एव परमो हेतुस्ततस्ते गुणधारण !
सुन्दरेतर-कार्याणां सर्वेषां नाऽत्र संशयः ॥२९३॥
तदाज्ञालंघनात् पूर्वं जाता ते दुःखमालिका ।
अधुना तत्करत्वेन सुखलेशोऽयमीदृशः ॥२९४॥
यदा तु तस्य संपूर्णामाराप्तिं तां करिष्यसि ।
तदा यः सुखसन्दोहस्तस्य विज्ञास्यसे स्वयं ॥२९५॥
पृ० ७१४ : 'तदन्ये हेतवो भूप! सुन्दरेतर-वस्तुषु ।
अप्रधानास्त्वया सेव्या स्तावेव परमौ यतः'॥२९६॥

(३२०) समर्थाः — समराइच्च कहा, पृ० ३३

'समागया सयलदुक्खतरुबीयभूआ अमेत्ती ।'

અગ્નિશર્માને ત્રીજીવાર પારણું ન થયું, ત્યારે નગરની બહાર નીકળીને વિચાર કરે છે: 'एत्थन्तरम्मि य अन्नाणदोसेणं अणाविद्धपरमत्थमग्गत्तणेण य गहिओ कसाएहिं, अवगया से परलोयवासणा, पणट्ठा धम्मसद्धा, समागया सयलदुक्खतरुबीयभूआ अमेत्ती जाया य देहपीडाकारी अतीव बुभुक्खा । आकरिसिओ बुभुक्खाए ।'

(૩૨૧) નમસ્કારાદિનું ધ્યાન શ્રાવકનો વિધિ છે.

- શ્રી ઉપદેશ પદ, ભાગ ૨, શ્લોક ૮૯૭, ટીકા

'श्रमणोपासकानां शेषविहितानुष्ठानाऽबाधया
समुचितसमये उत्तमेव नमस्कारादिध्यानमिति ।'

- ગુણસ્થાન ક્રમારોહ, ગા. ૩૦

प्रमाद्यावश्यकत्यागान्निश्चलं ध्यानमाश्रयेत् ।
योऽसौ नैवागमं जैनं वेत्ति मिथ्यात्वमोहितः ॥

(૩૨૨) ધર્મના હેતુમાં સતત પ્રયત્ન

विपरीतास्तु धर्मस्य एतएवोदिताः बुधैः ।
एतेषु सततं यत्नः सम्यक् कार्यः सुखैषिणा ॥ ५ ॥

टीका - विपरीतास्तु अहिंसासत्यास्तेयब्रह्मापरिग्रह-
सम्यग्दर्शन - क्षान्तिमार्दवार्जवानीहारूपाः
तु एत एव बुधैरर्हद्वचनानुसारि गीतार्थैः,
धर्मस्य गुणाः शुश्रूषादि लक्षणस्य हेतव उदिताः ।
अत एतेषु धर्महेतुषु सततं निरन्तरं
सुखैषिणा कल्याणकामेन सम्यग्विधिना यत्नः
कार्यः सुखोपाये प्रवृत्तेरेव सुखोत्पत्तेः ।
स्वभावतः सुखदुःखेच्छाद्वेषवतामपि
प्राणिनां सुखोपाये धर्मेऽनिच्छा,

दुःखोपाये चाऽधर्मे लिप्सा खलु
मोहमहाराजनिदेशविलसितम् । तदुक्तम् -
'धर्मस्य फलमिच्छन्ति धर्मं नेच्छन्ति मानवाः ।
पापस्य फलं नेच्छन्ति, पापं कुर्वन्ति सादराः ॥ १ ॥'
उक्त - हेतुषु प्रवृत्ता च, अहिंसादिनाऽविरतेः,
सम्यग्दर्शनेन च मिथ्यात्वस्य, क्षमादिना च क्रोधादीनां
निवृत्तेस्तन्मूलक - दुःखविरहादनिवारितः सुखावकाशः ।
'अहिंसया क्षमया क्रोधस्य, ब्रह्मचर्येण वस्तुविचारेण
कामस्य, अस्तेयाऽपरिग्रहरूपेण संतोषेण लोभस्य,
सत्येन यथार्थज्ञानरूपेण विवेकेन मोहस्य, तन्मूलानां
च सर्वेषां निवृत्तिः' इति तु पातंजलमतानुसारिणः ।
तत्रेदं भावनीयं, अहिंसादिना मूलगुणघाति -
क्रोधादिनिर्वृत्तावपि संज्वलनादि - रूप -
क्रोधादि - निर्वृत्तिः क्षमाद्युत्तर - गुणसाम्राज्याद्देव ॥ ५ ॥
अहिंसादि संपत्ति निमित्तमेवाह —
साधुसेवा सदा भक्त्या मैत्री सत्त्वेषु भावतः ।
आत्मीयग्रहमोक्षश्च, धर्महेतु - प्रसाधनम् ॥ ६ ॥
सदा सर्वकालम्, भक्त्या बहुमानेन,
साधुसेवा ज्ञानादि - गुणवृद्धोपासना,

ॐ

भावतो निश्चयतः सत्त्वेषु प्राणिषु मैत्री
प्रत्युपकारनिरपेक्षा प्रीतिः।
आत्मानुग्रहस्य ममत्व परिणामस्य मोक्षः
परित्यागो यस्माद् बाह्यसंगत्याग इत्यर्थः।
स च धर्महेतुनामहिंसादीनां प्रकृष्टं कालाद्योगा-
व्यवच्छिन्नं साधनम्। अत्र प्रसाधनम् इत्येकवचनेन
स्वेतरसकलकारणानियतत्वं व्यज्यते ॥६॥

(३२३) प्रवचननी व्याख्या
- विशेषावश्यक गा० १३७४, कोट्याचार्य टीका, पृ० ३९८
प्रवचन द्वारः (I) इह हि यत् प्रगतं जीवादिषु
अर्थेषु - तेन - चरणरूपतया वचनं तत् प्रवचनं।
(II) प्रशस्तं वा यद् वचनं मांगलिकत्वात्।
(III) प्रधानवचनं वा यत् सकलसत्त्वहितप्रवृत्तत्वात्।

(३२४) मैत्र्यादि
- शास्त्रवार्ता, स्याद्वाद कल्पलता, पृ० ५
शुभाशयरूप धर्ममां कारणभूत अहिंसादि दशविधधर्म
अने अहिंसादि दशविधधर्ममां कारणभूत मैत्री.
'प्रत्युपकार - निरपेक्षा प्रीतिः।' छे.
*नोंध: मूळ पाठो माटे जुओ पृष्ठ - २९३.

પૃ. ૯ : મૈત્ર્યાભાવના સામ્ય અને ક્ષયોપશમ દ્વારા
શુદ્ધોપયોગ રૂપ ધર્મમાં ઉપયોગી થાય છે.

પૃ. ૧૦ : મૈત્ર્યાદિ વાસના શુદ્ધ વાસના છે. મૈત્ર્યાદિ-
ભાવનોપબૃંહિત અનિત્યત્વાદ્યનુપ્રેક્ષાઓના અભ્યાસથી
પરમ નિર્મમત્વ અને પરમ માધ્યસ્થ્ય પ્રાપ્ત થાય છે.

પૃ. ૧૧ : મૈત્ર્યાદિ શુદ્ધ વાસનાના બળથી
રાગવાસના, દ્વેષવાસના, પુદ્ગલતત્ત્વાનુશય વાસના,
પાપતત્ત્વનિમિત્તકાનુશય વાસના નિવૃત્ત થાય છે અને
અશુભકાર્યપુદ્ગલપ્રવૃત્તિ અને
ચિત્તપ્રસત્તિથી ઉત્કૃષ્ટ માધ્યસ્થ્ય આવે છે.

(૩૨૫) બહિરંગ લક્ષણ : અધ્યાત્મ મત પરીક્ષા, સટીક, પૃ. ૮૧
બહિરંગ લક્ષણ બહારથી જણાય છે કે અસાર્વદિક હોય છે.
જીવનું અસ્તિત્વ ઉપગ્રહ માટે છે, એમ નહિ પણ
ઉપગ્રહથી જીવનું અસ્તિત્વ જાણી શકાય છે.

(૩૨૬) મધ્યસ્થ - સામાયિકવાન્ - ઠાણાંગ, પૃ. ૨૩૨
બાહ્ય ચેષ્ટા વડે સાવધાન અને અસાર્વદિક તે બહિરંગ.
સુમુખ મનો યસ્યાઽસૌ સુમના હર્ષવાન્ રક્ત ઇત્યર્થઃ ।
એવં દુર્મના દૈન્યાદિમાન્ દ્વિષ્ટ ઇત્યર્થઃ
નો સુમના દુર્મનાઃ મધ્યસ્થઃ સામાયિકવાનિત્યર્થઃ ।

ૐ

(૩૨૭) અંતરંગ - બહિરંગ લિંગ

- શાસ્ત્રવાર્તા, સ્યાદ્વાદકલ્પલતાયાં |

જં ચ જિણલક્ખણં તં ભુવઇટ્ઠં તસ્સ લક્ખણં લિંગં |
તેણ વિણા સો જુજ્જઇ ધૂમેણ વિણા હુયાસુવ્વ ||૧૫૨||

××× બહિર્લિઙ્ગાભેદં ન ત્વંતરંગમિતિ ચેત્તદિમાવયો:
સમાનં, ચેષ્ટાયા બહિસ્ત્વં શરીરપરિણામિત્વરૂપં
સંગચ્છતે ન તુ ચારિત્રેઽપીતિ ચેન્ન,
બહિર્વિરાધ્યમાનત્વસ્યાઽસાર્વદિકભાવત્વસ્ય
વા બહિસ્ત્વસ્યોભયત્ર તુલ્યત્વાત્ |
દ્રવ્ય વ્યવદાનાઽભવ્યચેષ્ટા - પ્રતિપન્થિપરિણામા
ઇવ તપશ્ચારિત્રચેષ્ટા નૈશ્ચયિક્ય:
સિદ્ધાનામબાધિતા ઇવેતિ કશ્ચિત્, તદપિ ન,
તત્ત્વતસ્તાદૃશપરિણામાનાં તેષ્વભાવાત્ |
તત્કાર્યાભાવેષુ તત્ત્વવિદ્ધાંશાનુપચારપ્રસંગાત્,
ન ચ તાદૃશોઽપ્યુપચાર: પ્રામાણિકો, વિનાગમં તસ્ય
નિર્મૂલત્વાદિતિ દિગ્ | - અધ્યાત્મમત પરીક્ષા, પૃ૦ ૮૧

(૩૨૮) મૈત્ર્યાદિયુક્ત પરમ માધ્યસ્થ્ય લાભ

મૈત્ર્યાં ભાવયતો નિત્યં શુભો ભાવ: પ્રજાયતે |
તતો ભાવોદકાજ્જન્તોર્દ્વેષાગ્નિરુપશામ્યતિ ||૮||

xxx एवं च शुद्धोपयोगलक्षण धर्मे साम्य-
दृष्टिपरम द्वारा मैत्र्युपबृंहते इति फलितम् ॥८॥

अप्रवृत्त्यैव सर्वत्र यथासामर्थ्यभावतः ।
*નોંધ : ૩૨૪ના મૂળભૂત પાઠો શાસ્ત્રવાર્તા સમુચ્ચયમાંથી:
विशुद्धभावनाऽभ्यासात् तन्माध्यस्थ्यं परं मतः ॥३४॥

टीका : सर्वत्र गम्यागमनादौ यथासामर्थ्यभावतः
स्वपरिहार - सामर्थ्यानतिक्रमेण,
अप्रवृत्त्यैव - तन्निबन्धन - विषयद्वेषात् तदनिच्छया,
निर्ममत्वभावसाधक विशुद्धानां मैत्र्याद्युपबृंहितानां भावनां
नाम नित्यत्वाद्यनुप्रेक्षाणामभ्यासाद् दृढमानसोत्साहात्,
परम - निर्ममत्व प्राप्तेः, विषयद्वेषस्यापि वह्नेर्दाहं
विनाश्यानुविनाशवद् विषयेच्छां विनाश्य तत्कालं
विनाशात्, तत् प्रागुक्तम् परं उत्कृष्ट - माध्यस्थ्यं
भवति मतः, अतोऽन्यथा - नोपपद्यते इति भावः ।

तदिदमुक्तं वशिष्ठेनाऽपि मानसीर्वासनाः
पूर्वत्यक्त्वा विषयवासनाः ।
मैत्र्यादिवासना राम ! गृहाणाऽमलवासनाः ॥१॥

तत्र वासनालक्षणमिदम् —
दृढभावनया त्यक्तपूर्वापरविचारणम् ।
यदा दानं पदार्थस्य वासना सा प्रकीर्तिता ॥२॥

ॐ

सा च द्विविधा - मलिना, शुद्धा च ।

तत्र शुद्धा योगशास्त्रसंस्कार-प्राबल्यात् तत्त्वज्ञान-
साधनत्वेन एकरूपाऽपि मैत्र्यादिशब्दैर्विभक्ता ।

मलिना तु त्रिविधा - लोकवासना,
शास्त्रवासना, देहवासना चेति ।

सर्वे जना यथा न निन्दन्ति तथैवाऽऽचरिष्यामि ।
इत्यशक्यार्थाभिनिवेशो लोकवासना ।

अस्याश्चाऽशक्यार्थत्व-पुरुषार्थानुपयोगित्वाभ्यां मलिनत्वम् ।

शास्त्रवासना त्रिविधा - पाठव्यसनम्,
बहुशास्त्रव्यसनम्, अनुष्ठानव्यसनं चेति । मलिनत्वं
चाऽस्याः क्लेशावहत्व-पुरुषार्थानुपयोगित्व-दर्पहेतुत्वैः ।

देहवासना च त्रिविधा - आत्मत्व - भ्रान्तिः,
गुणाधानभ्रान्तिः, दोषापनयन - भ्रान्तिश्च ।

गुणाधानं द्विविधम् - लौकिकं शास्त्रीयं च ।
आद्यं सम्यक् शब्दादि - विषय - संपादनम्,
अन्त्यं गंगास्नानादि - संपादनं ।

दोषापनयनमप्येवं द्विविधम् ।
आद्यं औषधेन व्याध्याद्यपनयनम्,
अन्त्यं स्नानादिनाऽशौचाद्यपनयनम् ।

एतन्मालिन्यं चाऽप्रामाणिकत्वात्,
अशक्यत्वात्, पुनर्जन्महेतुत्वाच्च ।
शुद्धि-वासनया चेयं मलिनवासना क्षीयते, तथा हि -
सुखिषु मैत्रीं भावयतस्तदीयं सुखं मदीयमेवेति कृत्वा
'सर्वं सुखजातीयं मे भूयात्'
इति चिन्तात्मिका रागवासना निवर्त्तते, दुःखिषु करुणां
भावयतश्च वैरादिनिवृत्त्याद्वेषवासना निवर्तते ।
तथा पुण्यवत्सुमुदिता भावनात् पुण्याकरणानुशयनिवृत्ते-
स्तद्वासना निवर्तते, तथा पापेषूपेक्षां भावयतस्तत्करणा-
निमित्तकानुशयनिवृत्तेस्तद्वासना निवर्तत इति ।
ततोऽशुक्लाऽकृष्णा - पुण्यप्रवृत्ति -
चित्तप्रसादाभ्यां परं मादृशस्थैर्यम् ।
- इति पातंजलानाम् प्रक्रिया ।

(३२१) मैत्र्यादियुक्त ध्यान द्वारा कैवल्यज्ञान
- शास्त्रवार्ता, पृ० ३३६

प्रवर्तमान एवं च यथाशक्ति - स्थिराशयः ।
शुद्धि - चारित्रमासाद्य केवलं लभते क्रमात् ॥ २० ॥
टीका : एवं च उक्तेन प्रकारेण मुक्तौ रागप्रतिबन्धात्
यथाशक्तिः स्वशक्त्यनुसारेण प्रवर्तमानः स्थिराशयः

दुर्लेश्याऽक्लेश-प्रशस्त-परिणामः शुद्धं निष्फलं चारित्र-
मासाद्य क्रमात् ध्यानारोहपरिपाटीतः केवलं लभते।
तथाहि— लेश्याविशुद्ध्या, भावनाहेतुक-साम्यहेतुक
रागद्वेषजयेन वा कृतमनःशुद्धिः मैत्र्यप्रमोदकारुण्य-
माध्यस्थ्य पवित्रितचित्तो भावितात्मा पर्वतगुहा-
